PG SK S1 01 (DSC)

द्विवर्षीयस्नातकोत्तरः पाठ्यक्रमः

(चि. बि. चि. एच. एन. इ. पि. २०२० अनुसारम्)

प्रथमषाण्मासिकः

संस्कृतसाहित्यस्येतिहासः

संस्कृतम्

पद्मनाथ-गोहाञिबरुवा-मानविकी-विद्या-अध्ययन-सत्रम्
कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

विषयविशेषज्ञाः

१) आचार्य प्रह्लादः रा. जोशी, कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी

२) अध्यापिका सुदेष्णा भट्टाचार्या, अध्यक्षा, संस्कृतविभागः, गुवाहाटी विश्वविद्यालयः

३) प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटी विश्वविद्यालयः

पाठ्यक्रम-समन्वयकाः : डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः
पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

पाठ्यक्रम- प्रस्तुतकर्तारः

अध्यायाः	**प्रस्तुतकर्तारः**
१, २, ४, ५,	कृशाङ्गीभट्टाचार्यः, शोधच्छात्रा (JRF), संस्कृतवेदाध्ययनविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी
३, ६	कंकणा गोस्वामी, सहायकशिक्षिका, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः, गुवाहाटी
७, ११, १२	अनुराधा शरणीया, सहायकाचार्या (अतिथिः), संस्कृतवेदाध्ययनविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी
८	डॉ. गायत्री शर्मा, सहाचार्या, संस्कृतविभागः, सन्दिकै-बालिका-महाविद्यालयः, गुवाहाटी
९, १०	बरषा पाटगिरिः, सहायकाचार्या (अतिथिः), संस्कृत-विभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी
१३	डॉ. छविलाल उपाध्यायः, सहायकाचार्यः, संस्कृतसाहित्यविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी
१४	डॉ. तिना शर्मा, सहायकाचार्या, रंगियामहाविद्यालयः, रंगिया

सम्पादनसमितिः

विषयवस्तु-सम्पादना : डॉ. प्रणवज्योति डेका, सहायकाचार्यः, संस्कृतवेदाध्ययनविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी (१, २, ३, ४, ५, ६, ७)
डॉ. बर्णाली बरठाकुरः, सहायकाचार्या, संस्कृतवेदाध्ययनविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी (८, ९, १०, ११, १२, १३, १४)

प्रारूप-सम्पादना : पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

प्रथमप्रकाशः - मार्च, २०२५

ISBN :978-93-7839-199-6

 This Self Learning Material (SLM) of the Krishna Kanta Handiqui State University is made available under a Creative Commons Attribution-Non Commercial-ShareAlike4.0 License (International) : http.//creativecommons.org/licenses/by-nc-sa/4.0

Printed and published by Registrar on behalf of the Krishna Kanta Handiqui State Open University.

Headquarters: Patgaon, Rani Gate, Guwahati-781017
City Office: NH 37, Resham Nagar, Khanapara, Guwahati-781022 Web: www.kkhsou.in

विषयपरिकल्पनम्

पृष्ठासंख्या

अध्यायः १ रामायणम् (सामान्याध्ययनम्) ७–२०

रामायणस्य रचनाकालः, रामायणस्य विषयवस्तु, रामायणस्य प्रभावः, रामायणस्य विकासः, रामायणस्य महत्त्वम्, रामायणस्य सामाजिकचित्रणम्।

अध्यायः २ महाभारतम् (सामान्याध्ययनम्) २१–३२

महाभारतस्य क्रमविकासः, महाभारतस्य विषयवस्तु, महाभारतस्य रचनाकालः, महाभारतस्य प्रभावः, रामायणमहाभारतयोः तुलना।

अध्यायः ३ पुराणसाहित्यम् (सामान्याध्ययनम्) ३३–५३

पुराणशब्दस्य अर्थः तथा उत्पत्तिः, पुराणस्य रचयिता तथा कालः, पुराणस्य विषयवस्तु तथा विशेषताः, पुराणस्य रचनाशैली विशेषता च, महापुराणानां उपपुराणानां च संख्या, विभिन्नानां महापुराणानां वर्णनम्, पुराणस्य प्रभावः।

अध्यायः ४ महाकाव्यम् (सामान्याध्ययनम्) ५४–७५

प्राक्कालिदासीय महाकवयः महाकाव्यानि च, कालिदासयुगीय महाकवयः महाकाव्यानि च, कालिदासोत्तरयुगीय महाकवयः महाकाव्यानि च।

अध्यायः ५ नाटकम् (सामान्याध्ययनम्) ७६–९१

नाटकस्य उत्पतिः, नाटकस्य विकासः, कालिदासस्य प्राक्कालीयनाटकानि, कालिदासीयनाटकानि, कालिदासोत्तरनाटकानि।

अध्यायः ६ गीतिकाव्यम् (सामान्याध्ययनम्) ९२–१०९

गीतिकाव्यम्, गीतिकाव्यस्य स्रोतः, गीतिकाव्यस्य विभागाः, विभिन्नगीतिकाव्यानाम् उल्लेखः।

अध्यायः ७ चम्पूकाव्यम् (सामान्याध्ययनम्) ११०–१२३

चम्पूकाव्यस्य परिभाषा, चम्पूकाव्यस्य वैशिष्ट्यम्, चम्पूकाव्यस्य उद्भवः विकासश्च, चम्पूकाव्यस्य वर्ण्यविषयः, भिन्नचम्पूकाव्यानि।

अध्यायः ८ ऐतिहासिककाव्यम्, लिपिकाव्यम्, कोशकाव्यम्, पालिकाव्यञ्च (सामान्याध्ययनम्) १२४-१३८

ऐतिहासिककाव्यम् तस्य उद्भवश्च, ऐतिहासिककाव्यानाम् अभावस्य कारणानि, विभिन्नानाम् ऐतिहासिककाव्यानामुल्लेखः, लिपिकाव्यं तथा विभिन्नानां लिपिकाव्यानामुल्लेखः, कोषकाव्यं तथा विभिन्नानां कोषकाव्यानामुल्लेखः, पालिकाव्यम्।

अध्यायः ९ गद्यकाव्यम् (सामान्याध्ययनम्) १३९-१५४

गद्यस्वरूपम्, गद्यस्य भेदाः, गद्यस्य उत्सः, सुबन्धु-बाणभट्ट-दण्डीनां गद्येषु शैलीगतवैशिष्ट्यम्, गद्यसाहित्यस्य भेदाः।

अध्यायः १० आख्यानसाहित्यम् (सामान्याध्ययनम्) १५५-१७०

आख्यानसाहित्यस्य लक्षणम, आख्यानसाहित्यस्य विभाजनम्, आख्यानसाहित्यस्य उत्सः, आख्यानसाहित्यस्य वैशिष्ट्यम्, आख्यानसाहित्यस्य प्रकाराः।

अध्यायः ११ शतककाव्यम् (सामान्याध्ययनम्) १७१-१८२

शतककाव्यस्य लक्षणम्, शतककाव्यरचनाया उद्देश्यम्, शतककाव्यस्य उत्सः, नामाकरणपद्धतिः, शतककाव्यस्य वैशिष्ट्यम्, शतककाव्यस्य भागः, भिन्नशतककाव्यानि।

अध्यायः १२ वैज्ञानिकसाहित्यम् (आयुर्वेदः,वास्तुशास्त्रञ्च) १८३-१९६

आयुर्वेदः चिकित्साशास्त्रं वा, आयुर्वेदस्य विभागाः, आयुर्वेदस्य वैशिष्ट्यम्, आयुर्वेदशास्त्रस्य उत्सः, भिन्नानाम् आयुर्वेदशास्त्राणामुल्लेखः, वास्तुशास्त्रस्य परिचयः, वास्तुशास्त्रस्य उत्सः, भिन्नानां वास्तुशास्त्राणामुल्लेखः।

अध्यायः १३ वैज्ञानिकसाहित्यम् (गणितविद्या, ज्योतिर्विद्या च) १९७-२१२

खगोलशास्त्रस्य परिचयः/ ज्योतिर्विद्यायाः परिचयः, खगोलशास्त्रचर्चायाः/ज्योतिर्विद्याचर्चायाः उद्देश्यानि विभागाश्च, खगोलशास्त्रस्य स्रोतः/ज्योतिर्विद्यायाः उत्सः, विविधानां खगोलशास्त्राणामुलेखः/ विविधज्योतिर्विद्यागतशास्त्राणाम् उल्लेखः, शब्दावली/शब्दार्थतालिकाः, गणितविद्या/गणितशास्त्रस्य परिचयः, गणितविद्यायाः स्रोतः, विविधगणितशास्त्राणामुलेखः।

अध्यायः १४ ऐतिहासिकदृष्ट्या संस्कृतभाषायाः विकासः २१३-२२३

संस्कृतभाषायाः परिचयः, इन्दो-यूरोपीयभाषा तथा संस्कृतम्, वैदिकसंस्कृतभाषा, लौकिकसंस्कृतभाषा, संस्कृतभाषायाः वर्तमानावस्था।

पाठ्यविषयस्य परिचयः : संस्कृतसाहित्यस्येतिहासः

कृष्णकान्तसन्दिकैराज्यिकमुक्तविश्वविद्यालयेन गृहीतस्य स्नातकोत्तरपर्यायगतसंस्कृतविषयस्य प्रथमषाण्मासिके प्रथमपत्ररूपेण 'संस्कृतसाहित्यस्येतिहासः' इति पाठ्यविषयः प्रस्तूयते। अस्मिन् पाठ्यविषये संस्कृतसाहित्यस्येतिहाससन्दर्भे आलोच्यते। तस्मादेव अस्य पाठ्यविषयस्य नामकरणं वर्तते 'संस्कृतसाहित्यस्येतिहासः' इति। पाठ्यविषयेऽस्मिन् चतुर्दशोऽध्यायाः सन्ति। ते अध्यायाः क्रमपूर्वकं यथा –

१) रामायणम् (सामान्याध्ययनम्)
२) महाभारतम् (सामान्याध्ययनम्)
३) पुराणसाहित्यम् (सामान्याध्ययनम्)
४) महाकाव्यम् (सामान्याध्ययनम्)
५) नाटकम् (सामान्याध्ययनम्)
६) गीतिकाव्यम् (सामान्याध्ययनम्)
७) चम्पूकाव्यम् (सामान्याध्ययनम्)
८) ऐतिहासिककाव्यम्, लिपिकाव्यम्, कोशकाव्यम्, पालिकाव्यञ्च (सामान्याध्ययनम्)
९) गद्यकाव्यम् (सामान्याध्ययनम्)
१०) आख्यानसाहित्यम् (सामान्याध्ययनम्)
११) शतककाव्यम् (सामान्याध्ययनम्)
१२) वैज्ञानिकसाहित्यम् (आयुर्वेदः,वास्तुशास्त्रञ्च)
१३) वैज्ञानिकसाहित्यम् (गणितविद्या, ज्योतिर्विद्या च)
१४) ऐतिहासिकदृष्ट्या संस्कृतभाषायाः विकासः

पाठ्यविषयस्यास्य अध्ययनसमये मूलपाठेन सह वामपार्श्वे तथा दक्षिणपार्श्वे केचन चतुर्भुजाकृतिषु मञ्जुषासु विषयाः परिलक्ष्यन्ते। ते विषयाः मूलपाठेषु उल्लिखिताः महत्त्वपूर्णाः धारणाः सरलरूपेण अवबोधने सहायकं भविष्यन्ति। 'ज्ञातव्यम्' इत्यस्मिन् अंशे पाठेन सह सम्बद्धानां महत्त्वपूर्णानां तथ्यानां वर्णनं प्राप्यते। प्रत्येकं शाखाया अध्ययनान्ते 'अग्रगत्याः निरीक्षणम्' इत्यंशे प्रदीयमानाः प्रश्ना अध्ययनस्य प्रगतये सुविधां प्रदास्यन्ति। अध्ययनात्परं उद्धृतानां प्रश्नानाम् उत्तराणि विलिख्य पाठस्यान्तिमे प्रदीयमानः 'अग्रगत्याः निरूपणम्' इत्यस्मिन् अंशेन सह यदि सुमेलयिष्यन्ति तर्हि शिक्षार्थीनां कृते लाभप्रदायकं भविष्यन्ति। अध्यायेऽस्मिन् आलोचितानां विषयाणां विस्तृतरूपेण अध्ययनाय 'ज्ञानाधिक्यम्' इत्यस्मिन् अंशे उल्लिखिताः ग्रन्थाः सहायकाः भविष्यन्ति। अध्यायस्यान्तिमे केचन 'अभ्यासप्रश्नाः' प्रदीयन्ते। अन्तिमाध्यायस्यान्ते केषाञ्चन सहायकग्रन्थानां नामानि उल्लिख्यन्ते। तेषां ग्रन्थानां सहायेन अस्मिन् पाठ्यविषये उद्धृता अध्यायाः प्रस्तूयन्ते। यदि भवन्तो विस्तृतरूपेण कमपि विषयं ज्ञातुमिच्छन्ति तर्हि तान् ग्रन्थान् अध्ययनं कर्तुं शक्नुवन्ति।

अध्यायः १ : रामायणम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

१.३ रामायणस्य रचनाकालः

१.४ रामायणस्य विषयवस्तु

१.५ रामायणस्य प्रभावः

१.६ रामायणस्य विकासः

१.७ रामायणस्य महत्त्वम्

१.८ रामायणस्य सामाजिकचित्रणम्

१.९ अध्यायस्य असमीयाभाषायां सारांशः

१.१० अध्यायात् किमवगतम्

१.११ ज्ञानाधिक्यम्

१.१२ अग्रगत्याः निरूपणम्

१.१३ अभ्यासप्रश्नाः

३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- रामायणस्य रचनाकालविषये ज्ञातुं शक्नुवन्ति।
- रामायणस्य विकासविषये विषयवस्तुविषये च अवगमनं भविष्यन्ति।
- रामायणस्य प्रभावेन संस्कृतसाहित्यस्य अन्यरचनाः केन प्रकारेण प्रभाविताः भवन्ति, तस्य विषये अवगन्तुं शक्नुवन्ति।
- साधारणजनानां मध्ये रामायणस्य यत् महत्त्वम्, तद्विषये ज्ञातुं शक्नुवन्ति।
- रामायणस्य सामाजिकचित्रणेन सहापि अवगमनं भविष्यन्ति।

१.२ परिचयः

रामायणमस्ति आदिकाव्यम्। अस्य काव्यग्रन्थस्य ग्रन्थकारोऽस्ति महर्षिवाल्मीकिः। महर्षिवाल्मीकिः आदिकविनाम्ना अपि ज्ञायते। पुराणे उक्तमस्ति यत् महर्षिवाल्मीकिः भृगुमुनेः वंशधरः। एकदा महर्षिः वाल्मीकिः तमसानद्यां स्नानं कृत्वा प्रत्यागमनसमये एकस्य वृक्षस्य शाखायां क्रौञ्चपक्षीयुगलं दृष्टवान्। क्रौञ्चयुगलः अतीव हर्षेण वृक्षशाखायाम् उपविष्ट आसीत्। परन्तु तत्क्षाणमेव क्रौञ्चयुगलस्य एकः यदा व्याधस्य बाणेन विद्धोऽभवत् तदा वाल्मीकिमुनेः मनसि दुःखम् उपजायते। तदैव तस्य मुनेः मुखात् एकः श्लोको निःसृतोऽभवत्। श्लोको यथा–

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥' इति।

एवं रूपेण दुःखे निमग्नावस्थायां ब्रह्मणः आदेशानुसारं वाल्मीकिमुनिः रामायणं रचयितुं प्रारम्भं कृतवान्। रामायणे आहत्य सप्तकाण्डानि सन्ति।

सप्तकाण्डानाम् अध्ययनेन भवान् रामायणस्य विषयवस्तु-रचनाकाल-विकास-रामायणकालीनसमाजव्यवस्था-अन्यरचनायामुपरि रामायणस्य प्रभावादिभिन्नविषयैः सह परिचितो भवितुं शक्ष्यति।

१.३ रामायणस्य रचनाकालः

वेदानां पश्चात् एव रामायणस्य रचना अभवत् इति ज्ञायते। परन्तु महाभारतस्य रचनायाः प्राक् एव रामायणस्य रचना अभवत् इति स्वीकरोति। अस्य कारणमस्ति यत् महाभारतस्य वनपर्वणि रामस्य उल्लेखो मिलति। केवलं रामस्य एव न इतोपि रामायणस्य अन्यबहूनां चरित्राणाम् उल्लेखोऽपि महाभारते उपलभ्यते। पुनः रामायणस्य श्लोकद्वयमपि महाभारते प्राप्यते। एवं महाभारतस्यापि केषाञ्चिदपि चरित्राणाम् उल्लेखः रामायणे नोपलभ्यते। अतैव महाभारतात् प्राक् रामायणं रचितम् इति अनुमीयते।

पालिभाषायां विरचितस्य त्रिपिटकस्य अन्तर्गते जातकग्रन्थे वर्णितः 'दशरथजातक' अपि रामायणस्य प्रभावविषये अस्मान् प्रदर्शयति। 'समाजजातके' व्याधेन मुनिपुत्रस्य मृत्युविषये वर्णितमस्ति। इदं वर्णनं रामायणे वर्णितस्य अन्धकमुनेः पुत्रस्य श्रवणकुमारस्य राजादशरथेन निधनविषये अस्मान् स्मारयति। अतैव अनुमातुं शक्यते यत् रामायणस्य रचना बौद्धधर्मस्य आविर्भावकालात् पूर्वमेव अभवत् इति। पुनः बौद्धत्रिपिटके रामचरितसम्बन्धीयं प्राचीनरूपमपि अस्ति। यं चारणजनाः गीयते स्म।

रामायणग्रन्थे यवनशब्दस्य द्विवारम् उल्लेखमस्ति। अतैव एतत् दृष्ट्वा पण्डितवेवरमहोदयः रामायणस्योपरि ग्रीककविहोमारस्य ग्रन्थस्य प्रभाव अस्ति इति वदति। परन्तु याकोविनामक एकपण्डितः वेवरस्य मतम् अस्वीकृत्य ख्री.पू. ३०० वर्षपश्चात् रामायणं प्रक्षिप्तमस्ति इति एवं रूपेण स्वमतम् उपस्थापयति। अनेन यवनशब्देन ग्रीकजनान् एव सूच्यते, इतोपि उत्तर-पश्चिमभारते ये विदेशीयजनाः आक्रमणं कृतवन्तः, तान् सर्वान् एव बुध्यते। ग्रीकपरिव्राजकमेगेस्थेनिचस्य वचनात् प्राप्यते यत् ख्री. पू. चतुर्थशताब्द्याम् एव पाटलिपुत्रनगरं स्थापितमभवत्। इदं पाटलिपुत्रनगरं मगधस्य राजधानीरूपेण ख्री. पू. ३५० इत्यस्मिन् काले एव परिगणितोऽभवत्। पाटलिपुत्रस्य समीपस्थानां केषाञ्चित् लघुनगराणाम् उल्लेखो रामायणे उपलभ्यते, परन्तु पाटलिपुत्रनगरस्य उल्लेखो रामायणे नोपलभ्यते। अतैव पण्डिताः स्वमतम् उपस्थापयन्ति यत् पाटलिपुत्रनगरस्य प्रतिष्ठाकालात् प्राक् एव रामायणं विरचितमभवत्।

रामायणकाव्ये कौशलराज्यस्य राजधानी 'अयोध्या' इति नाम्ना प्राप्यते। बौद्धकाले अस्य नाम आसीत् साकेतः। ग्रीकजनाः एवम् अष्टाध्यायीग्रन्थस्य ग्रन्थकारपाणिनि अपि कौशलराज्यस्य

राजधानी 'साकेतः' इति उल्लिखति। अस्मात् एतदेव अनुमीयते यत् बौद्धकालात् बहुप्राक् एव रामायणस्य रचना अभवत्।

इतिहासस्य तथ्यानुसारं खृ.पू. ३०० शताब्द्याम् अशोकः पाटलिपुत्रनगरस्य प्रतिष्ठामकरोत्। ग्रीकपरिव्राजकमेगेस्थेनिचस्य भ्रमणकालेऽपि पाटलिपुत्रनगरे एव मगधस्य राजधानी आसीत्। पाटलिपुत्रस्य समीपे स्थितानां कौशाम्बी-कान्यकुब्जादीनां नगराणाम् उल्लेखो रामायणे मिलति। परन्तु प्रसिद्धपाटलिपुत्रनगरस्य उल्लेखो रामायणे न मिलति। तस्मादेव कारणात् पण्डितानां मतानुसारं पाटलिपुत्रनगरस्य प्रतिष्ठासमयात् प्राक् काले एव रामायणस्य रचना जाता।

रामायणस्य बालकाण्डे मिथिला विशाला च नामभ्यां पृथकनगरद्वयोः उल्लेखौ आस्ताम्। तदा नगरद्वयोः शासकद्वयम् आसीत्। परन्तु बुद्धदेवस्य काले राज्यद्वयम् एकत्र भूत्वा वैशालीनाम्ना परिचितोऽभवत्। अस्मादपि अनुमातुं शक्यते यत् आदिकाव्यं रामायणं बौद्धयुगात् पूर्वमेव रचितमभवत्।

१.४ रामायणस्य विषयवस्तु

आदिकविना वाल्मीकिना रामायणमहाकाव्यं प्रायः २४००० संख्यकैः श्लोकैः विरचितं वर्त्तते। एवं रामायणं सप्तसंख्यकेषु काण्डेषु विरचितम्। परम्परानुसारं रामायणस्य प्रतिसहस्रश्लोकाः गायत्रीमन्त्रस्य प्रत्येकाक्षरेण क्रमानुसारं प्रारम्भाः भवन्ति।

रामायणस्य प्रथमं काण्डमस्ति बालकाण्डम्। काण्डे अस्मिन् राजादशरथस्य पुत्राणां जन्मविषये, शैशवकालविषये वर्णितं वर्त्तते। सहैव च विश्वामित्रमुने आश्रमे यज्ञसंरक्षणम्, ताड़कादिराक्षसानां वधः, रामभरतादीनां भातृणां विवाहस्य सुन्दरं वर्णनं वर्णितमस्ति।

अयोध्याकाण्डं द्वितीयकाण्डस्य अभिधानं वर्त्तते। अस्मिन् काण्डे अयोध्यायाः राजसभा, रामस्य अभिषेकस्य आयोजनम्, वनवासः, पुत्रशोके शोकविह्वलस्य दशरथस्य मृत्युः, भरतेन रामस्य गृहप्रत्यागमनार्थं विफला प्रचेष्टा- एते विषयाः विवेचिताः सन्ति।

तृतीयकाण्डम् अरण्यकाण्डनाम्ना ज्ञायते। दण्डकारण्ये वनवासे स्थितानां राम-लक्ष्मण-सीतानां जीवनयापनम्, विराधवधः, रामस्य पञ्चवट्यां निवासः, रावणस्य भगिनीशूर्पणखया सह साक्षात्कारः,खरदूषणादिचतुर्दशसहस्रसंख्यकानां राक्षसानां वधः तथा रावणेन सीताहरणम्, तदनन्तरं च रामस्य विलापादिविषये अस्मिन् तृतीयकाण्डे निरूपितं विद्यते।

रामायणस्य चतुर्थकाण्डं किष्किन्धाकाण्डनामकं वर्त्तते। अत्रास्मिन् काण्डे वालिवधः, वालेः भ्रात्रा सुग्रीवेन सह रामस्य मित्रता, वानरेण सह हनुमतः सीताया अन्वेषणम् - एते विषयाः सम्यक् वर्णिताः सन्ति।

पञ्चमकाण्डस्य सुन्दरकाण्डनाम्ना नामकरणं जातम्। अस्मिन् सुन्दरकाण्डे रावणस्य लंकायाः सौन्दर्यम्, हनुमतः सीतायाः प्रति सान्त्वनावचनम्, सीतायाः सन्देशेन सह च हनुमतः रामसमीपं प्रत्यागमनादिविषयाः उपस्थापिताः विद्यन्ते।

षष्ठकाण्डमस्ति युद्धकाण्डम्। अत्र रामरावणयोः युद्धस्य वर्णनं तथा युद्धस्यान्ते रामेण रावणस्य निधनः सीतया सह च लंकातः रामस्य प्रत्यागमनं पुनः अयोध्यायां रामस्य अभिषेकस्य च वर्णनं सम्यगुपवर्णितं वर्त्तते।

अन्तिमस्य सप्तमकाण्डस्य अभिधानमस्ति उत्तरकाण्डम्। उत्तरकाण्डेऽस्मिन् रामस्य राज्यशासनेन सह सीतायाः लोकापवादार्थं रामेण सीतायाः परित्यागम्, सीतायाः विलापः, वाल्मीकिमुने आश्रमे सीतायाः आश्रयलाभः, लवकुशयोः जन्म, अश्वमेधयज्ञः, लक्ष्मणवर्जनादिविषयाः सुष्ठु वर्णिताः दृश्यन्ते। इतोपरि अनेकानि आख्यानानि अपि अत्रैव उपस्थापितानि सन्ति।

१.५ रामायणस्य प्रभावः

आदिकाव्यरामायणं सम्पूर्णभारतीयजनसमाजम्, भारतीयसाहित्यसंस्कृतिं च प्रभावयति। बहुनि काव्यानि, नाटकानि च रामायणमाधारीकृत्य एव रचितानि सन्ति। महाभारतस्य वनपर्वणि रामाख्यानस्य वर्णनं संमिलति। विष्णु-ब्रह्माण्ड-गरुड-अग्नि-भागवतपुराणेषु अपि रामकथायाः वर्णनं वर्णितमस्ति। तथैव देवीभागवतपुराणेऽपि रामस्य वर्णनम् उपलभ्यते। पालित्रिपिटकस्य अन्तर्गते दशरथजातकेऽपि रामाख्यानेन सहितं बुद्धदेवस्य पूर्वजन्मनः कथा प्रचारितोऽभवत्। महाकविभास अपि रामायणम् आधाररूपेण स्वीकृत्य प्रतिमानाटकम् अभिषेकनाटकं च रचितवान् आसीत्। भासस्य अनुवर्ती महाकविकालिदास अपि रामायणम् आधारीकृत्य रघुवंशमहाकाव्यं विरचितवान्। कविभवभूति अपि महावीरचरितनाटकम् उत्तररामचरितनाटकं च रामायणम् आधारीकृत्य रचितवान् आसीत्। एवं प्रवरसेनस्य सेतुबन्धः, कुमारदासस्य जानकीहरणम्, मुरारीदेवस्य अनर्घराघवम्, जयदेवस्य प्रसन्नराघवं च रामाख्यानम् आधाररूपेण स्वीकृत्य विरचितम् आसीत्। एवमेव राजशेखरविरचितस्य बालरामायणस्य, भोजस्य रामायणचम्पोः क्षेमेन्द्रस्य रामायणमञ्जरीग्रन्थस्य च आधारं रामायणम्।

इतोपरि बौद्धकवे अश्वघोषस्य, जैनसन्यासीविमलसूरी-आदीनां रचनायामपि रामायणस्य प्रभावः परिलक्ष्यते। बौद्धग्रन्थस्य तिव्वतीयानुवादे चीनानुवादे च रामकथाया उल्लेखो मिलति। इन्दोनेछिया-मालयेचिया-कम्बोदिया-थाइलेण्डादिदेशानां साहित्यसंस्कृतौ जनसमाजे च रामायणस्य प्रभावो दृश्यते।

मध्ययुगीयस्योपरि आधुनिकभारतीयसाहित्यस्योपरि च रामायणस्य प्रभाव अस्ति एव। षोडशशताब्द्याः भक्तिकवितुलसीदासस्य रचना रामचरितमानसः, असमस्य माधवकन्दलिविरचितम् असमीयारामायणम्, वंगदेशीयं कृत्तिवासीरामायणं प्रख्यातम्। रामायणस्य बालकाण्डे अस्य श्लोकस्य उल्लेखो मिलति यत् -

'यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावत् रामायणी कथा लोकेषु प्रचरिष्यति।।' इति।

अर्थात् यदा पर्यन्तं पृथिव्यां नदीपर्वतादयः स्थास्यन्ति, तदा पर्यन्तं रामायणकथा लोकसमाजे प्रचरिष्यति।

१.६ रामायणस्य विकासः

जार्माणपण्डित-याकोविः रामायणस्य विषयवस्तु विश्लेषणं कृत्वा मूलरामायणं पञ्चकाण्डेषु विभक्तमस्ति इति स्वमतम् उपस्थापयति। तदनुसारं रामायणस्य मूलविषयवस्तुः अयोध्याकाण्डे प्रारम्भो भूत्वा युद्धकाण्डे समाप्तो भवति। बालकाण्डम् उत्तरकाण्डं च अनन्तरं मूलभागस्य आदौ अन्ते च संयोजितमभवत्। अस्य मतस्य केचन युक्तयः सन्ति, ते अत्र उल्लिखिताः सन्ति-

१. युक्त्यनुसारं दशरथपुत्रस्य रामचन्द्रस्य अभिषेकस्य पश्चात् रामकथा समाप्ता अभवत्। सम्प्रति अपि दृश्यते यत्शमकथायाः आवृत्तिः प्रवचनं च रामस्य अभिषेके एव समाप्तं जातम्। उत्तरकाण्डे ये विषयाः सन्ति तैः सह मूलरामकथायाः विशेषसम्बन्धो नास्ति। रावणस्य वानराणां च पूर्ववृत्तान्तः सप्तमकाण्डे दृश्यते। उत्तरकाण्डे उल्लिखिताः रामस्य उत्तरजीवनस्य विषयाः रामस्य वीरचरित्रं प्रस्फूटयितुं समर्थाः न सन्ति। तत्र बहुनि उपाख्यानानि अपि सन्ति।

२. बालकाण्डस्य प्रथमे तृतीये च सर्गे रामायणस्य विषयसूचीद्वयं प्राप्यते। तस्याः विषयसूच्या एकस्यां बालकाण्डस्य उत्तरकाण्डस्य च विषयवस्तुनः उल्लेखो नोपलभ्यते। परन्तु प्रथमसूच्यां तेषाम् उल्लेख अस्ति। अतैव सूचीद्वयमेव रामायणस्य पृथकस्तरद्वयं सूचयति।

३. द्वितीय-तृतीय-चतुर्थ-पञ्चमकाण्डानां च भाषा रचनाशैली च प्रथमकाण्डस्य सप्तमकाण्डस्य च भाषाशैलीतः पृथकरूपाऽस्ति।

४. बालकाण्डे लक्ष्मणं विवाहितरूपेण आख्यायते परन्तु अरण्यकाण्डे रामः लक्ष्मणम् अविवाहितरूपेण उल्लिखति। अतैव मतद्वये एव विरोधमस्ति।

५. प्रथमकाण्डे सप्तमकाण्डे च रामं यद्यपि विष्णोः अवताररूपेण उच्यते परन्तु अन्यपञ्चसु काण्डेषु तथाविधस्य तथ्यस्य उल्लेखो नास्ति एव।

६. बालकाण्डे वाल्मीकिना रामायणरचनाया आधारं चित्रितमस्ति। बालकाण्डे उत्तरकाण्डे च वाल्मीकिमुनेः चरित्रस्यापि चित्रणम् उपलभ्यते। अतैव अनयोः काण्डद्वयोः रचना वाल्मीकिना कृतम् इति अयुक्तिकरमस्ति।

७. रामायणस्य बहुत्र स्थाने बहवः अंशाः प्रक्षिप्ताः सन्ति। रामायणस्य प्रथमकाण्डस्य सप्तमकाण्डस्य च वर्णनात् ज्ञायते यत् वाल्मीकिमुनिः अयोध्यायाः समीपे गंगानद्याः तीरे आश्रमं स्थाप्य निवासमकरोत्। अतैव सः रामस्य विषये रामस्य पूर्वजानां विषये च ज्ञात आसीत्। यदा रामः सीतां परित्यक्तवान् तदा वाल्मीकिः सीताम् आश्रमे आश्रयं ददाति स्म। वाल्मीकिमुनेः आश्रमे एव लवकुशयोः जन्म अभवत्, पुनः तत्रैव पालित अपि अभवत्। वाल्मीकिः एताः कथाः आधाररूपेण स्वीकृत्य रामायणं रचितवान्। पश्चात् तानि गीतानि

भ्राम्यमानकुशीलवगायकाः गीतवन्तः। सर्वप्रथमं लवकुशौ एव रामकथां गीत्वा प्रचारं कृतवन्तौ इति कारणात् तथाविधस्य संगीतस्य गायकाः कुशीलवनाम्ना ज्ञातवन्तः। काचन शतिकापश्चात् रामकथायाः आदौ अन्ते च बालकाण्डस्य उत्तरकाण्डस्य च संयोजनमभवत्।

१.७ रामायणस्य महत्त्वम् -

वाल्मीकिकृतं रामायणं केवलं प्रथममहाकाव्यरूपेण एव जगति प्रसिद्धं नास्ति, इदमस्ति एकम् अतीव प्रख्यातं लौकिककाव्यम्, यत्र वर्णितानां शिक्षाणां व्यवहारिकप्रमूल्यानि अपि सन्ति। रामायणे उपलब्धाः शिक्षणीयविषयाः साधारणजनानां कृते सरलतया बोधगम्याः वर्त्तन्ते। अत्र यानि चरित्राणि चित्रितानि सन्ति तानि समाजस्य प्रत्येकजनानां कृते आदर्शस्वरूपाणि। रामो यथा पुरुषस्य उत्तम आदर्शः, तथैव सीता अपि नारीणाम् आदर्शरूपा, लक्ष्मण-भरत-शत्रूघ्नप्रभृतयः भ्रातुः आदर्शः, हनुमान् भक्तस्य आदर्शः, तथैव सुमित्रा कौशल्या च मातृणां कृते आदर्शस्वरूपा। यथा अनुजभातृणां कृते रामस्य प्रेम अतुलनीयः, तथैव लक्ष्मणस्यापि ज्येष्ठभ्रातारामं प्रति श्रद्धा प्रेमः च अतुलनीयः। रामायणमहाकाव्यस्य प्रत्येकस्मिन् वाक्ये, प्रत्येकस्मिन् शब्दे च उच्चमानवादर्शं नीतिज्ञानं निहितमस्ति। अतैव रामायणस्य कथा प्राचीना भूत्वाऽपि चिरनवीनाऽस्ति। सः प्राचीनादर्श एव नवपुरुषान् अनुप्रेरयति। अर्थात् गौरवपूर्ण अतीतकाल एव वर्तमानकालीनजनान् भविष्यत्कालीनजनान् च प्रेरयति। रामायणं प्राचीनभारतीयसभ्यतासंस्कृते आधारशिलारूपेण स्मरणीयं वरणीयं च। रामायणम् एव अस्मान् प्रागैतिहासिकयुगस्य समाजव्यवस्थाविषये, राजनैतिकावस्थाविषये, भौगोलिकावस्थाविषये ज्ञातुम् अवबोधयितुं च साहाय्यं करोति। अतैव रामायणस्य महत्त्वं सर्वदैव अस्माकं समाजे स्थास्यति एव।

१.८ रामायणस्य सामाजिकचित्रणम् -

रामायणकाले आर्यजनानां जीवनयापनार्थं प्रधानजीविका आसीत् कृषिः, पशुपालनम्, वाणिज्यम् इत्यादीनि। मृत्तिकाकर्षणार्थं साधनम् आसीत् नाङ्गलः। यव-धान्य-तिलादीनि आसीत् प्रधानशस्यानि। उत्पन्नस्य शस्यस्य एकषष्ठांशं राजानं प्रदानस्य विधि आसीत्। पशुपालनमपि महत् वृत्ति आसीत्। यादुविद-गायक-सूत्रधार स्थपतिविद-वैद्यादयः वृत्तियुक्तजना आसन्।

आर्यजनाः निरामिषखाद्यम् आमिषखाद्यं च भक्षन्ति स्म। आमिषखाद्यानां मध्ये हरिणं प्रियखाद्यमासीत्। सीतया सह वनवासं प्रति यात्रासमये रामः लक्ष्मणः च हरिणं वधं कृत्त्वा भक्षणस्य उल्लेखः प्राप्यते। मत्स्यव्यापार अपि प्रचलित आसीत्। यौनसम्भोगार्थं युद्धक्षेत्रे उत्तेजनासृष्ट्यर्थं च मदिरापानस्य परम्परा प्रचलिता आसीत्।

राजनैतिकजीवनं यथेष्टोन्नतमासीत्। राजवंशस्य ज्येष्ठसन्ततिः उत्तराधिकारीरूपेण शासनस्य दायित्वं ग्रहणं करोति स्म। राज्ञ आचरणं यथा आसीत्, प्रजाया आचरणमपि तथैव आसीत्। राजा प्रजानां मतं श्रद्धां करोति स्म। सीतायाः प्रति रामस्य अनन्तप्रेमकारणात् एव रामः रावणबन्धनात्

सीताम् उद्धारं कृत्वा आनयति, परन्तु तां सीतामेव रामः प्रजान् सन्तुष्टं कर्तुं समर्थो नाभवत् इति कारणात् परित्यक्तवान्।

पितृसत्यपालनार्थं पुत्रस्य स्वेच्छानुसारं वनवासग्रहणम्, भ्रातृप्रेमहेतोः वनवासी- अग्रजस्य आग्रहः, भारतीयनार्याः एकनिष्ठपतिभक्तिः आदिपारिवारिकादर्शाः आसीत् जीवन्तशक्तिः। राम आदर्शस्य प्रतीक आसीत्।

रामायणकालीनसमाजे सङ्गतिहीनानां नियमानां प्रचलनमासीत्। समाजस्य भिन्नलोकाचाराणामपि वर्णनं रामायणे समुपलभ्यते।



ज्ञातव्यम्

- स्वर्गीयगायकान् चारणनाम्ना ज्ञायते।
- गायत्रीमन्त्रं सावित्रीमन्त्रनाम्ना अपि उच्यते। ऋग्वेदस्य एकः प्रख्यातः मन्त्रः अयम्। इमं मन्त्रं सूर्यदेवतामुद्दिश्य गायाति।

१.७ अध्यायस्य असमीयाभाषायां सारांशः

ৰামায়ণৰ ৰচনাকাল -

বেদৰ ৰচনাৰ পিছত ৰামায়ণ ৰচনা হয় বুলি জনা যায়। ৰামায়ণৰ ৰচনা মহাভাৰতৰ আগতে হৈছিল বুলি স্বীকাৰ কৰা হয়। কাৰণ মহাভাৰতৰ বনপর্বত (সর্গ 258–283) ৰামৰ উল্লেখ আছে। অকল ৰামৰেই নহয় আন ভালেমান ৰামায়ণৰ চৰিত্রৰ উল্লেখ মহাভাৰতত পোৱা যায়। আনকি ৰামায়ণৰ দুটা শ্লোক মহাভাৰতত উদ্ধৃতও হৈছে। অন্যহাতে মহাভাৰতৰ কোনো বীৰৰ উল্লেখ ৰামায়ণত দেখা পোৱা নাযায়। গতিকে এই সকলোবোৰৰ পৰা ৰামায়ণ মহাভাৰতৰ পূর্ববর্তী ৰচনা বুলি অনুমান কৰা হয়।

পালি ভাষাত ৰচিত ত্রিপিটকৰ অন্তর্গত জাতকগ্রন্থত বর্ণিত 'দশৰথ জাতকে' ৰামায়ণৰ প্রভাৱৰ কথা দাঙি ধৰে। 'সামজাতক'ত চিকাৰীৰ হাতত মুনি পুত্রৰ নিধন হোৱা ঘটনাটোৰে ৰামায়ণত বর্ণিত অন্ধকমুনিৰ পুত্র শ্রৱণকুমাৰ ৰজা দশৰথৰ হাতত নিধন হোৱা কথাটোলৈ মনত পেলাই দিয়ে। গতিকে ৰামায়ণৰ ৰচনা বৌদ্ধধর্মৰ আবির্ভাৱৰ আগৰ বুলি অনুমান কৰিব পাৰি। আকৌ বৌদ্ধ ত্রিপিটকত ৰামচৰিত সম্বন্ধীয় প্রাচীনতম ৰূপ আছে, যিসমূহ চাৰণসকলে মুখে মুখে গাইছিল।

ৰামায়ণত 'যবন' শব্দটো দুবাৰ উল্লেখ হোৱা দেখি পণ্ডিত ৱেবাৰ মহোদয়ে ৰামায়ণৰ ওপৰত গ্রীক কবি হোমাৰৰ গ্রন্থৰ প্রভাৱ পৰিছে বুলি উল্লেখ কৰে। কিন্তু য়াকোবি নামৰ আন এজন পণ্ডিতে বেৱাৰৰ এই মত অগ্রাহ্য কৰি খ্রীঃ পূঃ 300 বছৰৰ পাছত ৰামায়ণ প্রক্ষিপ্ত বুলি মতামত দিয়ে। এই যৱন শব্দটোৰে অকল গ্রীক সকলোকেই বুজোৱা নাই; উত্তৰ পশ্চিম ভাৱতত যিবিলাক বিদেশীয়ে আক্রমণ চলাইছিল সেই আটাইবোৰ জাতিকে বুজাইছে। গ্রীক পৰিব্রাজক মেগেস্থেনিচৰ টোকাৰ পৰা পোৱা যায় যে খ্রীঃ পূঃ চতুর্থ শতাব্দীতে পাটলিপুত্র নগৰ স্থাপিত

হয়। এই নগৰ মগধৰ ৰাজধানী হিচাপে খ্ৰীঃ পূঃ 350 তে পৰিগণিত হয়। যদিও পাটলিপুত্ৰৰ ওচৰে পাজৰে থকা কিছুমান সৰু সৰু নগৰৰ উল্লেখ ৰামায়ণত আছে, কিন্তু এই পাটলিপুত্ৰৰ উল্লেখ ৰামায়ণত নাই। সেয়েহে পণ্ডিতসকলে পাটলিপুত্ৰ নগৰ প্ৰতিষ্ঠিত হোৱাৰ আগতেই ৰামায়ণ ৰচিত হৈছিল বুলি মত পোষণ কৰে।

ৰামায়ণত "কৌশল" ৰাজ্যৰ ৰাজধানীৰ নাম 'অযোধ্যা' বুলি উল্লেখ আছে। বৌদ্ধযুগত ইয়াৰ নাম আছিল "সাকেত"। আনকি গ্ৰীকসকলে আৰু অষ্টাধ্যায়ী ব্যাকৰণৰ ৰচক পাণিনিয়েও কৌশলৰ ৰাজধানী সাকেত বুলিহে উল্লেখ কৰিছে। ইয়াৰ পৰাও এইটো অনুমান কৰিব পাৰি যে বৌদ্ধযুগৰ বহু আগতে ৰামায়ণ ৰচিত হৈছিল।

বুৰঞ্জীৰ তথ্য মতে খৃঃ পূঃ 300 শতাব্দীত অশোকে পাটলিপুত্ৰ নগৰ প্ৰতিষ্ঠা কৰিছিল।

গ্ৰীক পৰিব্ৰাজক মেগেস্থেনিচৰ ভ্ৰমণৰ সময়তো পাটলিপুত্ৰতেই মগধৰ ৰাজধানী আছিল। এইটোও মন কৰিবলগীয়া যে এই নগৰৰ ওচৰে পাজৰে থকা কৌশাম্বী, কান্যকুব্জ আদি নগৰবোৰৰ নাম ৰামায়ণত উল্লেখ আছে। কিন্তু প্ৰসিদ্ধ পাটলিপুত্ৰ নগৰখনৰ নাম ৰামায়ণৰ কতো উল্লেখ নাই।

সেয়ে পণ্ডিতসকলে মত পোষণ কৰিছে যে পাটলিপুত্ৰ নগৰ প্ৰতিষ্ঠিত হোৱাৰ আগতেই ৰামায়ণ ৰচিত হৈছিল।

ৰামায়ণৰ বালকাণ্ডত মিথিলা আৰু বিশালা নামেৰে দুখন পৃথক নগৰৰ উল্লেখ আছিল।

তেতিয়া দুয়োখন নগৰতে দুজন শাসনকৰ্তা আছিল। কিন্তু বুদ্ধদেৱৰ সময়ছোৱাত দুয়োখন ৰাজ্য একত্ৰিত হৈ বৈশালী নাম লয়। ইয়াৰ পৰাও অনুমান কৰিব পাৰি যে ৰামায়ণ বৌদ্ধ যুগৰ আগতেই ৰচিত হৈছিল।

ৰামায়ণৰ বিষয়বস্তু -

আদি কবি বাল্মীকি ৰচিত ৰামায়ণ মহাকাব্য প্ৰায় 24000 শ্লোকেৰে ৰচিত। ৰামায়ণৰ মূল পাঠ সাতটা কাণ্ডত ৰচিত। পৰম্পৰামতে ৰামায়ণৰ প্ৰতিহাজাৰ শ্লোক গায়ত্ৰী মন্ত্ৰৰ একোটা আখৰেৰে ক্ৰমশঃ আৰম্ভ হৈছে।

ৰামায়ণৰ প্ৰথম কাণ্ডটোৰ নাম বালকাণ্ড। এই কাণ্ডটোত দশৰথৰ পুত্ৰসমূহৰ জন্ম আৰু শৈশৱকাল বৰ্ণিত হৈছে। লগতে বিশ্বামিত্ৰ ঋষিৰ আশ্ৰমত যজ্ঞসংৰক্ষণ, তাড়কাদি ৰাক্ষস বধ, ৰাম আৰু ভৰত আদি ভাতৃসকলৰ বিবাহ বৰ্ণনা কৰা হৈছে।

দ্বিতীয় কাণ্ডটোৰ নাম অযোধ্যাকাণ্ড। এই কাণ্ডটোত বৰ্ণিত বিষয়বস্তুসমূহ হ'ল অযোধ্যাৰ ৰাজসভা, ৰামৰ অভিষেক আয়োজন, বনবাস, পুত্ৰশোকত কাতৰ দশৰথৰ মৃত্যু, ভৰতৰদ্বাৰা ৰামক প্ৰত্যাৱৰ্ত্তন কৰোৱাৰ বিফল প্ৰচেষ্টা আদি।

তৃতীয় কাণ্ডটোৰ নাম অৰণ্যকাণ্ড। দণ্ডকাৰণ্যত বনবাস পালন কৰি থকা ৰাম লক্ষ্মণ আৰু সীতাৰ জীৱন যাপন, বিৰাধ বধ, ৰামৰ পঞ্চবটী নিবাস, ৰাৱণৰ ভগ্নী শূৰ্পণখাৰ সৈতে সাক্ষাৎকাৰ, খৰ দূষণাদি চৈধ্য হাজাৰ ৰাক্ষসৰ বধ তথা ৰাৱণৰ দ্বাৰা সীতাহৰণ আৰু তাৰ পিছত ৰামৰ বিলাপ আদি এই কাণ্ডটোত বৰ্ণোৱা হৈছে।

চতুর্থ কাণ্ডটো 'কিষ্কিন্ধাকাণ্ড' নামেৰে জনাজাত। কাণ্ডটোত বালিবধ, বালিৰ ভাতৃ সুগ্রীবৰ সৈতে ৰামচন্দ্ৰৰ মিত্রতা, বান্দৰসকলক লগত লৈ হনুমানৰ সীতাৰ অন্বেষণ বর্ণনা কৰা হৈছে।

পঞ্চম কাণ্ডটোৰ নাম সুন্দৰ কাণ্ড। ইয়াত ৰাৱণৰ ৰাজপুৰীৰ সৌন্দর্য্য, হনুমানৰ সীতাৰ প্রতি সান্ত্বনা আৰু সীতাৰ বার্তা লৈ হনুমানৰ ৰামৰ ওচৰলৈ প্রত্যাগমন আদিৰ বর্ণনা কৰা হৈছে।

ষষ্ঠ কাণ্ডটো হ'ল যুদ্ধ কাণ্ড। ইয়াত ৰাম ৰাৱণৰ দীঘলীয়া যুদ্ধৰ বর্ণনা তথা যুদ্ধৰ শেষত ৰামৰ দ্বাৰা ৰাৱণৰ বধ আৰু সীতাক লৈ লংকাৰ পৰা ৰামৰ প্রত্যাগমন আৰু অযোধ্যাত ৰামৰ অভিষেক আদি বিষয় বর্ণনা কৰা হৈছে।

সপ্তম অর্থাৎ শেষৰ কাণ্ডটোৰ নাম হ'ল উত্তৰকাণ্ড। এই কাণ্ডটোত ৰামৰ ৰাজ্য শাসনৰ লগতে সীতাৰ লোকাপবাদৰ পৰিপ্রেক্ষিতত ৰামৰ দ্বাৰা সীতাৰ বির্সজন, সীতাৰ বিলাপ, বাল্মীকিৰ আশ্রমত সীতাৰ আশ্রয় লাভ, লৱ কুশৰ জন্ম, অশ্বমেধ যজ্ঞ, লক্ষ্মণবর্জন আদি ঘটনা বর্ণনা কৰা হৈছে। ইয়াৰ উপৰিও অনেক আখ্যানৰ উল্লেখ ইয়াত পোৱা যায়।

ৰামায়ণৰ প্রভাৱ -

আদিকাব্য ৰামায়ণে সমগ্র ভাৰতীয় জনমানস আৰু ভাৰতীয় সাহিত্য সংস্কৃতিৰ ওপৰত অপৰিসীম প্রভাৱ পেলাইছে। পৰৱর্তী বহুকেইখন কাব্য, নাটক আদি ৰামায়ণৰ অনুপ্রেৰণাতে ৰচিত হৈছে। আনকি মহাভাৰতৰ বনপর্বত (258–283 সর্গত) ৰামাখ্যানৰ বর্ণনা পোৱা যায়। বিষ্ণু, ব্রহ্মাণ্ড, গৰুড়, অগ্নি, ভাগৱত আদি পুৰাণতো ৰামকথাৰ উল্লেখ পোৱা যায়। সেইদৰে দেৱী ভাগৱতত (তৃতীয় স্কন্ধ, 28–29 সর্গ) ৰাম কথাৰ বর্ণনা আছে। পালি ত্রিপিটকৰ অন্তর্গত 'দশৰথ জাতক'তো ৰামকথাৰে লৈ বুদ্ধৰ পূর্বজন্মৰ কথা প্রচাৰ কৰা হৈছে। ৰামায়ণৰ আলমতে মহাকবি ভাসে 'প্রতিমা' আৰু 'অভিষেক' এই দুই নাটক ৰচনা কৰিছে। ভাসৰ অনুবর্তী মহাকবি কালিদাসেও ৰামায়ণক আলম কৰি ৰঘুবংশ মহাকাব্য ৰচনা কৰিছে। ইয়াৰ পিছৰ পর্যায়ত ভৱভূতিৰ মহাবীৰ চৰিত আৰু উত্তৰৰামচৰিত নাটক দুখন ৰামায়ণৰ কাহিনীক ভিত্তি কৰি ৰচিত হৈছে। আকৌ প্রবৰসেনৰ সেতুবন্ধ, কুমাৰ দাসৰ জানকীহৰণ, মুৰাৰীৰ 'অনর্ঘৰাঘৱ', জয়দেৱৰ 'প্রসন্নৰাঘৱ' ৰামকথাৰ আধা�ৰতে বিৰচিত হৈছে। একেদৰে, ৰামায়ণৰ কথাৰ আলম লৈ ৰাজশেখৰে 'বালৰামায়ণ', ভোজে 'ৰামায়ণচম্পু' আৰু ক্ষেমেন্দ্রই 'ৰামায়ণ মঞ্জৰী' ৰচনা কৰে।

এইবোৰৰ উপৰিও বৌদ্ধ কবি অশ্বঘোষ, জৈন সন্যাসী বিমলসূৰী (পউম চৰিত) আদিৰ ৰচনাতো ৰামায়ণৰ প্রভাৱ দেখা যায়। বৌদ্ধগ্রন্থৰ তিব্বতীয় আৰু চীনা অনুবাদতো ৰামকথাৰ উল্লেখ পোৱা যায়। ইণ্ডোনেছিয়া, মালয়েচিয়া, ছিঙ্গাপুৰ, কম্বোদিয়া, থাইলেণ্ড আদি দেশৰ সাহিত্য সংস্কৃতি আৰু জনমানসত ৰামায়ণৰ চিৰস্থায়ী প্রভাৱ দেখা যায়।

মধ্যযুগীয় আৰু আধুনিক ভাৰতীয় সাহিত্যৰ ওপৰতো ৰামায়ণৰ সুদূৰপ্রসাৰী প্রভাৱ দেখা পোৱা যায়। ষোড়শ শতাব্দীৰ ভক্তিকবি তুলসী দাসৰ ৰচনা 'ৰামচৰিত মানস', অসমৰ মাধৱকন্দলি ৰচিত ''অসমীয়া ৰামায়ণ', বংগদেশীয় 'কৃত্তিবাসী ৰামায়ণ' আদিয়ে জনপ্রিয়তা অর্জন কৰে। অৱশ্যে ৰামায়ণৰ বালকাণ্ডত (2û36–37) এইটো উল্লেখ আছে যে -

" যাৱৎ স্থাস্যতি গিৰয়ঃ সৰিতশ্চ মহীতলে।
তাৱদ ৰামায়ণ কথা লোকেষু প্রচৰিষ্যতি।। "

অর্থাৎ যেতিয়ালৈকে পৃথিৱীত নৈ আৰু পর্বত থাকিব তেতিয়ালৈকে ৰামায়ণ কথা লোক সমাজত প্রচাৰ হৈ থাকিব।

ৰামায়ণৰ বিকাশ—

জার্মাণ পণ্ডিত য়াকোবিয়ে ৰামায়ণৰ পাঠ্যাংশ বিশ্লেষণ কৰি মূল ৰামায়ণ পাঁচটা কাণ্ডত বিভক্ত আছিল বুলি মত প্রকাশ কৰিছে। এই মত অনুসাৰে ৰামায়ণৰ মূল কথা অযোধ্যা কাণ্ডত আৰম্ভ হৈ যুদ্ধ কাণ্ডত শেষ হৈছে। বালকাণ্ড আৰু উত্তৰাকাণ্ড, পিছত মূল কথাৰ আদিত আৰু অন্তত সংযোজিত হৈছে। এই মতামতৰ সমর্থনত কিছুমান যুক্তি আছে। সেইবোৰ তলত উল্লেখ কৰা হ'ল —

1] যুক্তিমতে দশৰথ পুত্র ৰামচন্দ্রৰ অভিষেকৰ পিছতেই ৰামকথা শেষ হৈছে। বর্তমানেও দেখা যায় যে ৰামকথাৰ আবৃত্তি আৰু প্রবচন ৰামৰ অভিষেকতে শেষ হৈছে। উত্তৰ কাণ্ডত উল্লেখ থকা ঘটনাসমূহৰ লগত মূল ৰামকথাৰ সম্বন্ধ বেছি দেখা নাযায়। ৰাৱণ আৰু বান্দৰবোৰৰ পূর্ব বৃত্তান্ত সপ্তম কাণ্ডত দেখা যায়। উত্তৰাকাণ্ডত উল্লেখিত ৰামৰ উত্তৰ জীৱনৰ কথাবোৰে ৰামৰ বীৰোচিত চৰিত্র অক্ষুন্ন ৰাখিবলৈ সমর্থ হোৱা নাই। তাত বহুতো উপাখ্যানৰ উল্লেখ পোৱা যায়।

2] বালকাণ্ডত প্রথম আৰু তৃতীয় সর্গত ৰামায়ণৰ দুটি বিষয়সূচী পোৱা যায়। সেই বিষয়সূচীৰ এটিত বালকাণ্ড আৰু উত্তৰকাণ্ডৰ বিষয়বস্তুৰ উল্লেখ পোৱা নাযায়। কিন্তু প্রথম সূচীত সেইবোৰৰ উল্লেখ আছে। গতিকে দুটা সূচীয়ে ৰামায়ণৰ দুটা স্তৰকে সূচাইছে।

3] দ্বিতীয়, তৃতীয়, চতুর্থ আৰু পঞ্চম কাণ্ডসমূহৰ ভাষা আৰু ৰচনা শৈলীও প্রথম আৰু সপ্তম কাণ্ডৰ ভাষা শৈলীতকৈ পৃথক।

4] বালকাণ্ডত লক্ষ্মণক বিবাহিত বুলি কোৱাৰ বিপৰীতে আকৌ অৰণ্যকাণ্ডত ৰামে লক্ষ্মণক অবিবাহিত বুলি উল্লেখ কৰিছে। গতিকে দুয়োটা কথাতে পাৰস্পৰিক বিৰোধিতা দেখা যায়।

5]) প্রথম আৰু সপ্তম কাণ্ডত ৰামক বিষ্ণুৰ অৱতাৰ বুলি কোৱা হৈছে যদিও আন পাঁচটা কাণ্ডত তেনে তথ্যৰ উল্লেখ পোৱা নাযায়।

6]) বালকাণ্ডত বাল্মীকিয়ে ৰামায়ণ ৰচনা কৰাৰ পটভূমি চিত্রিত হৈছে। বালকাণ্ড আৰু উত্তৰকাণ্ডত বাল্মীকিৰ চৰিত্রও চিত্রিত হৈছে। এনে ক্ষেত্রত বাল্মীকিয়ে এই দুই কাণ্ড নিজে ৰচনা কৰা কথাটো অযুক্তিসঙ্গত।

7]) ৰামায়ণৰ বহুতো ঠাইত বহু অংশ প্রক্ষিপ্ত হৈছে। ৰামায়ণৰ প্রথম আৰু সপ্তম কাণ্ডৰ বর্ণনাৰ পৰা জনা যায় যে বাল্মীকিয়ে অযোধ্যাৰ ওচৰতে গংগাৰ পাৰত আশ্রম পাতি বাস কৰিছিল। সেয়ে তেওঁ ৰাম আৰু ৰামৰ পূর্বপুৰুষসকলৰ বিষয়ে জ্ঞাত আছিল। ৰামে সীতাক পৰিত্যাগ কৰাৰ পিছত বাল্মীকিয়ে সীতাক আশ্রমত থাকিবলৈ আশ্রয় দান কৰিছিল। বাল্মীকিৰ

আশ্রমতে লৱ কুশৰ জন্ম হয় আৰু ডাঙৰ দীঘলো হয়। বাল্মীকিয়ে এই ঘটনাসমূহৰ আলম লৈ ৰামায়ণ ৰচনা কৰে। পিছলৈ সেই গীতবোৰ ভ্রাম্যমান 'কুশীলব গায়ক শ্রেণীয়ে গাই ফুৰিছিল। লৱকুশে প্রথমতে ৰামকথা গাই প্রচাৰ কৰা বাবে তেনে গীতৰ গায়ক শ্রেণীয়ে 'কুশীলব' আখ্যা পায়। জনপ্রিয়তা বৃদ্ধি পোৱাত ৰামকথাৰ মাজত অন্য কথাও সংযোজিত হয়। কেই শতিকামানৰ পিছত ৰামকথাৰ আদি-অন্তত বালকাণ্ড আৰু উত্তৰকাণ্ড সংযোজিত হয়।

ৰামায়ণৰ মহত্ব -

বাল্মীকিকৃত ৰামায়ণ কেৱল প্রথম মহাকাব্য হিচাপেই জগতত প্রসিদ্ধ নহয়, ই হৈছে এনে এখন অতি জনপ্রিয় লৌকিক কাব্য, য'ত নিহিত শিক্ষাসমূহৰ এক ব্যৱহাৰিক প্রমূল্যও আছে। ৰামায়ণত থকা শিক্ষণীয় বিষয়বোৰ জনসাধাৰণৰ বাবে সহজবোধ্য তথ্য। ইয়াত থকা চৰিত্রসমূহ সমাজৰ প্রতিজন লোকৰ বাবে আদর্শস্বৰূপ। ৰাম যিদৰে পুৰুষৰ উত্তম আদর্শ, সীতা সেইদৰে নাৰীৰ আদর্শ, লক্ষ্মণ, ভৰত আৰু শত্রুঘ্ন প্রভৃতি ভাতৃৰ আদর্শ, হনুমান ভক্তৰ (সেৱকৰ) আদর্শ, একেদৰে সুমিত্রা আৰু কৌশল্যা মাতৃসকলৰ বাবে আদর্শস্বৰূপ। অনুজ ভাতৃৰ বাবে ৰামৰ স্নেহ যিদৰে অতুলনীয়, সেইদৰে লক্ষ্মণৰো জ্যেষ্ঠ ভাতৃলৈ শ্রদ্ধা আৰু প্রেম তুলনাবিহীন। মুঠতে ৰামায়ণ মহাকাব্যৰ প্রতিটো বাক্যত, প্রতিটো শব্দত নিহিত হৈ আছে উচ্চতম মানবাদর্শ আৰু নীতিজ্ঞানৰ ভাণ্ডৰ। সেয়েহে ৰামায়ণৰ কাহিনী পুৰণি হৈও চিৰনতুন হৈ আছে। সেই পুৰণি আদর্শই নৱতম পুৰুষকো অনুপ্রাণিত কৰি আহিছে। অর্থাৎ গৌৰৱময় অতীতে বর্তমানক তথা ভৱিষ্যতৰ প্রজন্মক প্রেৰণা দি আছে। ৰামায়ণ প্রাচীন ভাৰতীয় সভ্যতা-সংস্কৃতিৰ আধাৰশিলাৰূপে স্মৰণীয় আৰু বৰণীয়। ইয়ে আমাক প্রাগৈতিহাসিকযুগৰ সমাজব্যৱস্থা, ৰাজনৈতিক আৰু ভৌগোলিক অৱস্থাৰ বিষয়ে জানিবলৈ আৰু বুজিবলৈ সহায় কৰে। গতিকে ৰামায়ণৰ মহত্ব সদায়েই আমাৰ সমাজত বর্ত্তি থাকিব।

ৰামায়ণৰ সামাজিক চিত্রণ -

ৰামায়ণৰ যুগত আর্যসকলৰ প্রধান জীৰিকা আছিল কৃষি, পশুপালন, বাণিজ্য আদি। মাটি চহাবৰ বাবে একমাত্র আহিলা আছিল নাঙল। গম, যব, ধান, তিল, মাহ আদি আছিল প্রধান শস্য। উৎপন্ন শস্যৰ এক ষষ্ঠাংশ ৰজাক ৰাজহ হিচাপে দিয়াৰ নিয়ম আছিল। পশুপালনো এটা ডাঙৰ বৃত্তি আছিল।

যাদুবিদ, গায়ক, সূত্রধাৰ, স্থপতি, বৈদ্য আদি বৃত্তিধাৰী লোক আছিল।

আর্যসকলে নিৰামিষ আৰু আমিষ দুয়োবিধ খাদ্যই ভক্ষণ কৰিছিল। আমিষৰ ভিতৰত হৰিণৰ মাংস আছিল অতি প্রিয় খাদ্য। সীতাৰ লগত বনবাসলৈ যোৱাৰ সময়ত ৰাম আৰু লক্ষ্মণে হৰিণ চিকাৰ কৰি মাংস ভক্ষণ কৰাৰ কথা উল্লেখ আছে। মাছৰ ব্যৱসায় প্রচলিত আছিল।যৌন সম্ভোগ আৰু যুদ্ধক্ষেত্রত উত্তেজনা সৃষ্টিৰ বাবে সুৰাপান কৰাৰ প্রথা আছিল।

ৰাজনৈতিক জীৱন আছিল যথেষ্ট উন্নত। ৰাজবংশৰ জ্যেষ্ঠ সন্তানজনে উত্তৰাধিকাৰীসূত্রে শাসনভাৰ গ্রহণ কৰিছিল। ৰজাৰ আচৰণ যেনেকুৱা হয় প্রজাৰো আচৰণ তেনেকুৱাই আছিল।

ৰজাই জনমতক যথেষ্ট শ্ৰদ্ধা কৰিছিল। সীতাৰ প্ৰতি থকা অগাধ ভালপোৱাৰ বাবেই ৰামে ৰাৱণৰ হাতৰ পৰা সীতাক উদ্ধাৰ কৰি আনিলে, কিন্তু সেই সীতাকেই তেওঁ প্ৰজাক সন্তুষ্ট কৰিবৰ বাবে নিৰ্বাসন দিলে।

পিতৃ সত্য পালনৰ বাবে পুত্ৰৰ স্বেচ্ছায় বনবাস গ্ৰহণ, ভাতৃপ্ৰেমৰ বাবে বনবাসী অগ্ৰজৰ আনুগত্য, ভাৰতীয় ৰমণীৰ একনিষ্ঠ পতিভক্তি আদি পাৰিবাৰিক আদৰ্শসমূহ আছিল জীৱন্ত শক্তি। ৰাম আদৰ্শৰ প্ৰতীক আছিল।

ৰামায়ণকালীন সমাজত অন্ধনীতি নিয়মৰ প্ৰচলন আছিল। ৰামায়ণত সমাজৰ নানা লোকাচাৰৰ বৰ্ণনা আছে।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: तुलसीदासविरचितस्य ग्रन्थस्य नाम किम् ?

.....

प्रश्नः २: रामायणे कौशलराज्यस्य राजधानीं केन नाम्ना उच्यते ?

.....

प्रश्नः ३: रामायणस्य मूलपाठः कति काण्डेषु विभक्तानि सन्ति ?

.....

प्रश्नः ४: रामायणस्य द्वितीयकाण्डस्य नाम किम् ?

.....

प्रश्नः ५: रामायणस्य अन्तिमकाण्डस्य नाम किम् ?

.....

प्रश्नः ६: रामाख्यानस्य वर्णनं महाभारतस्य ..... प्राप्यते।

.....

प्रश्नः ७: क्षेमेन्द्रस्य रामायणस्य आधारे विरचितस्य ग्रन्थस्य नाम किम् ?

.....

प्रश्नः ८: 'असमीया रामायण' केन रचितमासीत् ?

.....

प्रश्नः ९: रामायणस्य सप्तमकाण्डे रामं कस्यावताररूपेण आख्यायते ?

.....

प्रश्नः १०: 'बालरामायण' केन रचितम् ?

.....



१.१० अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- रामायणस्य रचनाकालविषये ज्ञातवान्।
- रामायणस्य क्रमविकाशविषये विषयवस्तुविषये च अवबोधितवान्।
- अन्यसंस्कृतसाहित्यस्योपरि रामायणस्य प्रभावविषये ज्ञातवान्।
- रामायणस्य महत्त्वविषये ज्ञातवान्।
- रामायणस्य एकं सामाजिकचित्रणमपि ज्ञातवान्।



१.११ ज्ञानाधिक्यम्

१) শর্মা, থানেশ্বৰ; সংস্কৃত সাহিত্যৰ ইতিবৃত্ত; গুৱাহাটী, চন্দ্র প্রকাশ।

২) গোস্বামী, হৰমোহন দেৱ, সংস্কৃত সাহিত্যৰ বুৰঞ্জী, পাণবজাৰ, গুৱাহাটী, বুকলেণ্ড।



१.१२ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : रामचरित मानस।

प्रश्नः २ उत्तरम् : अयोध्या।

प्रश्नः ३ उत्तरम् : सप्तकाण्डानि।

प्रश्नः ४ उत्तरम् : अयोध्याकाण्डम्।

प्रश्नः ५ उत्तरम् : उत्तरकाण्डम्।

प्रश्नः ६ उत्तरम् : वनपर्वणि।

प्रश्नः ७ उत्तरम् : रामायणमञ्जरी।

प्रश्नः ८ उत्तरम् : माधव कन्दलि।

प्रश्नः ९ उत्तरम् : विष्णु अवतारः।

प्रश्नः १० उत्तरम् : राजशेखरः।



१.१३ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: रामायणस्य संक्षिप्तपरिचयं लिखन्तु।

प्रश्नः २: रामायणस्य विषयवस्तु लिखन्तु।

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

प्रश्नः १: संस्कृतसाहित्यस्योपरि रामायणस्य प्रभावविषये एको लेखो लिख्यताम्।

प्रश्नः २: रामायणस्य महत्वं लिखन्तु।

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १: रामायणस्य रचनाकालमधिकृत्य निबन्धरेको विरच्यताम्।

प्रश्नः २: रामायणस्य सामाजिकचित्रणविषये एको लेखो लिख्यताम्।

*** ***** ***

अध्यायः २ : महाभारतम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

२.१ उद्देश्यम्

२.२ परिचयः

२.३ महाभारतस्य क्रमविकासः

२.४ महाभारतस्य विषयवस्तु

२.५ महाभारतस्य रचनाकालः

२.६ महाभारतस्य प्रभावः

२.७ रामायणमहाभारतयोः तुलना

२.८ अध्यायस्य असमीयाभाषायां सारांशः

२.९ अध्यायात् किमवगतम्

२.१० ज्ञानाधिक्यम्

२.११ अग्रगत्याः निरूपणम्

२.१२ अभ्यासप्रश्नाः

२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- महाभारतस्य विकासस्तराणां विषये ज्ञातुं शक्नुवन्ति।
- महाभारतस्य वर्णनीयवस्तुभिः सह अवगमनं भविष्यन्ति।
- महाभारतस्य रचनाकालविषये ज्ञातुं शक्नुवन्ति।
- महाभारतस्य प्रभावेन महाभारतोत्तरकाले समाजः कीदृशरूपेण प्रभावितो भवति, तद् विषये ज्ञानं भविष्यन्ति।
- रामायणमहाभारतयोः तुलनात्मकमध्ययनमेकम् अस्मिन् अध्याये ज्ञातुं शक्नुवन्ति।

२.२ परिचयः

अस्मिन् अध्याये भवान् महाभारतविषये अध्ययनं कर्तुं शक्ष्यति। संस्कृतालंकारिकाणां मतेन महाभारतं श्रेष्ठमहाकाव्यरूपेण गण्यन्ते। प्राचीनभारतीयभरतवंशीयानां राज्ञां वर्णनमेव काव्येऽस्मिन् वर्त्तते। अस्मिन् काव्ये बहुनि आख्यानानि उपाख्यानानि च सन्ति। एवं महाभारतम् इतिहासरूपेण पुराणरूपेण चापि अभिधीयते। महत्त्वदृष्ट्या गुरुत्वदृष्ट्या च इमं ग्रन्थं महाभारतम् इति उच्यते।

महाभारताधारितस्य अस्य अध्यायस्य अध्ययनेन भवान् महाभारतस्य रचनाकालः, महाभारतस्य प्रभावः, तथा रामायणमहाभारतयोः मध्ये तुलनां कर्तुं शक्ष्यति।

२.३ महाभारतस्य क्रमविकासः-

अधुना भवान् महाभारतस्य क्रमविकासविषये ज्ञातुं शक्ष्यति। महाभारतस्य रचना एकस्मिन् एव समये न जाता। अतैव अस्य ग्रन्थकारोऽपि एको नास्ति इति वक्तुं शक्यते। पुनः अस्य समाप्तिरपि बहुकालपश्चात् एव अभवत्।

महाभारतस्य मुख्यग्रन्थकार आसीत् कृष्णद्वैपायणवेदव्यासः। अस्य ग्रन्थस्य उपजीव्यविषयवस्तु अस्ति कौरवपाण्डवयोः युद्धः। व्यासदेवेन रचितं मूलकाव्यं जयकाव्यनाम्ना ज्ञायते। महाभारतस्य विकासः प्रधानरूपेण स्तरत्रयेषु अभवत्। अस्य प्रमाणं महाभारतस्य आदिपर्वणः एकस्मिन् श्लोके प्राप्यते यथा-

''मन्वादि भारतं केचिदास्तिकादि तथापरे।
तथोपरिचरादन्ये विप्राः सम्यगधिगम्यते॥''(१/१/५३)

मूलं जयकाव्यं वेदव्यासः वैशम्पायणम् अध्यापयति स्म। काव्येऽस्मिन् बहुनि आख्यानानि सन्ति। ततः आयाति भारताख्यग्रन्थः। भारताख्यं ग्रन्थं वैशम्पायणः जन्मेजयपरीक्षितस्य सर्पयज्ञे अपठत्। अत्र श्लोकसंख्याः आसन् २४०००। तदनन्तरं महाभारतग्रन्थं लोमहर्षणः नैमिषारण्यस्य सत्रयज्ञे शौनकादिमुनीन् श्रावयति स्म। महाभारते एकलक्षसंख्यकाः श्लोकाः सन्ति। अस्मिन् विषये महाभारते एवं रूपेण प्राप्यते यथा-

''अस्मिन्स्तु मानुष्ये लोक वैशम्पायनोक्तान्।
एकं शतसहस्रं तु मयोक्तं वै निबोधत॥'' इति।

सौतिना आवृत्तं महाभारतं विश्वकोष इवास्ति। अतैव महाभारतम् इतिहासरूपेण, पुराणरूपेण, धर्मशास्त्ररूपेण, महाकाव्यरूपेण च मन्यते। महाभारतस्य अन्तिमे 'हरिवंशः' नामकस्य एकस्य अंशस्यापि संयोजनम् अभवत्। एवम् अस्य आकारं विशालं जातम्। अतैव अयं विशालग्रन्थो महाभारतनाम्ना अभिहितम्।

२.४ महाभारतस्य विषयवस्तु -

महाभारते अष्टादशपर्वाणि सन्ति। प्रत्येकपर्वणि सर्गाः सन्ति। महाभारतस्य अष्टादशसंख्यकानां पर्वाणां नामानि यथा- १. आदिपर्वम्, २. सभापर्वम्, ३. वनपर्वम्, ४. विराटपर्वम्, ५. उद्योगपर्वम्, ६. भीष्मपर्वम्, ७. द्रोणपर्वम्, ८. कर्णपर्वम्, ९. शल्यपर्वम्, १०. सौप्तिकपर्वम्, ११. स्त्रीपर्वम्, १२. शान्तिपर्वम्, १३. अनुशासनपर्वम्, १४. आश्वमेधिकपर्वम्, १५. आश्रमवासिकपर्वम्, १६. मौषलपर्वम्, १७. महाप्रस्थानिकपर्वम्, १८. स्वर्गारोहणपर्वं च।

आदिपर्वणि चन्द्रवंशस्य इतिहासः विस्तृतरूपेण प्राप्यते। एवं कौरवाणां वंशस्य परिचयः, पाण्डवानां कुलपरिचयः, जन्मवर्णनम्, तेषां बाल्यावस्थायाः वर्णनम्, यौवनावस्थायाः वर्णनम्, द्रौपद्याः स्वयम्बरविषये, कृष्णस्य आगमनादिविषये च वर्णनं वर्णितं वर्त्तते।

सभापर्वणि पाण्डवानां इन्द्रप्रस्थे सभागृहनिर्माणस्य विषये, यज्ञस्यानुष्ठानविषये, दुर्योधनेन

सह युधिष्ठिरस्य द्युतक्रीडाविषये वर्णनं विद्यते। तस्यां द्युतक्रीडायां युधिष्ठिरः स्वराज्यम्, धनम्, अनुजभ्रातॄन्, सहैव च पत्नीं द्रौपदीमपि पराजितवन्तः। अस्मात् कारणादेव पाण्डवाः द्वादशवर्षं यावत् वनवासे व्यतीतवन्तः, पुनः एकवर्षम् अज्ञातरूपेण जीवनं यापितवन्तः। एतेषां सर्वेषां विषयाणां सविस्तरं विवरणं सभापर्वणि मिलति।

वनपर्वणि पाण्डवानां द्वादशवर्षपर्यन्तं काम्यकनामके वने जीवनयापनस्य विषये वर्णितमस्ति।

विराटपर्वणि मत्स्यराजविराटस्य राजप्रासादे पाण्डवानाम् एकवर्षपर्यन्तस्य समयस्य यापनस्य विवरणमस्ति। अस्मिन्नेव पर्वणि पञ्चपाण्डवानां द्रौपद्याः च राजभृत्यरूपेण अन्यनाम्ना अपरपरिचयेन च विराटराज्ञः राजप्रासादे एकवर्षयापनस्य वर्णनमुपलभ्यते।

उद्योगपर्वणि कुरुक्षेत्रयुद्धस्य आयोजनस्य वर्णनमस्ति। दुर्योधनः कुशाग्रसमानं भूमिम् अपि युद्धं विना दातुम् अस्वीकारं कृतवान्। अस्य पर्वणो मूलविषयवस्तु अस्ति पाञ्चालराजद्रुपद-मत्स्यराजविराट- वार्ष्णेयसात्यकिप्रभृतीनां कथनानुसारं पाण्डवाः स्वराज्योद्धारार्थं कौरवाणां सहितं कृतायोजनम्।

उद्योगपर्वणः पश्चात् भीष्म-द्रोण-कर्ण-शल्य-सौप्तिकपर्वसु कुरुक्षेत्रयुद्धस्य सविस्तरं विवरणं प्राप्यते। अष्टादशदिवसीये युद्धे कौरवाणां पाण्डवानां च आहत्य अष्टादश- अक्षौहिनीसंख्यकाः सैन्या आसीत्। पाण्डवानां सप्त-अक्षौहिनीसैन्याः, कौरवाणाम् एकादश- अक्षौहिनीसैन्याः, पञ्चपाण्डवाः, कृष्णः, सात्यकिः च पाण्डवपक्षस्य सैन्याः। कौरवाणां कृपाचार्यम्, अश्वत्थामाम् कृतवर्मां च परित्यज्य सर्वे जनाः युद्धे मृतवन्तः।

स्त्रीपर्वणि युद्धे मृतजनानाम् अन्त्येष्टिक्रियायाः वर्णनमस्ति।

शान्तिपर्वणि अनुशासनपर्वणि च बाणनिर्मितशय्यायां शयनरतस्य भीष्मस्य युधिष्ठिरं प्रति राजनीतिविषये, समाजनीतिविषये, वर्णाश्रमधर्मविषये, चतुर्वर्गविषये, वैष्णवशैवपन्थाविषये उपदेशस्य वर्णनं समुपलभ्यते।

आश्वमेधिकपर्वणि युधिष्ठिरस्य हस्तिनापुरे प्रवेशः, राज्याभिषेकः, अश्वमेधयज्ञानुष्ठानादिविषये विवेचनं प्राप्यते।

आश्रमवासिकपर्वणि धृतराष्ट्र-गान्धारी-आदिनां वानप्रस्थाश्रमे प्रवेशः दावाग्नौ प्राणनाशस्य च विवरणमस्ति।

मौषलपर्वणि यदुवंशस्य नाशो यदुवंशीयवज्रस्य च मथुरायाः राजारूपेण अभिषेकस्य वर्णनमस्ति।

महाप्रस्थानिकपर्वणि पाण्डवैः परीक्षितस्य अभिषेकः पाण्डवानां च महाप्रस्थानस्य वर्णनमस्ति।

स्वर्गारोहणपर्वणि युधिष्ठिरस्य स्वर्गारोहणस्य सविस्तरं विवरणमस्ति।

२.५ महाभारतस्य रचनाकालः

महाभारतस्य रचनाकालविषये पण्डितानां मध्ये मतभेदो दृश्यते। महाभारतस्य रचना १००० खृ. पूर्वतः ४०० ख्रीष्टाब्दपर्यन्तम् इति पण्डिताः मन्यन्ते। अत्र महाभारतस्य रचनाकालविषये मतानि यथा –

१. गुप्तकालस्य एकया लिप्या ज्ञातो भवति यत्– महाभारते एकलक्षश्लोकाः सन्ति। अतैव महाभारतस्य रचनासमयः अस्मात् शिलालिपितः पूर्वमेव आसीत्।

२. ख्रीष्टियषष्ठशतिकायां विदेशे महाभारतम् अन्यभाषायाम् अनुदित अभवत्। अतैव ततः पूर्वमेव महाभारतस्य समयः।

३. पण्डितानां मतानुसारं ख्रीष्टियतृतीयशतिकायां महाभारतस्य चीनदेशे प्रचारम् अभवत्। तदनुसारम् इतः प्रागेव महाभारतस्य रचना भारतवर्षे अभवत्।

४. ख्रीष्टियप्रथमशतिकायाः बौद्धकविना अश्वघोषेण विरचितायां वज्रसूचिकोपनिषदि महाभारतस्य श्लोको मिलति।

५. पाणिनिकृते अष्टाध्यायीग्रन्थे भीष्मस्य, युधिष्ठिरस्य, विदुरस्य, महाभारतस्य च उल्लेखोऽस्ति। पाणिनेः समयः तु ख्रीष्टपूर्वपञ्चमशतिका आसीत्। एवं महाभारतस्य रचनासमयः ततः प्रागेव आसीत्।

६. महाकविभास अपि महाभारतमाधारीकृत्य नाटकादि रचितवान्। भासस्य समय आसीत् ख्री. पूर्व. २०० तः ५०० अब्दपर्यन्तम्। अतैव महाभारतस्य रचना महाकवि भासतः पूर्वमेव अभवत् इति वक्तुं शक्यते।

७. आश्वलायनगृह्यसूत्रे, शांखायनश्रौतसूत्रे, बौधायनधर्मसूत्रे च महाभारतयुद्धस्य वर्णनं समुपलभ्यते। पण्डितानां मतानुसारं कल्पसूत्राणां रचना ख्री. पूर्व. ८०० तः ५०० अब्दस्य मध्ये एव अभवत्। अत एव महाभारतरचनायाः ऊर्ध्वसीमा ख्रीष्टपूर्वदशमशतिका इति वक्तुं शक्यते।

८. सप्तमशतिकायाः गद्यकारः सुबन्धु अपि वासवदत्ताग्रन्थे महाभारतस्य उल्लेखं करोति।

९. सप्तमशतिकायाः दार्शनिकः कुमारिलभट्ट अपि स्वकीये ग्रन्थे महाभारतस्य उल्लेखं करोति।

१०. गद्यकारबाणभट्ट (ख्री. ६५०) अपि कादम्बरीग्रन्थे महाभारतस्य उल्लेखं करोति।

११. ५०० ख्रीष्टाब्दस्य केषुचित् दानपात्रेषु महाभारतस्य उल्लेखो मिलति।

१२. भिन्नपण्डितानां मतानुसारं महाभारतरचनायाः अन्तिमसमयः ख्री. पू. ५०० अब्दः, पुनः केषाञ्चन मतानुसारं ख्री. पू. ३५० तः ३२० अब्दस्य मध्ये।

२.६ महाभारतस्य प्रभावः

भारतीयसाहित्ये महाभारतस्य प्रभावः गुरुत्त्वपूर्णोऽस्ति। महाभारते स्थितानि नीतिवचनानि, धर्मवचनानि च भिन्नरूपेण प्रकाशितानि सन्ति।

श्रीमद्भगवद्गीतायाः, विष्णुसहस्रनामग्रन्थस्य, अनुगीतायाः, भीष्मस्तवराजस्य गजेन्द्रमोक्षस्य च आधारं महाभारतम्। महाभारतमाधारीकृत्य भिन्नमहाकाव्य-काव्य-नाटक-कथासाहित्यादीनि च रचितानि सन्ति। भास-कालिदास-माघ-भट्टनारायण-भारवि-श्रीहर्ष- राजशेखरादयः कवयः महाभारतमाधारिकृत्य भिन्नग्रन्थान् रचितवन्तः।

महाकविभासस्य पञ्चरात्र-दूतकाव्य-दूतघतोत्कच-उरुभंग-कर्णभारादीनि नाटकानि महाभारतमाधारीकृत्यैव रचितानि। एवं महाकविकालिदासस्य 'अभिज्ञानशाकुन्तलम्' नाटकं महाभारतस्य आदिपर्वणः शकुन्तलोपाख्यानम् आधारीकृत्य रचितम्।

भट्टनारायणस्य वेणीसंहारनाटकं महाभारतस्य कथामाधारीकृत्यैव रचितम्। श्रीहर्षस्य नैषधचरितं महाकाव्यं महाभारतस्य नलोपाख्यानमाधारीकृत्य रचितम्। माघस्य शिशुपालवधम् महाकाव्यं महाभारते वर्णितशिशुपालाख्यानम् आधारीकृत्य रचितम् । भारवेः किरातार्जुनीयं महाकाव्यं महाभारते वर्णितस्य शिवस्य अर्जुनस्य च संवादमाधारीकृत्य विरचितम्। त्रिविक्रमभट्टस्य नलचम्पूनामकं चम्पूकाव्यं महाभारतस्य नलोपाख्यानम् अवलम्बनं कृत्वा रचितम्। क्षेमेन्द्रस्य भारतमञ्जरीकाव्यं महाभारतस्य सारांशरूपेण एव विरचितं वर्त्तते। इतोपरि बहवो प्राचीनग्रन्थाः तथा आधुनिकभारतीयभाषासु अपि ग्रन्थकाराः महाभारतम् आधारं कृत्वा भिन्नग्रन्थाः रचितवन्तः।

२.७ रामायणमहाभारतयोःतुलना

रामायण महाभारतग्रन्थाभ्यां भारतीयसभ्यता प्रभावितऽस्ति। ग्रन्थद्वयमेव भारतीयसाहित्यस्य भिन्नयुगद्वयं प्रतिनिधित्वं करोति। अनयोः ग्रन्थद्वयोः तुलना यथा -

१. रामायणस्य रचकोऽस्ति आदिकविवाल्मीकिः। एवं महाभारतग्रन्थस्य ग्रन्थकारोऽस्ति पराशरस्य पुत्रः महर्षिकृष्णद्वैपायणः वेदव्यासः।
२. रामायणस्य मूलविषयोऽस्ति रामरावणयोः युद्धः। पुनः महाभारतस्य प्रधानविषयोऽस्ति कौरवपाण्डवयोः मध्ये युद्धः।
३. रामायणे सप्तकाण्डानि सन्ति। काण्डानि सर्गेषु विभक्तानि सन्ति। एवं महाभारतम् अष्टादशपर्वेषु विभक्तमस्ति, प्रत्येकपर्वणि च अध्यायाः सन्ति।
४. रामायणे २४००० श्लोकाः सन्ति। पुनः महाभारते प्रायः एकलक्षाः श्लोकाः सन्ति।
५. महाभारतस्य रचना रामायणात् परमभवत्। अतैव महाभारतस्य वनपर्वणि रामोपाख्यानस्य वर्णनमुपलभ्यते।
६. रामायणस्य भाषा महाभारतस्य तुलनायाम् अधिकविशुद्धा। चरित्रचित्रणविषये, छन्द-अलंकारविषये, रसप्रयोगविषये रामायणम् उत्कृष्टम्।
७. रामायणे सतीदहनस्य उल्लेखो नास्ति, परन्तु महाभारतेऽस्ति। उदाहरणरूपेण माद्री-इत्यस्याः सतीदहनम्।
८. महाभारतस्य नारी द्रौपदी प्रतिशोधपरायणा, परन्तु रामायणस्य सीता धीरस्वभावयुक्ता।
९. महाभारतस्य युद्धवर्णनायां रामायणात् अधिकबहुलता दृश्यते। किन्तु रामायणे पाषाणखण्डैः

वानराणां राक्षसानां च मध्ये युद्धम् अभवत्।

१०. रामायणस्य समाजः आदर्शस्योपरि प्रतिष्ठित आसीत्, परन्तु महाभारतस्य समाजव्यवस्थायाम् आदर्शस्य स्थानं नास्ति।

११. रामायणस्य नायिकासीतायाः महाभारतस्य नायिकाद्रौपद्याः जन्म अलौकिकरूपेणाभवत्। द्वयोः विवाहोऽपि स्वयम्वरमाध्यमेन अभवत्। रामायणे यथा सिंहासनयोग्यस्य रामस्य वनवासोऽभवत्, तथैव महाभारतेऽपि सिंहासनयोग्यपञ्चपाण्डवानां वनवासोऽभवत्। एवं रूपेण रामायणमहाभारतयोर्मध्ये अधिकं वैसादृश्यमेव दृश्यते।



ज्ञातव्यम्

- जयाख्ये काव्ये ८८०० संख्यकाः श्लोकाः आसन् इति जार्माणसंस्कृतपण्डितमेकडोनेलेन अनुमीयते।
- पर्व इत्यनेन अध्यायं सूच्यते।

२.८ अध्यायस्य असमीयाभाषायां सारांशः

মহাভাৰতৰ ক্ৰমবিকাশ

এতিয়া আপুনি মহাভাৰতৰ ক্ৰমবিকাশৰ বিষয়ে জানিব। মহাভাৰতৰ ৰচনা এটা নিৰ্দিষ্ট সময়ত হোৱা নাই। সেয়ে ইয়াৰ ৰচকো এজন নহয় বুলি ক'ব পাৰি আৰু ইয়াৰ সমাপ্তিও বহু শতাব্দী পিছতহে হয়।

বেদব্যাস কৃষ্ণদ্বৈপায়ণক মহাভাৰতৰ মুখ্য ৰচক হিচাপে ধৰা হয়। তেওঁ চন্দ্ৰবংশীয় প্ৰজাসকলৰ বিষয়ে লিখিবলৈ এই মূল গ্ৰন্থভাগ ৰচনা কৰে। কৌৰৱ আৰু পাণ্ডৱৰ মাজত হোৱা যুদ্ধখনেই এই কাব্য ইতিহাসৰ প্ৰধান উপজীব্য বিষয়বস্তু। ব্যাসদেৱে ৰচনা কৰা মূল কাব্যখনক 'জয়কাব্য' বুলি জনা যায়। সম্ভৱত পাণ্ডৱসকলে কুৰুক্ষেত্ৰ যুদ্ধত জয়লাভ কৰা বাবেই এই কাব্যৰ নাম 'জয়কাব্য' হয়। এই কাব্যখনত 8800 টা মান শ্লোক থকা বুলি পণ্ডিত মেকডোনেলে অনুমান কৰে। মহাভাৰতৰ বিকাশ প্ৰধানকৈ তিনিটা স্তৰত হোৱা বুলি কোৱা হয়। ইয়াৰ ইঙ্গিত মহাভাৰতৰ আদি পৰ্বৰ (প্ৰথম পৰ্বৰ) শ্লোক এটিত পোৱা যায় -

"মন্বাদি ভাৰতং কেচিদাস্তিকাদি তথাপৰে।
তথোপৰিচৰাদন্যে বিপ্ৰাঃ সম্যগধিগম্যতে।।" 1.1.53

বেদব্যাসে তেওঁৰ পাঁচজন শিষ্যৰ অন্যতম বৈশম্পায়ণক মূল 'জয়াখ্য' কাব্য প্ৰথমস্তৰত শিকাইছিল। এই কাব্যত বহুতো আখ্যান বা কাহিনীৰ বৰ্ণনা আছে। দ্বিতীয় স্তৰত বৈশম্পায়ণে পৰিবৰ্ধিত ৰূপত 'ভাৰতাখ্য' গ্ৰন্থ জন্মেজয় পৰীক্ষিতৰ সৰ্পযজ্ঞত আবৃত্তি কৰিছিল। আস্তিক আখ্যানেৰে তেওঁ এই গ্ৰন্থ আৰম্ভ কৰিছিল। তাত শ্লোকৰ সংখ্যা আছিল 24000। তৃতীয় স্তৰত মহাভাৰতাখ্য গ্ৰন্থ সৌতি লোমহৰ্ষণে নৈমিষাৰণ্যৰ সত্ৰযজ্ঞত শৌনকাদি মুনিসকলৰ আগত আবৃত্তি কৰিছিল। ইয়াৰ শ্লোক সংখ্যা হ'ল এশ হাজাৰ বা এক লক্ষ (100,000)। এই কথাৰ

উল্লেখ মহাভাৰতত এনেদৰে পোৱা যায়-

"অস্মিংস্তু মানুষ্যে লোক বৈশম্পায়নোক্তান্।
একং শতসহস্রং তু ময়োক্তং বৈ নিবোধত।।"

সৌতিয়ে আবৃত্তি কৰা মহাভাৰতখন বিশ্বকোষৰ নিচিনা পৰিণত হয়। কাৰণ তাত বিশ্বকোষৰ নিচিনা সকলো কথাই সন্নিবিষ্ট আছে। সেয়েহে ই বৰ্তমান এখন ইতিহাস, পুৰাণ, ধৰ্মশাস্ত্ৰ তথা মহাকাব্যত পৰিণত হৈছে। ভাৰত গ্ৰন্থ বিভিন্ন আখ্যান উপাখ্যানেৰে ভৰপূৰ। কিন্তু শেষত সৌতিয়ে যি কথা শৌনকাদি ঋষিসকলক শুনাইছিল তাত বিভিন্ন আখ্যান উপাখ্যান আৰু শেষত 'হৰিবংশ' অংশ যোগ দিয়ে আৰু ফলত ইয়াৰ আকাৰ বৃহৎ হৈ পৰে। সেইবাবে এই বৃহৎ গ্ৰন্থক 'মহাভাৰত' নামেৰে অভিহিত কৰা হয়।

মহাভাৰতৰ বিষয়বস্তু

মহাভাৰত ওঠৰটা ([18]) পৰ্বত বিভক্ত। প্ৰতিটো পৰ্ব আকৌ কেইবাটাও সৰ্গত। ওঠৰতা [18] পৰ্বৰ নাম পৰ্যায়ক্ৰমে তলত উল্লেখ কৰা হ'ল- 1। আদি, 2। সভা, 3¼ বন, 4। বিৰাট, 5। উদ্যোগ, 6। ভীষ্ম, 7¼ দ্ৰোণ, 8। কৰ্ণ, 9। শল্য, 10। সৌপ্তিক, 11। স্ত্ৰী, 12। শান্তি, 13। অনুশাসন, 14। আশ্বমেধিক, 15। আশ্ৰমবাসিক, 16। মৌষল, 17¼ মহাপ্ৰস্থানিক আৰু 18। স্বৰ্গাৰোহণ পৰ্ব।

আদিপৰ্বত চন্দ্ৰবংশৰ বিস্তৃত ইতিহাস তথা কৌৰৱ পাণ্ডৱসকলৰ বংশ পৰিচয়, জন্ম শৈশৱ, কৈশোৰ, দ্ৰৌপদীৰ স্বয়ম্বৰ, কৃষ্ণৰ আগমণৰ বিৱৰণ পোৱা যায়।

সভাপৰ্বত পাণ্ডৱসকলৰ ইন্দ্ৰপ্ৰস্থত সভাগৃহ নিমাৰ্ণকাৰ্য, যজ্ঞৰ অনুষ্ঠান, দূৰ্যোধনসহ যুধিষ্ঠিৰৰ দ্যূতক্ৰীড়াত যুধিষ্ঠিৰে পণ হিচাপে ৰাজ্য, ধন, অনুজ ভাতৃসকল সহ পত্নী দ্ৰৌপদীকো হেৰুৱায়। ফলত পাণ্ডৱসকলে বাৰবছৰ বনবাস আৰু এবছৰ অজ্ঞাতবাসত থাকিবলৈ বাধ্য হয়।এই সকলোবোৰ বিষয়ৰ সবিশেষ বিৱৰণ এই সভা পৰ্বত পোৱা যায়।

বন পৰ্বত পাণ্ডৱসকলে বাৰ বছৰ কাল কাম্যক নামৰ বনত জীৱন নিৰ্বাহ কৰে।

বিৰাট পৰ্বত মৎস্যৰাজ বিৰাটৰ ৰাজপ্ৰাসাদত পাণ্ডৱসকলে এবছৰ সময় কটোৱাৰ বিৱৰণ আছে। এই পৰ্বতেই পঞ্চপাণ্ডৱ আৰু দ্ৰৌপদীয়ে ৰাজভৃত্যৰূপে ছদ্মবেশ ধৰি উপনাম লৈ বিৰাট ৰজাৰ ৰাজপ্ৰসাদত এবছৰ কাল কটায়।

উদ্যোগ পৰ্বত কুৰুক্ষেত্ৰ যুদ্ধৰ আয়োজনৰ কথা বৰ্ণনা আছে। দুৰ্যোধনে কুশাগ্ৰ পৰিমাণৰ ভূমিও বিনাযুদ্ধে যুধিষ্ঠিৰক এৰি দিবলৈ অস্বীকাৰ কৰে। এই পৰ্বটোৰ বিষয়বস্তু হৈছে পাঞ্চালৰাজ দ্ৰুপদ, মৎস্যৰাজ বিৰাট আৰু বায়ে সাত্যকি প্ৰভৃতিৰ কথা মতে পাণ্ডৱসকলে নিজ ৰাজ্য উদ্ধাৰাৰ্থে কৌৰৱসকলৰ সৈতে যুদ্ধ কৰিবলৈ কৰা আয়োজন।

ভীষ্ম, দ্ৰোণ, কৰ্ণ, শল্য আৰু সৌপ্তিক পৰ্বতকুৰুক্ষেত্ৰ যুদ্ধৰ সবিশেষ বিৱৰণ পোৱা যায়। ওঠৰদিনীয়া এই যুদ্ধত ভাগ লোৱা দুই দলৰ মুঠ ওঠৰ অক্ষৌহিনী (পাণ্ডৱৰ সাত অক্ষৌহিনী আৰু কৌৰৱৰ এঘাৰ অক্ষৌহিনী সৈন্য আৰু পঞ্চপাণ্ডৱ, কৃষ্ণ, সাত্যকি পাণ্ডৱপক্ষৰ), কৃপাচাৰ্য্য, অশ্বত্থামা আৰু কৃতবৰ্মাৰ (কৌৰৱপক্ষৰ) বাহিৰে সকলো লোক যুদ্ধত নিহত হয়।

স্ত্রী পর্বত যুদ্ধত নিহত লোকসকলৰ শেষকৃত্যৰ বর্ণনা আছে।

শান্তি পর্ব আৰু অনুশাসন পর্বশৰশয্যাত শয়ন কৰি থকা ভীষ্মই যুধিষ্ঠিৰক ৰাজনীতি, সমাজনীতি, বর্ণাশ্রম ধর্ম, ধমার্থ কামমোক্ষ চতুর্বর্গ, বৈষ্ণৱ— শৈৱাদি পন্থাৰ বিষয়ে বিৱৰণ পোৱা যায়।

গৰুড় পুৰাণৰ বৰ্ণনা ভগৱান বিষ্ণুয়ে গৰুড়পক্ষীক শুনাইছিল। এই পুৰাণটো দুটা ভাগত বিভক্ত। প্ৰথম ভাগত ভগৱান বিষ্ণুৰ মহিমা, ৰত্ন পৰীক্ষা, ৰাজনীতি, আয়ুৰ্বেদ, পশুচিকিৎসা, ছন্দশাস্ত্ৰ, সংখ্যা-যোগ আৰু গীতাৰ সাৰাংশৰ বৰ্ণনা আছে। দ্বিতীয় খণ্ড প্ৰেতকল্প নামে চিহ্নিত, য'ত জীৱৰ অৱস্থা, নৰক আৰু অন্যান্য বিষয় আলোচনা কৰা হৈছে।

কুৰ্মপুৰাণ ঃ

কুৰ্মপুৰাণত ভগৱান বিষ্ণুৰ কুৰ্মৰূপী অৱতাৰৰ কাহিনী বৰ্ণিত হৈছে। এই পুৰাণটোও দুটা ভাগত বিভক্ত। পূৰ্বভাগত মহাৱৰাহৰ দ্বাৰা পৃথিবী উদ্ধাৰ, দক্ষৰ যজ্ঞ আৰু বামনাৱতাৰ বিষয়ে আলোচনা কৰা হৈছে। উত্তৰভাগত নানা তীৰ্থস্থান আৰু দাৰ্শনিক তত্ত্বৰ বিষয়ে বৰ্ণনা কৰা হৈছে।

এইবোৰ পুৰাণৰ মাধ্যমে আপুনি পুৰাণৰ ঐতিহাসিক আৰু ধৰ্মীয় বিষয়সমূহৰ বিষয়ে বিস্তাৰিত আৰু সুস্পষ্ট তথ্য লাভ কৰিব পাৰিব।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: ''पुराणम्'' इति शब्दः किमर्थं दर्शयति ?

.....

प्रश्नः २: वेदव्यासः अन्य केन नाम्ना विख्यातः ?

.....

प्रश्नः ३: वेदव्यासः पुराणस्य ज्ञानं कस्मै प्रदत्तवान् ?

.....

प्रश्नः ४: विषयवस्तु दृष्ट्या पुराणसाहित्यं कथं विभक्तुं शक्यते ?

.....

प्रश्नः ५: ''गाथा'' इति कथं व्याख्यायते ?

.....

प्रश्नः ६: आख्यानं किम् ?

.....

प्रश्नः ७: गुणानुसारं पुराणानि केषु भागेषु विभक्तानि ?

.....

प्रश्नः ८: शैवसंप्रदायेन सम्बद्धानि पुराणानि कानि ?

.....

प्रश्नः ९: कं पुराणं आकारदृष्ट्या बृहत्तमं कथ्यते ?

.....



३.९ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- ''पुराण'' इत्यस्य अर्थं तथा तस्य उत्पत्तिं ज्ञातवन्तः।
- पुराणस्य रचयिता तथा रचनाकालविषये ज्ञातवन्तः।
- पुराणस्य विषयवस्तुं तथा लक्षणानि ज्ञातवन्तः।
- महापुराणानां तथा च उपपुराणानां च नामानि ज्ञातवन्तः।
- विभिन्नमहापुराणानां सारांशं ज्ञातवन्तः।
- पुराणसाहित्यस्य प्रभावः अन्येषु क्षेत्रेषु कथं दृश्यते इति ज्ञातवन्तः।



३.१० ज्ञानाधिक्यम्

१) डा., शर्मा, ऋषि, उमाशङ्कर (२०२१): संस्कृत साहित्य का इतिहास; चौखम्भा भारती अकादमी, वाराणसी।

२) গোস্বামী, হৰমোহন দেৰ [1992]) সংস্কৃত সাহিত্যৰ বুৰঞ্জী; গুৱাহাটী, বুকলেণ্ড।

३) ভাগৱতী, কামাখ্যাচৰণ [2003] সংস্কৃত সাহিত্যৰ জিলিঙনি; গুৱাহাটী, গ্ৰন্থপীঠ।

४) Keith, A. B. (1973): A History of Sanskrit Literature, Delhi: Oxford UP.

५) Krishnamacharior (2004) : History of Classical Sanskrit Literature; Delhi: Motilal Banarsidass Publishers Pvt. Ltd.

६) Radhakrishnan, C. S. (2005) : Kalidasa New Perspective; Delhi : New Bharatiya Book Corporation.



३.११ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : पुराणशब्दस्य सामान्यः अर्थः अस्ति – प्राचीनाख्यानम्।

प्रश्नः २ उत्तरम् : कृष्णद्वैपायनः।

प्रश्नः ३ उत्तरम् : लोमहर्षणः।

प्रश्नः ४ उत्तरम् : चतुर्धा विभक्तम्।

प्रश्नः ५ उत्तरम् : पुराणे इतिहाससाहित्ये च कश्चन अज्ञातकर्तृकाणां बहूनां पद्यानां पाठः प्राप्यते। एतादृशं लेखं गाथा इत्युच्यते।

प्रश्नः ६ उत्तरम् : वक्ता वा रचनाकारः स्वयमेव प्रत्यक्षीकृतं यदपि किञ्चन घटनां वर्णयति तदाख्यानम् इत्युच्यते।

प्रश्नः ७ उत्तरम् : त्रिषु भागेषु विभक्तम्।

प्रश्नः ८ उत्तरम् : शिवपुराणम्, लिङ्गपुराणम्, स्कन्दपुराणम्, मत्स्यपुराणम्, कुर्मपुराणञ्च।

प्रश्नः ९ उत्तरम् : स्कन्दपुराणम्।



३.१२ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: महापुराणानां उपपुराणानां च संख्या कति ?

प्रश्नः २: पुराणसाहित्यस्य विशेषत्त्वं किम् ?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

१. ब्रह्मपुराणम्
२. पद्मपुराणम्
३. स्कन्दपुराणम्
४. भागवत्पुराणम्

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

१. पुराणसाहित्यमधिकृत्य एको निबन्धो लिखन्तु।
२. महापुराणानां विषये एको निबन्धो लिखन्तु।

*** ***** ***

अध्यायः ४ : महाकाव्यम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

४.१ उद्देश्यम्

४.२ परिचयः

४.३ प्राक्कालिदासीय महाकवयः महाकाव्यानि च

- ४.३.१ बुद्धचरितम्
- ४.३.२ सौन्दरानन्दम्

४.४ कालिदासयुगीय महाकवयः महाकाव्यानि च।

- ४.४.१ कुमारसम्भवम्
- ४.४.२ रघुवंशम्
- ४.४.३ सेतुबन्धः
- ४.४.४ जानकीहरणम्

४.५ कालिदासोत्तरयुगीय महाकवयः महाकाव्यानि च।

- ४.५.१ किरातार्जुनीयम्
- ४.५.२ रावणवधम्
- ४.५.३ शिशुपालवधम्
- ४.५.४ नैषधचरितम्

४.६ अध्यायस्य असमीयाभाषायां संक्षिप्तविवरणम्

४.७ अध्यायात् किमवगतम्

४.८ ज्ञानाधिक्यम्

४.९ अग्रगत्याः निरूपणम्

४.१० अभ्यासप्रश्नाः

४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- प्राक्कालिदासीय-कालिदासीय-कालिदासोत्तरयुगीयमहाकाव्यानां विषये ज्ञातुं शक्नुवन्ति।
- महाकाव्यानां परिचय-विषयवस्तु - इत्यादीनां विषये ज्ञातुं शक्नुवन्ति।
- महाकविभिः सह ग्रन्थानां परिचयात्मकं ज्ञानं लब्धुं शक्नुवन्ति।

४.२ परिचयः

संस्कृतकाव्यसाहित्यं प्रधानतः भागद्वये विभक्तमस्ति- १. दृश्यकाव्यम् २. श्रव्यकाव्यं च। यत्र अभिनयेन रसास्वादनं भवति तद् दृश्यकाव्यम्। यत्र श्रवणमात्रं भवति तद् श्रव्यकाव्यम्।

एतयो अपि भागाः सन्ति –नाटकम्, रूपकं च दृश्यकाव्यम्, तथा च गद्यं पद्यं च श्रव्यकाव्यम्। गद्यकाव्यस्य भागद्वयं वर्तते – कथा आख्यायिका च। पद्यकाव्यस्य भागत्रयमस्ति – १. महाकाव्यम् २. खण्डकाव्यम् ३. मिश्रकाव्यं चम्पूकाव्यं वा। एतेषु महाकाव्यं श्रव्यकाव्यस्य अन्तर्गतमिति मन्यते।

कालिदासस्य प्राक्कालीयं महाकाव्यं तावत् महाकविना अश्वघोषेण विरचितं बुद्धचरितं सौन्दरानन्दं च महाकाव्यद्वयम् इति मन्यते। तत्पश्चात् कालिदासेन विरचितं रघुवंशं कुमारसम्भवं च महाकाव्यद्वयम् उल्लेखनीयम्। पुनश्च समकालिकेन प्रवरसेनेन विरचितं 'सेतुबन्धमहाकाव्यम्', कुमारदासप्रणीतं 'जानकीहरणम्' महाकाव्यम् समुल्लेखनीयम्। एतदनन्तरं भारविप्रणीतं किरातार्जुनीयम्, भट्टिप्रणीतं 'रावणवधमहाकाव्यम्' माघप्रणीतं 'शिशुपालवधम्' श्रीहर्षरचितं च 'नैषधचरितम्' इत्यादीनि महाकाव्यानि।

४.३ प्राक्कालिदासीय महाकवयः महाकाव्यानि च

कालिदासाद् प्राक्कालस्य कविषु अन्यतममस्ति बौद्धकवि अश्वघोषः। सः अयोध्यानिवासी ब्राह्मण एक आसीत्। बौद्धधर्मणि दीक्षित इति विभूषितादनन्तरमेव अश्वघोषः इति नामाकरणं प्राप्तम्। तस्य समयः ख्रीष्टिया प्रथमशताब्दी इति मन्यते। अश्वघोषस्य कवित्वप्रतिभा अतुलनीया आसीत्। असौ क्रमशः कविः, अभिनेता, गवेषकः, गायकः, दार्शनिकः धार्मिकश्च आसीत्। अश्वघोषस्य दर्शनविषयका अन्यविषयकाश्च ग्रन्थाः चीन–तिब्बतीभाषासु संरक्षिताः सन्ति। सः केवलं महाराज्ञः कणिष्कस्य राजकविरेव नासीत्, राजगुरूरपि आसीत्। युवसमये एव अश्वघोषः महाकविरूपेण स्वीकृतिः समलङ्कृता। चीना–परिव्राजक– ह्यूयेनचाङ्मतानुसारम् अश्वघोषेण बौद्धदर्शनाधारिताः चत्वारो ग्रन्थाः विरचिताः। ते: यथा –

१. महायानश्रद्धोत्पादनसंग्रहः
२. वज्रसूची
३. गण्डीस्तोत्रव्याख्या
४. सूत्रालङ्कारः

एतदुपरि सः महाकाव्यद्वयं विरचितवान्। तद्यथा–

१. बुद्धचरितम्
२. सौन्दरानन्दम्।

तदनन्तरं च 'बुद्धचरितम्' तिब्बतीभाषायामपि अनुदितं कृतम्।



ज्ञातव्यम्

उक्तमस्ति यत् तस्य जन्मसमये अश्वाः कोलाहलं ध्वनिः वा कृतवन्त इति कारणत् अश्वघोषो नाम जातः। प्रवादानुसारं तस्य मुखनिसृत मधुरधर्मवाणीं श्रुत्वा अश्वाः सानन्देन ध्वनिः कृतवन्त इति कारणात्

अश्वघोषः इति नामाकरणं प्राप्तम्। तस्य पितुर्नाम नैव उपलभ्यते। मातुः नाम सुवर्णाक्षी आसीत्। बौद्धसन्यासिपार्श्वेन सह विवादे पराजितत्त्वात् सः तस्यैव शिष्यत्वमग्रहीत्। सम्राट्कनिष्कः अश्वघोषस्य समीपे एवं शिष्यत्वं गृहीतवान्। जीवनान्तपर्यन्तम् असौ गान्धारे एव आसीत् इति श्रूयते।


४.३.१ बुद्धचरितम्

अश्वघोषविरचितं 'बुद्धचरितम्' अष्टादश (१८) सर्गेषु विभक्तं महाकाव्यमस्ति। महाकाव्येऽस्मिन् गौतमबुद्धस्य जीवनवृत्तान्तं वर्णितमस्ति। तथा च तस्य उपदेश-सिद्धान्तानामपि वर्णनमस्ति। परन्तु, सम्प्रति १७ सर्गाः एव उपलभ्यन्ते। अस्य अन्तिमाः चत्वारः सर्गाः नवमशताब्दीमध्ये अमृतानन्दः संयोगं कृतवान्। तत्र प्रथमात् पञ्चमसर्गपर्यन्तं बुद्धजन्मन आरभ्य अभिनिष्क्रमणपर्यन्तं कथायाः वर्णनमस्ति। षष्ठे सप्तमे सर्गे बुद्धस्य तपोवनप्रवेशः वर्णितोऽस्ति, अष्टमसर्गः बुद्धस्य गृहत्यागः तथा च पत्न्याः यशोधरायाः विलाप-वृत्तान्तं वर्णितमस्ति। तथैव नवमसर्गे बुद्धान्वेषणवृत्तान्तं वर्णितमस्ति। दशमसर्गे बुद्धस्य बुद्धत्वप्राप्ति ततः मगधयात्रायाः वर्णनमस्ति। एकादशतः त्रयोदशसर्गपर्यन्तं सांसारिकमायामोहविरुद्धा घटना निरूपिता। चतुर्दशसर्गे सम्पूर्णा बुद्धत्वप्राप्तिः आलोचिता। अन्तिमसर्गेषु बौद्धधर्मप्रचारः, बौद्धशिक्षा, उपदेशः, सम्राट्-अशोककालपर्यन्तं बौद्धधर्मप्रचलनकथा वर्णिता। 'धर्मरक्षः' नामकः कश्चन बौद्धभिक्षुः बुद्धचरितं ४१४-४२१ श्रीष्टाब्दे चीनभाषायाम् अनुवादं कृतवान्।

४.३.२ सौन्दरानन्दम्

'सौन्दरानन्दमहाकाव्यम्' अश्वघोषेण रचितं सर्वप्रथमं महाकाव्यम्। महाकाव्येऽस्मिन् अष्टादशाध्यायाः सन्ति। अत्र विषयवस्तुरूपेण बुद्धदेवस्य जीवनवृत्तान्तं तथा च तस्य वैमात्रेयभ्रातुः नन्दस्य बौद्धधर्मग्रहणम् एवञ्च सुन्दरी-नन्दयोः प्रणयकथा वर्णितमस्ति। महाकाव्यस्य प्रभमत्रिषु सर्गेषु सिद्धार्थस्य (बुद्धस्य) जन्मन बुद्धत्वप्राप्तिपर्यन्तं तथा च कपिलावस्तुपर्यन्तं प्रत्यागमनघटना वर्णिता। चतुर्थे सर्गे च सुन्दरी-नन्दयोः विवाहपर्वणः वर्णनमस्ति। नवविवाहितानां च प्रेमकथा नन्दगृहमुखात् बुद्धस्य प्रत्यावर्तनं वर्णितम्। पञ्चमसर्गे च नन्दानुशोषणं बुद्धस्य पार्श्वगमनञ्च वर्णितम्। सहैव नन्दस्य बौद्धधर्मदीक्षाग्रहणं समुपवर्णितम्। षष्ठे सर्गे च भर्तुः विरहात् पत्नीविलापवृत्तान्तं, सप्तमे सुन्दरी- नन्दयोः प्रेमासक्तिः वर्णितास्ति। अष्टमे नवमे च सर्गे कश्चन सहयोगी नन्दं प्रति उपदेशवाणीम् उपस्थापयति। दशमे एकादशतमे सर्गे च प्रियाप्रेमविच्छेदार्थं बुद्धो योगमार्गेन नन्दं अप्सराभिः सह मेलयति। ताः दृष्ट्वा तस्य प्रियाविरहदुःखम् अपगच्छति। द्वादशतमे सर्गे अप्सराभिः सह प्रेमसम्बन्धस्थापनाय या तपस्या कृता तन्निन्दा एव जाता। तत्पश्चात् नन्दः बुद्धत्वमिच्छति। सर्वं परित्यज्य सः बुद्धं शरणमिच्छति। त्रयोदशसर्गादारभ्य

षोडशसर्गपर्यन्तं नन्दं प्रति उपदेशः, जीवनस्य परं सत्यज्ञानस्य वर्णनं निरूपितम्। सप्तदशे अष्टादशसर्गे च सहयोगी परं शान्त्यर्थं नन्दस्य तपस्या तथा समाधिस्थस्वरूपवर्णनं प्राप्यते। अस्य ग्रन्थस्य रचनायाः प्रधानमुद्देश्यं बौद्धधर्मप्रचारो वर्तते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: पद्यकाव्यं कति भागेषु विभक्तम्?

.....

प्रश्नः २: अश्वघोषस्य महाकाव्यद्वयं किं किम्?

.....

प्रश्नः ३: अश्वघोषः कुत्र निवसति?

.....

प्रश्नः ४: 'बुद्धचरितम्' महाकाव्यं कति सर्गेषु विभक्तम्।

.....

प्रश्नः ५: 'सौन्दरानन्दम्' महाकाव्यं कति अध्यायेषु विभक्तम्?

(क) १८

(ख) २२

(ग) १५

४.४ कालिदासयुगीय महाकवयः महाकाव्यानि च

महाकविः कालिदासः भारतीयविद्वत्समाजे 'कविकुलगुरुः' इत्युपाधिना विभूषितः। पाश्चात्यपण्डितेन विलियाम जॉन्समहोदयेन कालिदासस्य 'अभिज्ञानशाकुन्तलम्'नाटकस्य नाटकीयसौन्दर्यात् मुग्धः सन् कालिदासः भारतवर्षस्य 'शेक्सपीयर' उपाधिद्वारा सम्मानितः। वर्तमानं यावत् कालिदासस्य जन्मसमयः जीवनी च स्पष्टतया नैव ज्ञायते। केषाञ्चित् मतानुसारं काश्मीरः तस्य जन्मभूमिः, अन्यच्च विदिशा नगरी, अन्यच्च केषाञ्चित्मतानुसारं तु उज्जयिनी वर्तते। परन्तु सर्वग्राह्यं मतं तु उज्जयिनी एव तस्य जन्मभूमिरिति। सर्वाधिकग्रहणात् तस्य जन्मसमयः तावत् खीष्टपूर्वं प्रथमशताब्दी इति मन्यते। यद्वा तद्वा भवतु महाकविकालिदासः एको विदग्धपण्डितोऽस्ति। असौ वेद-वेदान्त-वेदाङ्ग-धर्मशास्त्र-रामायण-महाभारत-पुराण-नीति-शास्त्र-व्याकरण-आयुर्वेद-ज्योतिष-दर्शनशास्त्र-चित्रकला-वास्तुकला-आदिसर्वशास्त्रेषु निष्णात आसीत्। महाकविकालिदासस्य सप्त मूलरचनाः सन्ति। तद्यथा - १. कुमारसम्भवम् २. ऋतुसंहारम् ३. मालविकाग्निमित्रम् ४. विक्रमोर्वशीयम् ५. मेघदूतम् ६. अभिज्ञानशाकुन्तलम् ७. रघुवंशम्। एतेषु 'ऋतुसंहारम्' 'मेघदूतम्' च खण्डकाव्यम्; 'रघुवंशम्' 'कुमारसम्भवम्' च महाकाव्यम्, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्' 'अभिज्ञानशाकुन्तलम्' च नाटकत्रयम् अस्ति।



ज्ञातव्यम्

शेक्सपीयरः - शेक्सपीयर एकः सुविख्यातः आङ्ग्लकविः नाट्यकारश्च। तेन विरचितानि चत्वारि नाटकानि अथेलो, मेकवेथ, किङ्गलीयर, हेलमेट च। अस्यापि समयः ज्ञातुं न शक्यते। तथापि १५६४-१६१६ शतिका इति मन्यते।

ब्राहमणकुलोत्पन्ने सति असौ कालिदासः गोसेवाद्वारा स्वकीयजीवनं चालयति स्म। घटनाक्रमेण अस्य विदुषीराजकन्यया सह विवाहः जातः। अज्ञानवशात् सः नवविवाहितभार्यायाः समक्षं लज्जां प्राप्य देवीकालिकायाः उपासनारत आसीत्। एवम् एकदा देव्याः आशीर्वादेन प्रबुद्धाः सन्तः काव्यप्रतिभावन्तः सन्तः गृहं प्रत्यागच्छन्। स्वगृहमागमनात्परं पत्नी कालिदासं प्रश्नं पृष्टवती - ''अस्ति कश्चिद् वाग्विशेषः ?'' इति। तदानीमेव प्रश्नस्य प्रत्येकं शब्दमाधारिकृत्य कालिदासेन एकैकं काव्यं विरचितवान्। 'अस्ति' इति शब्देन 'कुमारसम्भवम्' महाकाव्यम् (अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयः), 'कश्चित्' शब्देन 'मेघदूतम्' खण्डकाव्यम् (कश्चित्कान्ताविरहगुरुणा), 'वाग्' शब्देन 'रघुवंशम्' महाकाव्यम् (वागार्थाविव सम्पृक्तौ), 'विशेषः' इति च पदेन 'ऋतुसंहारम्' खण्डकाव्यं विरचितम् (विशेषः सूर्यः स्पृहणीयः चन्द्रमा)।

कालिदासस्य समसामयिककविषु प्रवरसेनः अन्यतमः। प्रवरसेनः सेतुबन्धमहाकाव्यं रचितवान्। अस्य समयः ४२०-५० ख्रीष्टाब्दः इति मन्यते।

कालिदासस्य समकालिककविषु प्रतिभावान् कविः कुमारदासः। कुमारदासस्य वक्तिगतजीवनविषये स्पष्टतया न ज्ञायते। तेन प्रणीतं महाकाव्यमस्ति 'जानकीहरणम्'। काव्यस्य अस्य अन्तिमश्लोकात् ज्ञायते यत्, कुमारदासः राज्ञः कुमारमानस्य पुत्रः आसीत्। उच्चते यत् कुमारमानस्य युद्धक्षेत्रे मरणसमये एव कुमारदासस्य जन्म अभूत्। श्रूयते यत् सः सिंहलस्य राजा आसीत् एवञ्च महाकवेः कालिदासस्य परं मित्रमासीत्।

४.४.१ कुमारसम्भवम्

महाकविकालिदासेन महाकाव्यद्वयं विरचितम् - 'कुमारसम्भवम्' 'रघुवंशम्' च। एतयोः 'कुमारसम्भवम्' एव प्राचीनमिति मन्यते। परम्परानुसारं काव्येऽस्मिन् द्वाविंशतिः (२२) सर्गाः मन्यते, परन्तु सम्प्रति 'कुमारसम्भवम्' महाकाव्ये सप्तदश (१७) सर्गाः एव सन्ति इति सर्वजनसिद्धम् अस्तीति। प्रथमादारभ्य दशमसर्गपर्यन्तं सर्गाः निश्चितरूपेण कालिदासस्य स्वकीयाः रचनाः इति स्वीक्रियन्ते परन्तु एकादशतः अन्तिमपर्यन्तेषु सर्गेषु कालिदासस्य नाम अस्ति न वा इत्यत्र सन्देहः परिलक्ष्यते। कुमारसम्भवमहाकाव्यस्य प्रथमसर्गे हिमालयस्य प्राकृतिकसौन्दर्यं पार्वत्याः सौन्दर्यवर्णनं च उपलभ्यते। द्वितीयसर्गे परब्रह्मणः तारकासुरात्याचारं च वर्णितमस्ति। तृतीयसर्गे

वसन्तकालस्य शिव-पार्वत्योः च वर्णनमुपलभ्यते। चतुर्थे सर्गे कामदेवेन दाहणात् (शिवेन भस्मीभूतः सन्) कामदेवस्य पत्नीविलापः वर्णितम्। पञ्चमे हिमालयकन्यायाः पार्वत्याः शिवं पतिरूपेण प्राप्तुं तपस्या, शिवेन तस्याः भक्तिपरीक्षा; पार्वत्याः जयप्राप्तिघोषणा च सम्यक् वर्णिता। षष्ठे सर्गे च शिवेन स्वभार्यारूपेण पार्वतीं प्रति स्वेच्छा निवेदनाय सप्तर्षिः पार्वतीपितृहिमालयपार्श्वं प्रेषणं वर्णितम्। सप्तमसर्गे शिवपार्वत्याः विवाहवर्णनम्, अष्टमे च शिव-पार्वत्योः सम्भोगवृत्तान्तम् उल्लिखितम्। नवमसर्गात् विषयाः तावत् शिव-पार्वत्योः विवाहानन्तरं द्वयोः शतं ऋतुः यावत् जीवनातिवाहिताकारणात् देवाः क्रोधिताः जायमानाः। तदानीं देवाः तयोः वृत्तान्तं ज्ञातुं अग्निं कपोतरूपं विधाय प्रेषयति। अग्नेः आगमनेन शिवः क्रोधान्वितो जातः। पुनः अग्निः अवदत् यत् सः देवानाम् अनुरोधेन तत्रागतवान् इति। तदा शिवः सन्तुष्टः जातः; स्वकीयं रक्तकणं अग्नौ निक्षिप्तवान्। अग्निः रक्तकणं ग्रहितुम् असमर्थः सन् देवराजाधिराजमिन्द्रम् आहूतवान्। पुनश्च इन्द्रः तत् रक्तकणम् आकाशीगङ्गायां निक्षिप्तवान्। तथा कृते कृतिकाराः गर्भावस्थाः प्राप्ताः। ताः अपि गुरुभारं वहने असमर्थाः इति कारणेन वेतसवनं त्यजन्ति। तदानीम् आकाशमार्गेण गमनवेलायां शिवपार्वती शिशुमेकं अपश्यतम्। शिवः तस्यैव पुत्र इति ज्ञात्वा तं तस्मात् आनीतवान्। सः देवशिशुः षष्ठदिनाभ्यन्तरे एव सर्वशास्त्रपारङ्गतो जातः। शिवस्य तस्य पुत्रस्य नामाकरणं कार्तिकेय नाम्ना कृतम्। इन्द्रादिदेवानामनुरोधेन सः 'देवसेनापतिः' भूत्वा तारकासुरं च हन्ति। तस्मात् इन्द्रादिदेवाः सुरक्षिताः जायन्ते। कुमारकार्तिकेयस्य जन्म तारकासुरवधश्च अस्य मूलं विषयवस्तु।

४.४.२ रघुवंशम्

अस्मिन् क्रमे भवन्तो 'रघुवंशम्' इति महाकाव्यस्य संक्षेपं परिचयं ज्ञातुम् अर्हन्ति। 'रघुवंशम्' इति महाकाव्यं महाकविकालिदासस्य उत्कृष्टं महाकाव्यम्। अस्मिन् महाकाव्ये ऊणविंशतिः (१९) सर्गाः सन्ति, श्लोकाश्च १५६९ सङ्ख्यकाः सन्ति। अत्र रघुवंशीयराजादिलीपादारभ्य अग्निवर्णपर्यन्तम् ऊणत्रिंशत् राज्ञां वर्णनं प्राप्यते। काव्यमिदं वागर्थरूपाय परमेश्वरपार्वतीवन्दनया प्रारभ्यते।

प्रथमसर्गस्य प्रारम्भे कविना रघुवंशीयराज्ञां गुणा उल्लिख्यन्ते। तेषां राज्ञां गुणेभ्यः प्रभावितः सन् महाकविः कालिदासः 'रघुवंशम्' इति महाकाव्यं रचयितुम् अनुप्रेरित अभवत्। सर्गेऽस्मिन् कालिदासो राज्ञः दिलीपस्य गुणानुकीर्तनं कृतवान्। दिलीपस्य पुत्री सुदक्षिणा निःसन्तानासीत्। अतोहि कुलस्य आधमे तत् दुःखं व्यक्तं कृतवन्तौ। तदा ऋषिः वशिष्ठः राजानं कामधेनुपुत्रीं नन्दिनीं सेवयेत् इति उपदिष्टवान्। एवं प्रकारेण राजा राज्ञी च नन्दिनीसेवायां संलग्नम् अभवताम्।

द्वितीये दिलीपसुदक्षिणयोः गोसेवाव्रतं वर्णितम्।

तृतीयसर्गे रघोः जन्म-संस्कारानुष्ठान-विद्याप्राप्त्यादयः दिलीपस्य

अश्वमेधयज्ञानुष्ठानम्, इन्द्रेण अश्वापहरणहेतुः रघोः इन्द्रस्योपरि आक्रमणम्, इन्द्रस्य आशीर्वादस्तथा रघोः राज्याभिषेकं वर्णितमस्ति। दिलीपस्य वानप्रस्थधर्म-पालनार्थं वनं प्रति गमनं वर्णितमस्ति।

चतुर्थे रघोः राज्याभिषेकः सुदक्षिण्या सह राज्ञः दिलीपस्य तपोवनं गमनम्।

पञ्चमे रघोः दानशीलतायाः वर्णनमस्ति।

षष्ठे सप्तमे च इन्दुमतीस्वयम्बरवृत्तान्तं रघुपुत्रेण अजेन इन्दुमत्याः विवाहः वर्णितः।

अष्टमे सर्गे रघुः वानप्रस्थाश्रमे प्रवेशं करोति। एवं केषाञ्चित् दिनानामनन्तरं रघोः मृत्युरभवत्। अजो रघोः शेषकृत्यानि उपयुक्तरूपेण सम्पादितवान्। यथासमये अज-इन्दुमत्योः पुत्रो दशरथ अजायत। एकस्मिन् दिवसे प्रमोदोद्याने अज इन्दुमती च विहारं कुर्वन् आस्ताम्, तस्मिन् समये इन्दुमत्याः शरीरे एका माला अपतत्। एवं तया राज्ञी मृता जाता। अनया घटनया राज्ञो मनसि अतीव दुःखं जातम्। राज्ञो दुःखं न्यूनीकर्तुं वशिष्ठमुनि एकं शिष्यं प्रेषितवान्। सः शिष्य अकथयत् यत् इन्दुमती शापयुक्ता आसीत्। तया मालया इन्दुमती शापमुक्ता जाता। यतोहि, जन्ममात्रमेव मृत्युरपि अनिवार्यम्, अत अजस्य कृते एवं शोकयुक्तं स्वभावं समीचिनं नास्ति। एवं यद्यपि अजः साधारणं जीवनं यापितवान् तथापि तत् दुःखं तस्य मनसि सर्वदा खेदमुत्पादयति। अष्टवर्षात्परम् अजस्यापि मृत्युरजायत।

नवमे सर्गे राज्ञः दशरथस्य राजशासनव्यावस्थायाः वर्णनम्। दशरथः मृगयावेलायां दैववशात् श्रवणकुमारवधं कृतवान् तदपि अत्र आलोचितम्। नवमात् पञ्चदशपर्यन्तं दशरथपुत्रस्य रामस्य वर्णनम् उपलभ्यन्ते। षोडशे रामपुत्रस्य कुशस्य राजशासनं वर्णितम्। सप्तदशे कुशपुत्रस्य अतिथेः चरित्रं वर्णितम्। अष्टादशे सुदर्शनेन साकं एकविंशतिरघुवंशीयराज्ञाम् उल्लेखो वर्तते। ऊणविंशे सुदर्शनपुत्रस्य राज्ञः अग्निवर्णस्य वर्णनम् तेषां मृत्युः च वर्णितम् अस्ति।

४.४.३ सेतुबन्धः


'सेतुबन्धः' महाकाव्यमिदं प्रवरसेनेन विरचितम्। काव्यमिदं पञ्चदशसर्गेषु विभक्तमस्ति। काव्येऽस्मिन् हनुमतः समुद्रलङ्घनेन सीतासन्देशेन साकं रावणवधपर्यन्तं सर्वं वर्णितमस्ति। सेतुबन्धनं सेतुनिर्माणं वा अस्य मूलं विषयवस्तु वर्तते। तत्र च प्रथमर्गे शरद्-ऋतुवर्णनम्, सुग्रीवस्य रामेण साकं वानरसैन्यैः सह समुद्रतीरगमनम्, सीतोद्धारस्य सर्वं वर्णनमुपलभ्यते। द्वितीयसर्गे समुद्रतरङ्गैः भय- भीतानां वानराणां वर्णनं निरूपितम्। तृतीयसर्गे सुग्रीवानुयायीनां पुरतः लङ्कागमने प्रोत्साहयितुं सुग्रीवेन प्रदत्तम् उदात्तं भाषणं वर्णितम्। चतुर्थे सर्गे सुग्रीवेन वानराः लङ्कागमनाय उत्सुकाः सन्ति। पञ्चमे सर्गे रामेण समुद्रलङ्घणे समुद्रस्य सहायता अपेक्ष्यते। परन्तु समुद्रः तन्निराकरोति। षष्ठसर्गे रामबाणेन

क्षतसमुद्रः रामेन स्वपत्न्या गङ्गया सह मेलयति। तदानीमेव रामं सेतुनिर्माणाय परामर्शं प्रददाति।

सप्तमे अष्टमे च सर्गे सेतुबन्धनं लङ्काप्रवेशघटना वर्णिता। नवमे सर्गे वानरसेनानां सुवेलपर्वतारोहणं प्राकृतिकसौन्दर्यं च सम्यग्विवेचितम्। दशमसर्गे लङ्कायाः सान्ध्याकालजीवनचित्रणं वर्णितमस्ति। एकादशतमे सर्गे लङ्काधिपतिरावणः सीतायाः मनः जेतुं प्रयत्नरतो वर्तते। द्वादशात् चतुर्दशसर्गपर्यन्तं लङ्कायुद्धं विस्तृतरूपेण वर्णितम्। पञ्चदशसर्गे युद्धे रावणभ्रातुः कुम्भकर्णवधः मेघनादवधश्च वर्णितोऽस्ति। युद्धे रामेण रावणः हतः, रामस्य अयोध्या प्रत्यागमनघटना वर्णिता इत्येव महाकाव्यस्य अस्य विषयवस्तु।

४.४.४ जानकीहरणम्

जानकीहरणं महाकाव्यं कुमारदासेन प्रणीतम्। महाकाव्येऽस्मिन् पञ्चविंशतिसर्गाः सन्ति। काव्यमिदं रामायणाश्रितं वर्तते। काव्यस्यास्य प्रथमे सर्गे अयोध्यानगरी, राजा दशरथः, राजभार्या इत्येतेषां सुविस्तृतं वर्णनमस्ति। द्वितीयसर्गे रावणचरित्रं वर्णितमस्ति। तृतीयसर्गे राज्ञः दशरथस्य जलक्रीड़ा सन्ध्यावर्णनञ्च अस्ति। चतुर्थे पञ्चमसर्गे च दशरथस्य चतुर्पुत्राणां जन्मवृत्तान्तं, तैः पुत्रैः तारकावधादिबाल्यलीलायाः विमर्शः अस्ति। सप्तमे रामसीतयोः विवाहवर्णनमस्ति। अष्टमसर्गे विवाहानन्तरं जायमानानि उत्सव-पार्वणादीनि वर्णितानि। नवमसर्गे रामस्य अयोध्याप्रत्यागमनं वर्णितम्। दशमे रामाभिषेकः, जानकी अर्थात् सीतायाः हरणं विस्तृतरूपेण वर्णितम्। एकादशे राम-हनुमानमित्रता, बालिवधश्च सुष्ठु निरूपितम्। द्वादशे सीतान्वेषणं, त्रयोदशे वानरसेनाह्वानम्, चतुर्दशे सेतुबन्धनं अन्तिमे समुद्रतरणदृश्यं वर्णितमस्ति। पञ्चदशसर्गे षोडशे च रावणसभायां दूतरूपेण रामस्य उपस्थितिः तथा राक्षसानां लीला वर्णितास्ति। सप्तदशात् विंशतिपर्यन्तं वानर-राक्षसयोः युद्धवर्णनमस्ति। युद्धान्ते रामेण रावणवधः रामविजयप्राप्त्यनन्तरं काव्यसमाप्तिः भवति।



अग्रगत्याः निरीक्षणम्

प्रश्नः ६: 'कुमारसम्भवम्' केन विरचितम्? कति सर्गेषु विभक्तम्

.....

प्रश्नः ७: 'रघुवंशम्' महाकाव्ये कति सर्गाः सन्ति? कति राज्ञां वर्णनं प्राप्यते?

.....

प्रश्नः ८: 'सेतुबन्धः' केन विरचितम्? महाकाव्येऽस्मिन् कति सर्गाः सन्ति?

.....

प्रश्नः ९: कुमारदासेन किं काव्यं विरचितम्? कति सर्गाः सन्ति?

.....

प्रश्नः १०: जानकीहरणम्' महाकाव्यस्य विषयवस्तु कस्मादुद्धृतमस्ति?

.....

प्रश्नः ११: राज्ञः दिलीपस्य पुत्रस्य नाम किमासीत्?

.....

४.५ कालिदासोत्तरयुगीय महाकवयः महाकाव्यानि च

कालिदासोत्तरयुगस्य कविषु 'भारविः' सर्वप्रथमं मन्यते। उक्तमासीत् असौ राज्ञः भोजस्य समकालीन आसीत्। भारवेः पितुर्नाम श्रीधरः मातुर्नाम च सुशीला आसीत्। भारवेः प्रकृतं नाम दामोदर आसीत्। भारवेः कालः ६०० खीष्टाब्दः मन्यते। पण्डितानां मतानुसारं तस्य जन्म दक्षिणभारते अभवत्। भारविः सुप्रसिद्धः व्याकरणविद् आसीत्। संस्कृतसाहित्ये पञ्चमहाकाव्येषु भारवेः 'किरातार्जुनीयम्' महाकाव्यं समुल्लेखनीयम् अन्यतमञ्च आसीत्।

कालिदासस्य परवर्तिनः कविषु 'भट्टि' अन्यतमोऽस्ति। सः व्याकरणशास्त्रनिष्णात कविः आसीत्। व्याकरणशास्त्रोपदेशार्थम् अनेन 'रावणवधकाव्यम्' 'भट्टिकाव्यम्' वा विरचितम्। भट्टेः जन्मसमयः ख्रीष्टियसप्तमशतिकायाः प्रथमभागो मन्यते।

महाकविः माघः कालिदासस्य परवर्तिकालस्य अन्यतमः कविः आसीत्। माघस्य समयः सप्तमशताब्दी मन्यते। माघः भोजराजस्य परममित्रम् आसीदिति। कविः माघः राजनीति-दर्शन-व्याकरणशास्त्रेषु निष्णातः आसीत्। माघस्य संस्कृतभाषासाहित्ये अद्वितीयं पाण्डित्यमासीत्। तेन विरचितं 'शिशुपालवधम्' एकमुत्कृष्टं महाकाव्यम् आसीत्।

कालिदासस्य परवर्तीकालस्य कविषु 'श्रीहर्षः' अन्यतम आसीत्। श्रीहर्षस्य 'नैषधचरितम् महाकाव्यं संस्कृतसाहित्यस्य सुबृहत्महाकाव्यम् अस्ति। श्रीहर्षस्य पितुर्नाम श्रीहीरः मातुर्नाम मामल्लदेवी आसीत्। श्रीहर्षः कान्यकुब्जस्य राजा जयचन्द्रस्य राजसभायाः राजकविः आसीत्। श्रीहर्षेण अन्येऽपि बहवः ग्रन्थाः विरचिताः। तस्य समयः द्वादशशताब्दी इति मन्यते।



ज्ञातव्यम्

श्रीहर्षेण अनेकाः ग्रन्थाः विरचिताः

१. स्थैर्यविचारणप्रकरणम् २. विजयप्रशस्तिः ३. अर्णववर्णनम् ४. शिवशक्तिसिद्धिः ५.खण्डन-खण्ड-खाद्यम् ६. गौडोर्वीशकुलप्रशस्ति ७. चिन्दप्रशस्ति ८. नवसाहसाङ्कचरितचम्पूः ९. ईश्वराभिसन्धिः।

४.५.१ किरातार्जुनीयम्

भारविविरचितं 'किरातार्जुनीयम्' महाकाव्यम् अष्टादशसर्गेषु विभक्तम्। महाकाव्यमिदं महाभारतस्य वनपर्वस्य अन्तर्गतम्। अर्जुनाय युद्धे प्रमुदितेन भगवता शिवेन पाशुपातास्त्रप्रदानं परमपुरुषार्थं वर्णितः। पाशाक्रीडायां पराजितानां पाण्डवानां द्वैतवने निवासघटनाः प्रारम्भे वर्णिताः। दायापरित्यक्तः युधिष्ठिरः द्रोपद्या सह अर्जुनादिभ्रातृभिश्च सार्द्धं दैतवने निवसति। ततः दुर्योधनस्य राज्यसञ्चालनं मनोवृत्तिं च परिज्ञातुं प्रेषितः वनेचरः हस्तिनापुरं गत्वा तत्र सर्वं समाचारं युधिष्ठिरं निवेदयति। तृतीये सर्गे महर्षिव्यासपरामर्शानुसारं अर्जुनस्य पाशुपातास्त्रलाभवृत्तान्तं वर्णितमस्ति। चतुर्थादारभ्य द्वादशसर्गपर्यन्तं अर्जुनस्य गम्भीरतपस्या, शिवस्य किरातवेशधारणञ्च वर्णितम्। त्रयोदशसर्गात् पञ्चदशसर्गपर्यन्तं किरातार्जुनयोः युद्धवर्णनमस्ति। अन्तिमत्रिषु सर्गेषु अर्जुनस्य वीरत्वं कठिनतपस्यायाः वर्णनम् एवञ्च तत्र प्रसन्ने सति भगवता अर्जुनाय युद्धे पाशुपातास्त्रं प्रददाति। अर्जुनः पाशुपातास्त्रेण सह युधिष्ठिरपार्श्वं प्रत्यागमनं करोति।

४.५.२ रावणवधम्

महाकविना भट्टिना विरचितं 'रावणवधमहाकाव्यम्' 'भट्टिकाव्यम्' नाम्ना ज्ञायते। अस्य कथा रामायणाधारितं वर्तते। काव्येऽस्मिन् द्वाविंशतिः (२२)सर्गाःसन्ति। काव्येऽस्मिन् रामचन्द्रस्य जन्मनः रावणवधपर्यन्तं, ततश्च रामराज्याभिषेकस्य सर्वं वृत्तान्तं वर्णितमस्ति। छात्राणां कृते व्याकरणालङ्काराणां ज्ञानप्रदानाय महाकाव्यस्यास्य रचनमभवत्। काव्यमिदं चतुर्षु काण्डेषु विभक्तम् -

१. प्रकीर्णकाण्डम् (१-५ सर्गपर्यन्तम्)
२. अधिकारकाण्डम् (६-९ सर्गपर्यन्तम्)
३. प्रसन्नकाण्डम् (१०-१३ सर्गपर्यन्तम्)
४. तिङन्तकाण्डम् (१४-२२ सर्गपर्यन्तम्)

प्रकीर्णकाण्डे रामस्य जन्मनः वनवासपर्यन्तं सीताहरणवर्णनं निरूपितम्। काण्डेऽस्मिन् प्रत्ययविषये ज्ञानमस्ति। अधिकारकाण्डे व्याकरणनियमाः सूक्ष्मतया निरूपिताः। प्रसन्नकाण्डे अलङ्कारविषये वर्णितमस्ति। तिङन्तकाण्डे संस्कृतव्याकरणस्य लकाराणां वर्णनमस्ति। एवं महाकविना भट्टिना काव्यमाध्यमेन व्याकरणज्ञानं प्रदत्तमस्ति।

४.५.३ शिशुपालवधम्

महाकविना माघेन विरचिते शिशुपालवधमहाकाव्ये विंशतिः (२०) सर्गाः सन्ति। महाकाव्येऽस्मिन् विषयवस्तु महाभारतस्य सभापर्वणः तथा च श्रीमद् भागवत्पुराणाश्रितं वर्तते। प्रथमसर्गे देवर्षिनारद-श्रीकृष्णयोः मध्ये


शिशुपालवधवर्णनमालोचितम्। द्वितीयसर्गे वलराम-श्रीकृष्ण-उद्धवानां मध्ये राजनीतिविषयकज्ञानं समालोचितम्।

तृतीयसर्गाद् अष्टमसर्गपर्यन्तं श्रीकृष्णस्य ससैन्यम् इन्द्रप्रस्थगमनं वर्णितम्। मध्ये च षष्ठे ऋतूनां वर्णनं सप्तमे वनविहारवर्णनम्, अष्टमसर्गे जलक्रीडावर्णनमस्ति। नवमे दशमे च यदुकुलस्य दम्पतीनां मध्ये कामक्रीडा सौन्दर्यप्रसाधनादीनां वर्णनमस्ति। एकादशे भगवन्तं श्रीकृष्णं निद्रावस्थायाः जागरणाय वैतालिकैः प्रभातवर्णनं निरूपितम्। द्वादशे श्रीकृष्णस्य सपरिवारं यमुनानदीतीरगमनदृश्यं वर्णितमस्ति। त्रयोदशे पितामहभीष्माज्ञानुसारं युधिष्ठिरः कृष्णाय यज्ञाद्यपूजां समर्पयति। पञ्चदशसर्गे शिशुपालस्य अत्याचारघटना सन्निविष्टा। षोडशे दूतद्वारा शिशुपालेन भगवत्तिरष्कारघटना आलोचिता। सप्तदशे शिशुपालस्य विरुद्धे श्रीकृष्णस्य युद्धयात्रा वर्णिता। अन्तिमे सर्गत्रये श्रीकृष्ण- शिशुपालयोः युद्धवर्णनं तथा च श्रीकृष्णेन सुदर्शनचक्रेण शिशुपालस्य मस्तकहरणं वर्णितमस्ति।

४.५.४ नैषधचरितम्

महाकविना श्रीहर्षेण विरचितं नैषधचरितं महाकाव्यं महाभारतस्य वनपर्वान्तर्गतमस्ति। नलदमयन्ती-आख्यानाश्रितम् अस्ति। महाकाव्यमिदं द्वाविंशतिः (२२) सर्गेषु विभक्तमस्ति। निषाददेशस्य राजा नलः, विदर्भस्य राज्ञः भीष्मस्य कन्या दमयन्ती; द्वयोः प्रेमकथा काव्यस्यास्य प्रधानं विषयवस्तु। महाकाव्यस्यास्य प्रथमे सर्गे राज्ञः नलस्य मृगवर्णनम्, द्वितीये हंसेन दमयन्त्याः सौन्दर्यवर्णनं तथा नलेन हंसस्य कुण्डिनपुरं प्रेषणवर्णनम् आलोचितम्। तृतीये दमयन्त्याः समक्षं नलस्य पुरुषत्वं सौन्दर्यत्वं च विस्तृतमालोचितम्। चतुर्थे नलस्य दमयन्तीं प्रति प्रेमानुरागवर्णनं, पञ्चमे दमयन्त्याः स्वयम्बरायोजनम्, इन्द्र-वरुण-अग्नि-यमैः दूतरूपेण नलं दमयन्त्याः अन्तःपुरं प्रेषणघटना, षष्ठादारभ्य नवमपर्यन्तं नलेन दमयन्त्याः समक्षं देवानां वाणी निवेदनम्, दमयन्त्याः नलं प्रति सद्भावप्रदर्शनम् दमयन्त्याः क्रन्दनम्, अन्तिमे नलेन दमयन्त्याः समीपे आत्मप्रकाशः, दशमे दमयन्त्याः स्वयम्वरवर्णनम्, दमयन्त्याः प्रसाधनं सौन्दर्यञ्च सुन्दरतया वर्णितम्; एकादशे द्वादशे च दमयन्त्याः सयम्वरम् आगतानां राज्ञां सुन्दरवर्णनम् आलोचितम्। त्रयोदशे स्वयम्वरं नलरूपीदेवानां नलस्य च वर्णनमस्ति। चतुर्दशे नल-दमयन्त्योः प्रेम्ना अभिभूताः देवाः स्वरूपधारणं नलं पतिरूपेण ग्रहणवर्णनम्, पञ्चदशे विवाहप्रसाधनवृत्तान्तं, षोडशे सर्गे च नलदमयन्त्योः विवाहघटना भोजनादिकं च सुविस्तृतमालोचितम्।

सप्तदशे स्वर्गात् प्रत्यागमनवेलायां देवैः सह कलिसम्भाषणम्, अष्टादशे नलदमयन्त्योः प्रथममेलनं, तथा च अन्तिमे नल-दमयन्त्योः दैनन्दिनव्यवहारिकजीवनवृत्तान्तं दाम्पत्यजीवनं च सुष्ठु निरूपितम्।



अग्रगत्याः निरीक्षणम्

प्रश्नः १२: भट्टिकाव्यस्य अपरं नाम किम्?

.....

प्रश्न : १३: शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति?

.....

प्रश्नः १४: 'किरातार्जुनीयम्' महाकाव्यम् कति सर्गेषु विभक्तम्?

.....

प्रश्नः १५: 'नैषधचरितम्' महाकाव्यं कस्मात् गृहीतम्?

.....

प्रश्नः १६: शिशुपालस्य वधः केन कृतम्?

.....

४.६ अध्यायस्य असमीयाभाषायां संक्षिप्तविवरणम्

প্ৰাক্-কালিদাসৰ যুগৰ মহাকবি আৰু মহাকাব্য ঃ

এতিয়া আপুনি প্ৰাক্-কালিদাসৰ যুগৰ মহাকবি আৰু মহাকাব্যৰ বিষয়ে জানিব পাৰিব। প্ৰাক্-কালিদাসৰ যুগৰ কবিসকলৰ ভিতৰত বৌদ্ধ কবি অশ্বঘোষ অন্যতম। তেওঁৰ প্ৰকৃত নাম জনা নাযায়। তেওঁ আছিল অযোধ্যা নিবাসী এজন ব্ৰাহ্মণ। বৌদ্ধ ধৰ্মত দীক্ষিত হোৱাৰ পাছতহে তেওঁক অশ্বঘোষ নামেৰে জনা যায়। তেওঁৰ সময় খ্ৰীষ্টীয় 1ম শতাব্দী বুলি ধৰা হয়। অশ্বঘোষৰ কবিত্ব প্ৰতিভা অসীম আছিল। তেওঁ একেৰাহে এজন কবি, অভিনেতা গৱেষক, গায়ক, দাৰ্শনিক আৰু ধাৰ্মিক ব্যক্তি আছিল। অশ্বঘোষৰ দৰ্শন বিষয়ক আৰু অন্য গ্ৰন্থও চীন আৰু তিব্বতী ভাষাত সংৰক্ষিত হৈ আছে। তেওঁ অকল মহাৰাজ কণিষ্কৰ ৰাজ কবিয়েই নাছিল, ৰাজগুৰুও আছিল। ডেকা বয়সতে অশ্বঘোষে মহাকবিৰূপে স্বীকৃতি লাভ কৰিছিল। তেওঁ লিখা প্ৰেমৰ কবিতা আবৃত্তি কৰি ডেকা সমাজে আনন্দ লাভ কৰিছিল। চীনা পৰিব্ৰাজক হিউয়েন চাঙৰ মতে অশ্বঘোষে বৌদ্ধদৰ্শনৰ ওপৰত চাৰিখন গ্ৰন্থ লিখে। সেইসমূহ হ'ল —

1¼ মহাযান শ্ৰদ্ধোৎপাদন সংগ্ৰহ,

2¼ বজ্ৰসূচী।

3¼ গণ্ডীস্তোত্ৰ ব্যাখ্যা

4¼ সূত্ৰালংকাৰ

ইয়াৰোপৰি তেওঁ দুখন মহাকাব্য ৰচনা কৰিছিল। সেই দুখন হ'ল-

1¼ বুদ্ধচৰিত আৰু 2¼ সৌন্দৰানন্দ

বুদ্ধচৰিতম্ ঃ

এতিয়া আপুনি অশ্বঘোষ ৰচিত বুদ্ধচৰিতৰ বিষয়ে জানিব পাৰিব। অশ্বঘোষ ৰচিত

বুদ্ধচৰিত নামৰ মহাকাব্যখন 28টা সৰ্গত বিভক্ত। বুদ্ধচৰিতত গৌতমবুদ্ধৰ সমগ্ৰ জীৱনৰ বৰ্ণনা পোৱা যায় । লগতে তেওঁৰ উপদেশ আৰু সিদ্ধান্তসমূহবো বৰ্তমান সংস্কৃতত ইয়াৰ 17 টা সৰ্গৰ সংস্কৰণহে পোৱা গৈছে। ইয়াৰ শেষৰ চাৰিটা সৰ্গ অমৃতানন্দই নৱম শতাব্দীত যোগ দিয়ে। বাকীবোৰ সৰ্গ (11 টা) সংস্কৃতত সম্পূৰ্ণৰূপে পোৱা নাযায়। প্ৰথম পাঁচটা সৰ্গত (1–5) বুদ্ধৰ জন্মৰ পৰা আৰম্ভ কৰি অভিনিষ্ক্ৰমণ পৰ্যন্তলৈ কথাভাগৰ বৰ্ণনা পোৱা যায়। ছয় আৰু সাত সৰ্গত বুদ্ধই তপোবনত প্ৰৱেশ কৰাৰ কথা পোৱা যায়। অষ্টম সৰ্গত বুদ্ধৰ গৃহ ত্যাগত পত্নী যশোধৰাৰ বিলাপৰ বৰ্ণনা আছে তথা নৱম সৰ্গত সিদ্ধাৰ্থক (অৰ্থাৎ বুদ্ধক) বিচৰাৰ যি প্ৰচেষ্টা চলে, তাৰ বৰ্ণনা পোৱা যায়। দশম সৰ্গত বুদ্ধই বুদ্ধত্ব প্ৰাপ্ত হৈ (অৰ্থাৎ জীৱনৰ প্ৰকৃত সত্য লাভ কৰি) মগধলৈ যাত্ৰা কৰাৰ বৰ্ণনা আৰু ইয়াৰ পিছৰ তিনিটা সৰ্গত (11 — 13) সাংসাৰিক মায়া — মোহৰ নিন্দা কৰা হৈছে। চতুৰ্দশ সৰ্গত (14 সৰ্গ) তেওঁৰ পূৰ্ণ বুদ্ধত্ব প্ৰাপ্তিৰ বৰ্ণনা আছে। শেষৰ সৰ্গসমূহত বুদ্ধৰ ধৰ্মপ্ৰচাৰ, বুদ্ধৰ শিক্ষা, উপদেশ আৰু সম্ৰাট অশোকৰ সময়লৈকে বৌদ্ধধৰ্মৰ প্ৰচলনৰ কথা বৰ্ণনা কৰা হৈছে।

ধৰ্মৰক্ষ নামৰ এজন ভাৰতীয় বৌদ্ধ ভিক্ষুই বুদ্ধচৰিতক 414–421 খ্ৰীঃৰ ভিতৰত চীনা ভাষালৈ অনুবাদ কৰে। পাছত এই বুদ্ধচৰিত মহাকাব্যখন তিব্বতীভাষালৈও অনুদিত হয় ।

সৌন্দৰানন্দম্

বুদ্ধচৰিতৰ পিছত আপুনি এতিয়া অশ্বঘোষ ৰচিত 'সৌন্দৰানন্দ'ৰ বিষয়ে জানিব পাৰিব। সৌন্দৰানন্দ মহাকাব্যখন অশ্বঘোষৰদ্বাৰা ৰচিত প্ৰথম মহাকাব্য বুলি কোৱা হয়। ইয়াত 18টা সৰ্গ আছে। বুদ্ধদেৱৰ জীৱন কাহিনী আৰু তেওঁৰ বৈমাত্ৰেয় (মাহীমাকৰ পৰা জন্মা) ভাতৃ নন্দৰ বৌদ্ধধৰ্ম গ্ৰহণ তথা সুন্দৰী আৰু নন্দৰ প্ৰণয় কাহিনীয়েই এই মহাকাব্যৰ বিষয়বস্তু। মহাকাব্যখনৰ প্ৰথম তিনিটা সৰ্গত সিদ্ধাৰ্থৰ (বুদ্ধৰ এটা নাম) জন্মৰপৰা বুদ্ধত্ব প্ৰাপ্ত হৈ কপিলাবস্তুলৈকে উভতি অহালৈকে সংঘটিত হোৱা ঘটনাসমূহৰ বৰ্ণনা আছে। চতুৰ্থ সৰ্গত বুদ্ধৰ ভাতৃ নন্দ আৰু সুন্দৰীৰ বিবাহোৎসৱৰ বৰ্ণনা পোৱা যায়। লগতে নৱ-বিবাহিত দম্পতিৰ পাৰস্পৰিক ভালপোৱা তথা ভিক্ষা কৰিবলৈ অহা বুদ্ধই নন্দৰ পদুলিমুখৰপৰা প্ৰত্যাবৰ্তন কৰা ঘটনাৰ বৰ্ণনা আছে। ইয়াৰ পিছত পঞ্চম সৰ্গত নন্দই কৰা অনুশোচনা আৰু বুদ্ধৰ ওচৰলৈ যোৱা কথাৰ উল্লেখ পোৱা যায়। লগতে বুদ্ধদেৱে নন্দক বৌদ্ধধৰ্মত দীক্ষা দিয়াৰ কথাও উল্লেখ আছে। ষষ্ঠ সৰ্গত পতিৰ বিৰহত সুন্দৰীৰ বিলাপৰ বৰ্ণনা, সপ্তম সৰ্গত পত্নী সুন্দৰীৰ প্ৰতি নন্দৰ মনত আসক্তি ওপজা তথা পত্নীৰ ওচৰলৈ নন্দৰ উভতি যোৱাৰ ইচ্ছা বৰ্ণিত হৈছে । পিছৰ দুটা সৰ্গত অৰ্থাৎ অষ্টম আৰু নৱম সৰ্গত সহযোগী এজনে নন্দক উপদেশ দিয়াৰ বৰ্ণনা পোৱা যায়। দশম আৰু একাদশ সৰ্গত নন্দৰ মনৰ পৰা পত্নীৰ প্ৰতি থকা আসক্তি দূৰ কৰিবলৈ বুদ্ধই যোগবিদ্যাৰ দ্বাৰা আকাশমাৰ্গেৰে নন্দক লৈ গৈ অপ্সৰাসকলক দেখুৱায়। অপ্সৰাসকলক দেখি নন্দৰ পত্নী বিয়োগৰ দুখ নাইকীয়া হয় আৰু অপ্সৰাসকলক পাবৰ বাবে বুদ্ধই নন্দক তপস্যা কৰিবলৈ উপদেশ দিয়াৰ বৰ্ণনা আছে। দ্বাদশ সৰ্গত এজন ভিক্ষুৱে নন্দক জানিবলৈ দিয়ে যে তেওঁৰ তপস্যাৰ উদ্দেশ্যই তেওঁক আনৰ হাঁহিয়াতৰ পাত্ৰ কৰি তুলিছে। ইয়াৰ পিছত নন্দৰ মন বুদ্ধত্ব প্ৰাপ্তিৰ বাবে ইচ্ছুক হৈ পৰে আৰু তেওঁ সকলো

পৰিত্যাগ কৰি বুদ্ধত শৰণ লয়। ত্ৰয়োদশ সৰ্গৰ পৰা বাকী চাৰিটা সৰ্গলৈ (13–16) বুদ্ধৰ নন্দৰ প্ৰতি থকা উপদেশ আৰু জীৱনৰ প্ৰকৃত সত্যসমূহৰ জ্ঞানৰ বৰ্ণনা কৰা হৈছে। সপ্তদশ আৰু অষ্টাদশ সৰ্গত (17–18 সৰ্গত) পৰমশান্তিৰ বাবে নন্দৰ তপস্যা আৰু তেওঁৰ সমাধিস্থ স্বৰূপৰ বৰ্ণনা পোৱা যায়।

অশ্বঘোষে "সৌন্দৰানন্দ" নামৰ এই মহাকাব্যখন ৰচনা কৰাৰ প্ৰধান উদ্দেশ্যই হৈছে মনুষ্যক বৌদ্ধধৰ্মৰ পিনে আকৰ্ষিত কৰা।

কালিদাস আৰু কালিদাসৰ যুগৰ মহাকবি ঃ

আপুনি ইতিমধ্যে কবি অশ্বঘোষৰ বিষয়ে অধ্যয়ন কৰিলে। এতিয়া অশ্বঘোষৰ পিছৰ যুগৰ মহাকবি কালিদাসৰ বিষয়ে জানিব পাৰিব। মহাকবি কালিদাসক ভাৰতীয় পণ্ডিত সমাজে 'কবিকুলগুৰু' বুলি স্বীকৃতি দিছে। পাশ্চাত্য পণ্ডিত উইলিয়াম্ জোন্সে কালিদাসৰ 'অভিজ্ঞান শকুন্তলম্' নাটকৰ সৌন্দৰ্যত মুগ্ধ হৈ কবিজনক ভাৰতৰ "শেক্সপীয়াৰ" আখ্যা দিছে। এতিয়ালৈ কালিদাসৰ আৱিৰ্ভাৰ কাল আৰু জীৱনী সম্বন্ধে কোনেও নিশ্চিন্ত সিদ্ধান্তত উপনীত হ'ব পৰা নাই। কিছুমান পণ্ডিতৰ মতে তেওঁৰ জন্মভূমি কাশ্মীৰ, কিছুমানৰ মতে বিদিশা নগৰী আৰু কিছুমানৰ মতে উজ্জয়িনী। কিন্তু সকলোবোৰ মতৰ ভিতৰত সৰ্বাধিক গ্ৰাহ্য মতটো হৈছে যে কালিদাসৰ জন্ম স্থান উজ্জয়িনী। আকৌ কালিদাসৰ সৰ্বাধিক গ্ৰহণযোগ্য আবিৰ্ভাব কাল খ্ৰীঃ পূঃ প্ৰথম শতাব্দী বুলি ধৰা হয়। মহাকবি কালিদাস এজন বিদগ্ধ পণ্ডিত আছিল। তেওঁ বেদ-বেদান্ত-বেদাংগ, ধৰ্মশাস্ত্ৰ, ৰামায়ণ-মহাভাৰত-পুৰাণ, নীতিশাস্ত্ৰ, ব্যাকৰণ, আয়ুৰ্বেদ, জ্যোতিষ, দৰ্শনশাস্ত্ৰ, চিত্ৰকলা, বাস্তুকলা আদি সকলো শাস্ত্ৰতে পাৰ্গত আছিল।

মহাকবি কালিদাসৰ নামত অনেক গ্ৰন্থ প্ৰচলিত হৈ থাকিলেও সাতখন গ্ৰন্থহে তেওঁৰ প্ৰকৃত ৰচনা বুলি ধৰা হয়। সেইসমূহ হৈছে- 1। ঋতু সংহাৰম্ 2¼ মালবিকাগ্নিমিত্ৰম্ 3¼ কুমাৰসম্ভৱম্ 4। বিক্ৰমোৰ্বশীয়ম্, 5। মেঘদূতম্ 6। অভিজ্ঞানশকুন্তলম্ আৰু 7। ৰঘুবংশম্। এই সমূহৰ ভিতৰত 'ঋতুসংহাৰ' আৰু 'মেঘদূত' হৈছে খণ্ডকাব্য, 'কুমাৰসম্ভৱ' আৰু 'ৰঘুবংশ' হৈছে মহাকাব্য। 'মালবিকাগ্নিমিত্ৰ', 'বিক্ৰমোৰ্বশীয়' আৰু 'অভিজ্ঞানশকুন্তলম্' এই তিনিখন হৈছে নাটক।

কুমাৰসম্ভৱম্ ঃ

এতিয়া আপুনি কালিদাস ৰচিত "কুমাৰসম্ভৱম্" মহাকাব্যৰ বিষয়ে জানিব পাৰিব। মহাকবি কালিদাসে দুখন মহাকাব্য ৰচনা কৰিছিল। সেই দুখন হৈছে 'কুমাৰসম্ভৱম্' আৰু 'ৰঘুবংশম্'। ইয়াৰে ভিতৰত কুমাৰসম্ভৱকে কবিসমাজে ৰঘুবংশতকৈ আগৰ ৰচনা বুলি মন্তব্য কৰে। পৰম্পৰা অনুসৰি "কুমাৰসম্ভৱম্" মহাকাব্যখনত বাইশটা [22] সৰ্গ থকা বুলি কোৱা হয়। কিন্তু বৰ্তমান কালত মহাকাব্যখনৰ পাণ্ডুলিপিৰ সপ্তদশ সৰ্গলৈহে পোৱা যায়। তাতকৈ বেছি সৰ্গৰ পাণ্ডুলিপি উপলব্ধ নহয়। পণ্ডিতসমাজে মত পোষণ কৰে যে প্ৰথম আঠটা সৰ্গ নিশ্চিতভাৱে কালিদাসৰ নিজস্ব ৰচনা। নৱম আৰু দশম সৰ্গ দুটাও কবিজনাৰ দ্বাৰা ৰচিত বুলি ধাৰণা কৰা হয়। কিন্তু একাদশৰ পৰা বাকী সৰ্গসমূহ কালিদাসৰ দ্বাৰা ৰচিত হয় নে নহয় এই বিষয়ত সন্দেহ আছে।

"কুমাৰসম্ভৱম্" মহাকাব্যৰ প্ৰথম সৰ্গটোত হিমালয়ৰ প্ৰাকৃতিক সৌন্দৰ্য আৰু পাৰ্বতীৰ শাৰীৰিক সৌন্দৰ্যৰ বৰ্ণনা পোৱা যায়। দ্বিতীয় সৰ্গত পৰমপিতা ব্ৰহ্মাৰ বৰ্ণনা আৰু তাৰকাসুৰৰ অত্যাচাৰৰ বৰ্ণনা পোৱা যায়। তৃতীয় সৰ্গত বসন্তকালৰ বৰ্ণনা আৰু শিৱ-পাৰ্বতীৰ বৰ্ণনাও উপলব্ধ হয়। চতুৰ্থ সৰ্গটিত কামদহনৰ পিছত (শিৱৰ দ্বাৰা ভস্মীভূত হৈ) কামদেৱৰ পত্নী ৰতিৰ বিলাপৰ দুখজনক বৰ্ণনা পোৱা যায়। পঞ্চম সৰ্গটিত হিমালয় কন্যা পাৰ্বতীৰ মহাদেৱ শিৱক পতিৰূপে পাবলৈ কৰা তপস্যা তথা শিৱৰদ্বাৰা পাৰ্বতীৰ ভক্তিৰ পৰীক্ষা আৰু পিছত পাৰ্বতী বিজিত বুলি কৰা ঘোষণাৰ উল্লেখ পোৱা যায়। ষষ্ঠ সৰ্গত শিৱে পাৰ্বতীক পত্নীৰূপে গ্ৰহণ কৰাৰ ইচ্ছা প্ৰকাশ কৰি সপ্তৰ্ষিক পাৰ্বতীৰ পিতৃ হিমালয়ৰ ওচৰলৈ প্ৰেৰণ কৰাৰ বৰ্ণনা আছে। সপ্তম সৰ্গটিত শিৱ-পাৰ্বতীৰ বিবাহৰ সুন্দৰ বৰ্ণনা কৰা হৈছে। অষ্টম সৰ্গত মুখ্যভাৱে শিৱ-পাৰ্বতীৰ বিবাহৰ পিছত হোৱা সম্ভোগৰ বৰ্ণনাই স্থান পাইছে। ইয়াৰ পিছৰ নটা সৰ্গত উল্লেখ আছে যে বিয়াৰ পাছত শিৱ আৰু পাৰ্বতীয়ে সম্ভোগ ক্ৰীড়াত মগ্ন হৈ শ শ ঋতু অতিবাহিত কৰাত দেৱতাসকল অধৈৰ্য্য হৈ পৰিল। তেতিয়া দেৱতাসকলে অগ্নিক কপৌ চৰাইৰ ৰূপত শিৱ আৰু পাৰ্বতীৰ ওচৰলৈ ঘটনাৰ বুজ ল'বলৈ পঠিয়ালে। অগ্নিৰ আগমনত শিৱ পোনতে ক্ৰোধান্বিত হ'ল। কিন্তু অগ্নিয়ে শিৱৰ আগত ব্যক্ত কৰিলে যে তেওঁ দেৱতাসকলৰ অনুৰোধ ক্ৰমেহে শিৱ-পাৰ্বতীৰ ওচৰলৈ আহিছে। সেই কথা শুনি শিৱ সন্তুষ্ট হ'ল আৰু নিজৰ তেজোবিন্দু অগ্নিত নিক্ষেপ কৰিলে। অগ্নিয়ে সেই তেজ ধাৰণ কৰিবলৈ অসমৰ্থ হৈ ইন্দ্ৰক জনোৱাত দেৱতাসকলৰ ৰজা ইন্দ্ৰই আকাশী গংগাত সেই তেজ নিক্ষেপ কৰিবলৈ ক'লে। কিন্তু গংগাই সেই তেজ বহন কৰিবলৈ সমৰ্থ নহ'ল। তেতিয়া তেওঁ গংগাস্নান কৰিবলৈ অহা ছজনী কৃত্তিকাৰ শৰীৰত ন্যস্ত কৰিলে। ফলত কৃত্তিকাসকল গৰ্ভবতী হ'ল। তেওঁলোকে সেই গুৰুভাৰ বহন কৰিবলৈ অসমৰ্থ হৈ বেতসবন ত্যাগ কৰি গুচি গ'ল। সেই সময়তে শিৱ আৰু পাৰ্বতীয়ে বিমানেৰে আকাশ ভ্ৰমণ কৰি থাকোতে শিশু এটিৰ ওপৰত তেওঁলোকৰ দৃষ্টি পৰিল। শিৱে সেই শিশুটি নিজ তেজৰপৰা উৎপন্ন বুলি গম পাই শিশুটিক তাৰপৰা তুলি ল'লে। সেই দেব শিশুটো মাত্ৰ ছয়দিনতে পৈনত হ'ল আৰু সকলো অস্ত্ৰ-শস্ত্ৰত পাৰ্গত হৈ উঠিল। শিৱৰ নিজ দেহৰ বীৰ্যৰ পৰা উৎপন্ন হোৱা সেই শিশুটি কুমাৰ কাৰ্তিকেয় নামে জনাজাত হ'ল। ইন্দ্ৰাদি দেৱতাসকলৰ অনুৰোধ ক্ৰমে শিৱই তেওঁক (কুমাৰক) দেৱসেনাপতি পাতিলে আৰু সেই কুমাৰে তাৰকাসুৰক যুদ্ধত বধ কৰি ইন্দ্ৰ আদি অন্য দেৱতাসকলক ৰক্ষা কৰিলে।

গতিকে আপুনি গম পালে যে কুমাৰ কাৰ্তিকেয়ৰ জন্ম আৰু কাৰ্তিকেয়ৰ হাতত তাৰকাসুৰৰ বধেই হৈছে এই কুমাৰসম্ভৱম্ মহাকাব্যৰ প্ৰধান বিষয়বস্তু।

ৰঘুবংশম্ ঃ

এতিয়া আপুনি কালিদাস ৰচিত ৰঘুবংশম্ মহাকাব্যৰ বিষয়ে জানিব পাৰিব। ৰঘুবংশম্ মহাকাব্যখনক কালিদাসৰ অন্তিম আৰু শ্ৰেষ্ঠ কাব্য বুলি গণ্য কৰা হয়। এই মহাকাব্যখন উনৈশটা সৰ্গত [19] বিভক্ত। সৰ্গসমূহত ৰঘু অৰ্থাৎ সূৰ্যবংশীয় ৰজাসকলৰ চৰিত্ৰ বৰ্ণনা কৰা হৈছে। ৰঘুবংশত জন্মা ৰজা দিলীপৰ পৰা আৰম্ভ কৰি অগ্নিবৰ্ণলৈ সূৰ্যবংশীয় উনত্ৰিশজন ৰজাৰ বৰ্ণনা

এই সৰ্গসমূহত পোৱা যায়।

প্ৰথম সৰ্গত মূলতঃ ৰজা দিলীপৰ চৰিত্ৰৰ বৰ্ণনা পোৱা যায়। ৰজা দিলীপৰ পত্নীৰ নাম আছিল সুদক্ষিণা। তেওঁলোকৰ কোনো সতি-সন্তান নথকাত এদিনাখন কুলগুৰু বশিষ্ঠৰ আশ্ৰমলৈ প্ৰস্থান কৰিলে। বশিষ্ঠই পুত্ৰপ্ৰাপ্তিৰ বাবে তেওঁলোকক তেওঁৰ আশ্ৰমত থকা কামধেনু নন্দিনীক সেৱা কৰিবলৈ নিৰ্দেশ দিলে।

দ্বিতীয় সৰ্গত দিলীপ আৰু সুদক্ষিণাৰ গো-সেৱা ব্ৰত কৰাৰ বৰ্ণনা আছে।

তৃতীয় সৰ্গত নন্দিনীৰ বৰত ৰজা দিলীপ আৰু সুদক্ষিণাৰ গৰ্ভত ৰঘুৰ জন্ম, সংস্কাৰ, শিক্ষাগ্ৰহণ, অভিষেক আৰু ৰজা দিলীপৰ অশ্বমেধ যজ্ঞৰ বৰ্ণনা আছে।

চতুৰ্থ সৰ্গত যজ্ঞ সমাপ্তিৰ পিছত ৰঘুক ৰজাৰূপে অভিষিক্ত কৰি সুদক্ষিণাৰে সৈতে ৰজা দিলীপে তপোবনলৈ গমন কৰাৰ বৰ্ণনা পোৱা যায়।

পঞ্চম সৰ্গত ৰঘুৰ দানশীলতাৰ বৰ্ণনা পোৱা যায়।

ষষ্ঠ আৰু সপ্তম সৰ্গত ইন্দুমতীৰ সয়ম্বৰ আৰু ৰঘুপুত্ৰ অজৰ সৈতে ইন্দুমতীৰ বিবাহৰ বৰ্ণনা পোৱা যায়।

অষ্টম সৰ্গত বন্ধুৱে অজৰ হাতত ৰাজ্যশাসনৰ ভাৰ অপৰ্ণ কৰা, ইন্দুমতীৰ আকস্মিক মৃত্যুত অজৰ বিলাপ আৰু বশিষ্ঠমুনিৰ দ্বাৰা অজক সান্ত্বনা প্ৰদান কৰাৰ উল্লেখ পোৱা যায়।

নৱম সৰ্গত দশৰথৰ ৰাজ্যশাসনৰ বৰ্ণনা পোৱা যায়। দশৰথে মৃগয়া কৰিবলৈ যাওঁতে দৈৱবশতঃ শ্ৰৱণ কুমাৰক বধ কৰাৰ হৃদয় বিদাৰক বিৱৰণো এই সৰ্গত পোৱা যায়। নৱমৰ পৰা পঞ্চদশ (9–15) সৰ্গলৈকে দশৰথ পুত্ৰ ৰামৰ বৰ্ণনা পোৱা যায়। ষোড়শ সৰ্গত [16] ৰামৰ পুত্ৰ কুশৰ ৰাজ্যশাসনৰ বৰ্ণনা বিশদভাবে উল্লেখ কৰা হৈছে। সপ্তদশ সৰ্গত কুশৰ পুত্ৰ অতিথিৰ চৰিত্ৰ বৰ্ণনা কৰা হৈছে। অষ্টাদশ সৰ্গত ৰজা সুদৰ্শনেৰে সৈতে একৈশজন ৰঘুবংশীয় ৰজাৰ উল্লেখ কৰা হৈছে। ঊনবিংশ সৰ্গত সুদৰ্শনপুত্ৰ ৰজা অগ্নিবৰ্ণৰ বৰ্ণনা পোৱা যায় আৰু তেওঁৰ শোকাবহ মৃত্যুতেই মহাকাব্যখনৰ সমাপ্তি ঘটিছে।

সেতুবন্ধ ঃ

এতিয়া আপুনি প্ৰবৰসেন ৰচিত সেতুবন্ধৰ বিষয়ে জানিব পাৰিব। সেতুবন্ধ মহাকাব্যখন প্ৰবৰসেনৰ দ্বাৰা ৰচিত বুলি আপুনি গম পাইছে। এই কাব্যখন পোন্ধৰটা সৰ্গত বিভক্ত। হনুমানে সাগৰ পাৰ হৈ লংকালৈ গৈ সীতাৰ বাৰ্তা লৈ অহাৰে পৰা ৰাৱণবধলৈকে সকলোখিনি সেতুবন্ধ মহাকাব্যত বৰ্ণিত হৈছে। সেতুবন্ধন অৰ্থাৎ সেতু ৰচনাই হৈছে এই কাব্যৰ প্ৰধান বিষয়বস্তু। ইয়াৰে প্ৰথম সৰ্গত শৰৎ কালৰ বৰ্ণনা পোৱা যায়। সীতাক উদ্ধাৰ কৰিবলৈ ৰামক আগত লৈ সুগ্ৰীবে বানৰ সৈন্যসমূহৰে সৈতে সমুদ্ৰৰ তীৰলৈ যাত্ৰা কৰাৰ বৰ্ণনা এই সৰ্গত উল্লেখ আছে। দ্বিতীয় সৰ্গত সমুদ্ৰৰ ঢৌ দেখি বানৰ সৈন্য নিতাল মাৰে। তৃতীয় সৰ্গত সুগ্ৰীৱে অনুসৰণকাৰীসকলক লংকালৈ যাবলৈ প্ৰেৰণা দিবলৈ উদাত্ত ভাষণ প্ৰদান কৰে। চতুৰ্থ সৰ্গত বানৰসকল সুগ্ৰীবৰ কথাত সন্মত হৈ লংকালৈ যাবলৈ সাজু হয়। পঞ্চম সৰ্গত ৰামে সাগৰ পাৰ হোৱাত সহযোগ কৰিবলৈ সাগৰক অনুৰোধ জনাই উপবাস খাটে। প্ৰথমে সমুদ্ৰই বামক কোনো

সঁহাৰি নজনায়। ষষ্ঠ সৰ্গত ৰামৰ বাণৰ প্ৰহাৰত আহত সমুদ্ৰই পত্নী গংগাসহ বামক সাক্ষাৎ কৰে। তেতিয়া সেতুবন্ধন কৰিবলৈ সমুদ্ৰই বামক পৰামৰ্শ দিয়ে। সপ্তম আৰু অষ্টম সৰ্গত সেতুবন্ধনৰ আৰু সেই সেতুৰে গৈ লংকাত উপস্থিত হোৱাৰ বৰ্ণনা আছে। নৱম সৰ্গত বানৰ সেনা সুবেল পৰ্বত পোৱা আৰু সেই পৰ্বতৰ প্ৰাকৃতিক শোভাৰ উল্লেখ আছে। দশম সৰ্গত লংকা নগৰীৰ সান্ধ্যকালৰ জীৱনৰ চিত্ৰ অংকিত হৈছে। একাদশ সৰ্গত লংকাধিপতি ৰাৱনে সীতাৰ মন জয় কৰিবলৈ প্ৰচেষ্টা চলায়। দ্বাদশ, ত্ৰয়োদশ আৰু চতুৰ্দশ সৰ্গত লংকা যুদ্ধৰ বিশদ বিৱৰণ পোৱা যায়। পঞ্চদশ সৰ্গত ৰাৱণ ভাতৃ কুম্ভকৰ্ণ আৰু মেঘনাদৰ যুদ্ধত মৃত্যুবৰণ কৰাৰ বৰ্ণনা পোৱা যায়। যুদ্ধত ৰামৰ হাতত ৰাৱণ নিহত হয় আৰু সীতাক লৈ ৰামচন্দ্ৰই অযোধ্যানগৰীলৈ প্ৰত্যাগমন কৰে। এয়াই হৈছে সেতুবন্ধ মহাকাব্যৰ বিষয়বস্তু।

জানকীহৰণম্ ঃ

এতিয়া আপুনি কুমাৰদাস ৰচিত জানকীহৰণ মহাকাব্যখনৰ বিষয়ে জানিব পাৰিব। জানকীহৰণ মহাকাব্যখন কুমাৰদাসৰ দ্বাৰা ৰচিত। এই কাব্যখনত পঁচিশটা [25] সৰ্গ আছে আৰু ইয়াৰ কাহিনীভাগ ৰামায়ণৰ পৰা লোৱা হৈছে। কাব্যখনৰ প্ৰথমসৰ্গত অযোধ্যানগৰী, ৰজা দশৰথ আৰু তেওঁৰ ৰাণীসকলৰ বৰ্ণনা পোৱা যায়। দ্বিতীয়সৰ্গত ৰাৱণৰ চৰিত্ৰৰ বৰ্ণনা আছে। তৃতীয়সৰ্গত ৰজা দশৰথৰ জলক্ৰীড়া আৰু সান্ধ্যবৰ্ণনা, চতুৰ্থ আৰু পঞ্চমসৰ্গত দশৰথৰ চাৰিপুত্ৰৰ জন্মবৃত্তান্ত আৰু সেই পুত্ৰসকলৰ দ্বাৰা তাৰকা আদি বধৰ বাল্যলীলাৰ বৰ্ণনা পোৱা যায়। সপ্তম সৰ্গত ৰাম-সীতাৰ বিবাহৰ বৰ্ণনা আছে। অষ্টমসৰ্গত বিবাহৰ পিচত অনুষ্ঠিত হোৱা উৎসৱ-পাৰ্বণৰ উল্লেখ আছে। নবম সৰ্গত ৰামৰ অযোধ্যা প্ৰত্যাবৰ্তনৰ বৰ্ণনা পোৱা যায়। দশম সৰ্গত ৰামৰ অভিষেকৰ পৰা জানকী (সীতা) হৰণ হোৱালৈকে বহুতো ঘটনাৰ বৰ্ণনা আছে। একাদশ সৰ্গত ৰাম আৰু হনুমানৰ মিত্ৰতা আৰু বালিবধ, দ্বাদশ সৰ্গত সীতা অন্বেষণ, ত্ৰয়োদশ সৰ্গত বানৰসেনা একত্ৰিত হোৱা, চতুৰ্দশ সৰ্গত সমুদ্ৰৰ ওপৰেৰে লংকালৈ ৰামৰ সৈন্যই সেতুৰচনা কৰা আৰু শেষত সমুদ্ৰ পাৰ হোৱাৰ দৃশ্য বৰ্ণিত হৈছে। পঞ্চদশ সৰ্গ আৰু ষোড়শ সৰ্গত ৰামৰ দূতৰূপে অংগদৰ ৰাৱণৰ সভাত উপস্থিত হোৱাৰ বাৰ্তা তথা ৰাক্ষসসকলৰ বিভিন্ন লীলাৰ বৰ্ণনা আছে। সপ্তদশৰ পৰা বিংশতি সৰ্গলৈ (17– 20) বানৰ আৰু ৰাক্ষস সৈন্যৰ যুদ্ধৰ উল্লেখ আছে। যুদ্ধৰ শেষত ৰামৰ হাতত ৰাৱণৰ বধ আৰু ৰামৰ বিজয় প্ৰাপ্তিতেই কাব্যখনৰ সমাপ্তি ঘটিছে।

কালিদাসোত্তৰ যুগৰ মহাকবি আৰু মহাকাব্য ঃ

এতিয়া আপুনি কালিদাসৰ পিচৰ যুগৰ মহাকবি আৰু তেওঁলোকৰ দ্বাৰা ৰচিত মহাকাব্যসমূহৰ বিষয়ে অধ্যয়ন কৰিব পাৰিব। কালিদাসৰ পিচৰ যুগৰ কবি বুলিলে 'ভাৰবিৰ' নামেই প্ৰথমে আহে। কোৱা হয় তেওঁ ৰজা ভোজৰ সমকালীন আছিল। ভাৰবিৰ পিতৃৰ নাম শ্ৰীধৰ আৰু মাতৃৰ নাম সুশীলা। ভাৰবিৰ প্ৰকৃত নাম আছিল দামোদৰ। ভাৰবিৰ কাল 600 খ্ৰীষ্টাব্দ বুলি ধৰা হয়। সৰহভাগ পণ্ডিতৰ মতে তেওঁৰ জন্মস্থান দক্ষিণ ভাৰত। ভাৰৱি এজন সুনিপুণ বৈয়াকৰণবিদ আছিল। সংস্কৃত সাহিত্যত উল্লেখ থকা পঞ্চ মহাকাব্যৰ ভিতৰত ভাৰবি বিৰচিত "কিৰাতাৰ্জনীয়ম্" মহাকাব্যখন অন্যতম বুলি আপুনি ইতিমধ্যে গম পাইছে।

কালিদাসৰ পৰবৰ্তী কবিসমূহৰ ভিতৰত "ভট্টি"ৰ নাম অন্যতম। তেওঁ ব্যাকৰণ শাস্ত্রোপদেশী কবি আছিল। ব্যাকৰণৰ উপদেশ দিবলৈ ভট্টিয়ে "ৰাৱণবধ" বা "ভট্টিকাব্য" ৰচনা কৰিছিল। ভট্টিৰ আবির্ভাৱ কাল খৃষ্টীয় সপ্তম শতিকাৰ প্ৰথম ভাগ বুলি ধৰা হয়।

মহাকবি 'মাঘ' হৈছে কালিদাসৰ পিচৰ যুগৰ অন্য এজন উল্লেখযোগ্য কবি। মাঘৰ আৱির্ভাৱকাল সপ্তম শতাব্দী। কোৱা হয় মাঘ আছিল ভোজ ৰজাৰ পৰমবন্ধু। 'মাঘ' ৰাজনীতি, দর্শন, ব্যাকৰণ আদি বিভিন্ন বিষয়তে পাৰ্গত আছিল। মাঘৰ সংস্কৃত ভাষা-সাহিত্যত অগাধ পাণ্ডিত্য আছিল। মাঘ ৰচিত "শিশুপালবধম্" মহাকাব্য সংস্কৃত সাহিত্যৰ অন্য এক সম্পদ।

কালিদাসৰ পিচৰ যুগৰ কবিসকলৰ ভিতৰত "শ্ৰীহর্ষ" হৈছে অন্যতম কবি। শ্ৰীহর্ষ ৰচিত "নৈষধচৰিতম্" মহাকাব্য সংস্কৃত সাহিত্যৰ সুবৃহৎ মহাকাব্য। শ্ৰীহর্ষৰ পিতৃৰ নাম "শ্ৰীহীৰ' আৰু মাতৃৰ নাম 'মামল্লদেৱী'। শ্ৰীহর্ষ কান্যকুব্জৰ ৰজা জয়চন্দ্ৰৰ ৰাজসভাৰ ৰাজকবি আছিল। বজাৰ প্ৰেৰণাতেই তেওঁ 'নৈষধচৰিতম্' মহাকাব্য ৰচনা কৰিছিল বুলি কোৱা হয়। 'নৈষধচৰিতম্'ৰ উপৰিও শ্ৰীহর্ষই কেবাখনো গ্ৰন্থ ৰচনা কৰিছিল। কবিজনাৰ আৱির্ভাৱ কাল দ্বাদশ শতাব্দীৰ উত্তৰার্ধ বুলি অনুমান কৰা হয়।

কিৰাতার্জুনীয়ম্ ঃ

এতিয়া আপুনি ভাৰবি ৰচিত কিৰাতার্জুনীয়ম্ মহাকাব্যৰ বিষয়ে জানিব পাৰিব ভাৰবি বিৰচিত 'কিৰাতার্জনীয়ম্' মহাকাব্যখন 18 টা সর্গৰ সমষ্টি। ইয়াৰ কাহিনীভাগ মহাভাৰতৰ বনপর্বৰ পৰা লোৱা হৈছে। দেৱতাসকলৰ ৰজা ইন্দ্ৰ আৰু শিৱক সন্তুষ্ট কৰি পাণ্ডৱ অর্জুনে কেনেদৰে পাশুপাত অস্ত্ৰ লাভ কৰিছিল সেই কাহিনীকে আলম কৰি কিৰাতার্জনীয়ম্ মহাকাব্য ৰচিত হৈছে। পাশাখেলত কৌৰৱৰ হাতত পৰাজিত হৈ পাণ্ডৱসকলে দ্বৈতবনত বাস কৰাৰ পৰা মহাকাব্যখনৰ কাহিনীভাগ আৰম্ভ হৈছে।

প্ৰথম আৰু দ্বিতীয় সর্গত পাশাখেলত পৰাজিত হোৱা পাণ্ডৱসকলক দ্বৈতবনত কবিয়ে উপস্থাপন কৰি দেখুৱাইছে। তৃতীয় সর্গত মহর্ষি ব্যাসৰ পৰামর্শ মতে মধ্যম পাণ্ডৱ অর্জুনে পাশুপাত অস্ত্ৰ লাভৰ বাবে ইন্দ্ৰকীল পর্বতলৈ যোৱাৰ কথা বর্ণনা আছে। চতুর্থৰ পৰা দ্বাদশ সর্গলৈ [4 – 12] অর্জুনৰ ঘোৰ তপস্যা, শিৱৰ কিৰাত ৰূপ ধাৰণৰ বর্ণনা আছে। ত্ৰয়োদশৰ পৰা পঞ্চদশ সর্গত [13 – 15]) কিৰাত আৰু অর্জুনৰ যুদ্ধৰবর্ণনা আছে। শেষৰ তিনিটা সর্গত অর্জুনৰ বীৰত্ব আৰু কঠিন তপস্যাত প্ৰসন্ন হৈভগৱান শংকৰে অর্জুনক পাশুপাত অস্ত্ৰ প্ৰদান কৰে। অর্জুনে পাশুপাত অস্ত্ৰ লৈ যুধিষ্ঠিৰৰ ওচৰলৈ প্ৰত্যাগমন কৰাৰ লগে লগে মহাকাব্যৰ সমাপ্তি ঘটে।

ৰাৱণবধম্ ঃ

এতিয়া কিৰাতার্জুনীয়ম্ মহাকাব্যৰ পিছত আপুনি ভট্টি ৰচিত "ৰাৱণবধ" মহাকাব্যৰ বিষয়ে জানিব পাৰিব। ভট্টি ৰচিত "ৰাৱণবধ" মহাকাব্যখন ভট্টিকাব্য নামেৰে জনাজাত। ৰামায়ণৰ কাহিনীৰ আধাৰত ৰচিত এই কাব্যখন 22 টা সর্গত বিভক্ত। কাব্যখনত ৰামচন্দ্ৰৰ জন্মৰে পৰা ৰাৱণবধৰ পিছত অযোধ্যাৰ ৰজা হিচাপে ৰামচন্দ্ৰ অভিষিক্ত হোৱালৈ সকলোখিনি বর্ণিত হৈছে। ছাত্ৰক ব্যাকৰণ আৰু অলংকাৰৰ জ্ঞান দিবলৈ এই মহাকাব্যখন ৰচনা কৰা হৈছিল। কাব্যখন

চাৰিটা কাণ্ডত বিভক্ত —

1] প্ৰকীৰ্ণ কাণ্ড (1–5 সৰ্গলৈ)

2] অধিকাৰ কাণ্ড (6–9সৰ্গলৈ)

3] প্ৰসন্ন কাণ্ড (10–13সৰ্গলৈ)

4] তিঙন্ত কাণ্ড (14–22সৰ্গলৈ)

প্ৰকীৰ্ণ কাণ্ডত ৰামৰ জন্মৰপৰা বনবাসৰ কালত সীতা হৰণ হোৱালৈ কাহিনীভাগ বৰ্ণিত হৈছে। এই কাণ্ডত 'প্ৰত্যয়'ৰ বিষয়ে কোৱা হৈছে।

অধিকাৰ কাণ্ডত ব্যাকৰণৰ নিয়মসমূহ অতি সূক্ষ্মভাৱে বিচাৰ কৰা হৈছে। প্ৰসন্ন কাণ্ডত 'অলংকাৰ'ৰ বিষয়ে কোৱা হৈছে। তিঙন্ত কাণ্ডত সংস্কৃত ব্যাকৰণৰ 'নবিধ লকাৰ'ৰ বিষয়ে কোৱা হৈছে। এনেদৰে মহাকবি ভট্টিয়ে কাব্যৰ মাজেৰে ব্যাকৰণৰ বিবিধ প্ৰয়োগৰ বিষয়ে আলোচনা কৰিছে।

শিশুপালবধম্ ঃ

এতিয়া আপুনি মাঘ ৰচিত 'শিশুপালবধ' মহাকাব্যৰ বিষয়ে জানিব পাৰিব। মাঘ ৰচিত 'শিশুপালবধ' মহাকাব্যখন বিশটা (20) সৰ্গত বিভক্ত। মহাকাব্যখনৰ কাহিনীভাগ মহাভাৰতৰ সভাপৰ্ব আৰু শ্ৰীমদ্ভাগৱৎপুৰাণৰ পৰা লোৱা হৈছে। প্ৰথম সৰ্গত দেবৰ্ষি নাৰদ আৰু শ্ৰীকৃষ্ণৰ মাজত শিশুপালক বধ কৰা বিষয় লৈ আলোচনা হয়।

দ্বিতীয় সৰ্গত বলৰাম, শ্ৰীকৃষ্ণ আৰু উদ্ধৱৰ মাজত ৰাজনীতি বিষয়ক কথাৰ আলোচনা হয়।

তৃতীয় সৰ্গৰ পৰা অষ্টম সৰ্গলৈ মুঠ ছটা সৰ্গত শ্ৰীকৃষ্ণই সসৈন্যে ইন্দ্ৰপ্ৰস্থলৈ যোৱাৰ বৰ্ণনা আছে। মাজৰ ষষ্ঠ সৰ্গত ঋতু বৰ্ণনা, সপ্তম সৰ্গত বনবিহাৰ বৰ্ণনা আৰু অষ্টম সৰ্গত জলক্ৰীড়াৰ বৰ্ণনা পোৱা যায়। নৱম আৰু দশম সৰ্গ দুটাত যদুকুলৰ দম্পতীসকলৰ মাজত হোৱা কাম-ক্ৰীড়া আৰু সৌন্দৰ্য প্ৰসাধনাদিৰ বৰ্ণনা পোৱা যায়। একাদশ সৰ্গত ভগবান শ্ৰীকৃষ্ণক নিদ্ৰাৰ পৰা জগাবলৈ বৈতালিক সকলে প্ৰভাত বৰ্ণনাৰ গীত গায়। দ্বাদশ সৰ্গত শ্ৰীকৃষ্ণই সৈন্য-সামন্ত আৰু সপৰিবাৰে যমুনা নদী পাৰ হোৱাৰ দৃশ্য বৰ্ণনা কৰা হৈছে। ত্ৰয়োদশ সৰ্গত পাণ্ডবসকলে যমুনানদীৰ পাৰৰ পৰা শ্ৰীকৃষ্ণক আদৰি নিয়াৰ উল্লেখ আছে। চতুৰ্দশ সৰ্গত পিতামহ ভীষ্মৰ আজ্ঞামতে যুধিষ্ঠিৰে শ্ৰীকৃষ্ণলৈ যজ্ঞৰ আদ্যপূজা আগবঢ়ায় আৰু তেওঁলৈ প্ৰথম অৰ্ঘ্য প্ৰদান কৰে। পঞ্চদশ সৰ্গত শিশুপালৰ অত্যাচাৰিতা বৰ্ণিত হৈছে। ষোড়শ সৰ্গত দূতৰ মাধ্যমেৰে শিশুপালে ভগৱান শ্ৰীকৃষ্ণক তিৰস্কাৰ কৰাৰ কথা পোৱা যায়। সপ্তদশ সৰ্গত শিশুপালৰ বিপক্ষে কৃষ্ণৰ যুদ্ধযাত্ৰা আৰম্ভ হয়। শেষৰ তিনিটা সৰ্গত শ্ৰীকৃষ্ণ আৰু শিশু পালৰ সৈন্যৰ মাজত হোৱা যুদ্ধৰ বৰ্ণনা তথা শ্ৰীকৃষ্ণৰ সুদৰ্শন চক্ৰৰ দ্বাৰা শিশুপালৰ মস্তক হৰণ হোৱাৰ দৃশ্য বৰ্ণিত হৈছে। এনেদৰে মাঘ ৰচিত "শিশুপালবধম্" মহাকাব্যৰ সমাপ্তি ঘটিছে।

নৈষধচৰিতম্ ঃ

"শিশুপাল বধ" মহাকাব্যৰ পিছত আপুনি এতিয়া "নৈষধচৰিতম্" মহাকাব্যৰ বিষয়ে

জানিব। মহাকবি শ্রীহর্ষ ৰচিত "নৈষধ চৰিতম্" মহাকাব্যখন মহাভাৰতৰ বনপর্বৰ নল-দময়ন্তী আখ্যানৰ আধাৰত ৰচিত হৈছে। মহাকাব্যখন বাইশটা সর্গত [22] বিভক্ত। নিষাদ দেশৰ ৰজা নল আৰু বিদর্ভৰ ৰজা ভীমৰ জীয়ৰী দময়ন্তীৰ প্রেম-কাহিনীয়েই কাব্যৰ প্রধান বিষয়-বস্তু। মহাকাব্যখনৰ প্রথম সর্গত ৰজা নলৰ মৃগয়া বর্ণন, দ্বিতীয় সর্গত হংসৰদ্বাৰা দময়ন্তীৰ সৌন্দর্য্য বর্ণন তথা নলৰদ্বাৰা হংসক কুণ্ডিনপুৰীলৈ প্রেৰণ কৰাৰ বর্ণনা, তৃতীয় সর্গত দময়ন্তীৰ আগত হংসৰ দ্বাৰা নলৰ পুৰুষত্ব আৰু সৌন্দর্যৰ বর্ণনা, চতুর্থ সর্গত নলৰ দ্বাৰা দময়ন্তীৰ প্রতি থকা অনুৰাগৰ বর্ণনা, পঞ্চমসর্গত দময়ন্তীৰ সয়ম্বৰৰ আয়োজন আৰু ইন্দ্র, বৰুণ, অগ্নি তথা যমৰ দ্বাৰা ৰজা নলক অদৃশ্যভাৱে দূত হিচাপে দময়ন্তীৰ অন্তঃপুৰলৈ পঠোৱাৰ বর্ণনা, ষষ্ঠ সর্গৰ পৰা নৱম সর্গলৈ নলৰ দ্বাৰা দময়ন্তীৰ সন্মুখত চাৰিদেৱতাৰ (ইন্দ্র, বৰুণ, অগ্নি, যম) বাণী নিবেদন, দময়ন্তীৰ নলৰ প্রতি সদ্ভাব প্রদর্শন, দময়ন্তীৰ কান্দোন আৰু শেষত নলৰ দ্বাৰা দময়ন্তীৰ আগত আত্মপ্রকাশ, দশম সর্গত দময়ন্তীৰ স্বয়ম্বৰৰ বর্ণনা, দময়ন্তীৰ প্রসাধন আৰু সৌন্দর্যৰ সুন্দৰবর্ণনা, একাদশ তথা দ্বাদশ সর্গত দময়ন্তীৰ সয়ম্বৰলৈ অহা ৰজাসকলৰ সুন্দৰ বর্ণনা, ত্রয়োদশ সর্গত স্বয়ম্বৰলৈ নলৰ ৰূপ ধাৰণ কৰি অহা চাৰিওদেৱতা আৰু নলৰ (সৰস্বতীৰ দ্বাৰা) বর্ণনা, চতুর্দশ সর্গত দময়ন্তীৰ নলৰ প্রতি থকা প্রেম দেখি চাৰি দেৱতাৰ প্রকৃত স্বৰূপ ধাৰণ আৰু প্রকৃত নলক দময়ন্তীৰ পতিৰূপে বৰণ, পঞ্চদশ সর্গত দৰা-কইনাৰ (নল-দময়ন্তীৰ) প্রসাধনৰ বর্ণনা, ষষ্ঠদশ সর্গত নল-দময়ন্তীৰ বিবাহ আৰু বিবাহকালীন ভোজৰ বর্ণনা।

সপ্তদশ সর্গত স্বর্গৰ পৰা ঘূৰি অহা দেৱতাসকলৰ লগত কলিৰ কথোপকথন, অষ্টাদশ সর্গত নল-দময়ন্তীৰ প্রথম মিলনৰ সুন্দৰ বর্ণনা, তথা শেষৰ চাৰিটা সর্গত নল-দময়ন্তীৰ দৈনন্দিন ব্যৱহাৰিক জীৱন, দাম্পত্য প্রেম আদিৰ সুন্দৰ বর্ণনাৰে কাব্যখনৰ সমাপ্তি ঘটিছে।



४.७ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- प्राक्कालिदासीयकविना अश्वघोषेण 'बुद्धचरितम्' 'सौन्दरानन्दम्' च काव्यद्वयं विरचितवान्।
- अश्वघोषस्य परवर्तिकविः महाकविः कालिदासः 'कुमारसम्भवम्' 'रघुवंशम्', महाकाव्यं विरचितवान्।
- कालिदासस्य समकालिकेन महाकविना प्रवरसेनेन 'सेतुबन्धः', कुमारदासेन च 'जानकीहरणम्' महाकाव्यं विरचितम्।
- महाकविकालिदासस्य परवर्तीकाले चत्वारि महाकाव्यानि विरचितानि–
  १. भारवेः 'किरातार्जुनीयम्'
  २. भट्टिविरचितं रावणवधम्
  ३. माघस्य शिशुपालवधम्
  ४. श्रीहर्षस्य नैषधचरितम्।



४.८ ज्ञानाधिक्यम्

१) दाहालः,लोकमणि; संस्कृतसाहित्येतिहासः,चौखम्बा कृष्णदास अकादमी, वाराणसी।

२) डॉ. मिश्र, कृष्णदत्त; संस्कृत निबन्ध मकरन्दः,चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।



४.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : पद्यकाव्यं त्रिषु भागेषु विभक्तम् अस्ति।

प्रश्नः २ उत्तरम् : बुद्धचरितं सौन्दरानन्दं च।

प्रश्नः ३ उत्तरम् : सः अयोध्यानगरस्य निवासी आसीत्।

प्रश्नः ४ उत्तरम् : २८ सर्गेषुविभक्तम् अस्ति।

प्रश्नः ५ उत्तरम् : १८ सर्गेषु विभक्तम्।

प्रश्नः ६ उत्तरम् : कालिदासः, २२ सर्गेषु विभक्तम् अस्ति।

प्रश्नः ७ उत्तरम् : नवदशः (१९)सर्गाः सन्ति, नवत्रिंशत् (२९) राजानः वर्णिताः।

प्रश्नः ८ उत्तरम् : प्रवरसेनेन रचितं, १५ सर्गेषु विभक्तम् अस्ति।

प्रश्नः ९ उत्तरम् : जानकीहरणम्, २५ सर्गेषु विभक्तम् अस्ति।

प्रश्नः १० उत्तरम् : रामायणात्।

प्रश्नः ११ उत्तरम् : रघुः।

प्रश्नः १२ उत्तरम् : रावणवधः।

प्रश्नः १३ उत्तरम् : २० सर्गाः।

प्रश्नः १४ उत्तरम् : १८ सर्गाः।

प्रश्नः १५ उत्तरम् : महाभारतस्य वनपर्वणः।

प्रश्नः १६ उत्तरम् : भगवान् श्रीकृष्णः।



४.१० अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: 'बुद्धचरितम्' महाकाव्यं केन लिखितम्?

प्रश्नः २: 'रघुवंशम्' महाकाव्ये कति सर्गाः सन्ति?

प्रश्नः ३: सेतुबंधः केन विरचितम् ?

प्रश्नः ४: 'किरातार्जुनीयम्' महाकाव्ये कति सर्गाः सन्ति ?

प्रश्नः ५: 'शिशुपालवधम्' कस्य रचना वर्तते ?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

प्रश्नः १: कालिदासीययुगीयमहाकाव्यानां संक्षिप्तः परिचयो लिखन्तु।

प्रश्नः २: शिशुपालवधमहाकाव्यस्य विषयवस्तु संक्षेपेण लिखन्तु।

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १: 'रघुवंशम्' इति महाकाव्यस्य प्रत्येकानां सर्गानां विषयवस्तु संक्षेपेण लिखन्तु।

प्रश्नः २: कालिदासोत्तरमहाकाव्यानां संक्षेपेण परिचयं लिखन्तु।

*** ***** ***

अध्यायः ५ : नाटकम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

५.१ उद्देश्यम्

५.२ परिचयः

५.३ नाटकस्य उत्पतिः

५.४ नाटकस्य विकासः

- ५.४.१ कालिदासस्य प्राक्कालीयनाटकानि
- ५.४.२ कालिदासीयनाटकानि
- ५.४.३ कालिदासोत्तरनाटकानि

५.५ अध्यायस्य असमीयाभाषायां सारांशः

५.६ अध्यायात् किमवगतम्

५.७ ज्ञानाधिक्यम्

५.८ अग्रगत्याः निरूपणम्

५.९ अभ्यासप्रश्नाः

५.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- संस्कृतनाट्योत्पत्तिविषये ज्ञातुं शक्नुवन्ति।
- संस्कृतनाटकस्य विकासविषये ज्ञातुं शक्नुवन्ति।
- भासस्य नाटकानां विषये ज्ञातुं शक्नुवन्ति।
- कालिदासस्य नाट्यविवरणं ज्ञातुं शक्नुवन्ति।
- कालिदासोत्तरयुगीयनाटकानां परिचयं ज्ञातुं शक्नुवन्ति।

५.२ परिचयः

अत्र संस्कृतनाट्यसाहित्यस्य परिचयात्मकम् अध्ययनं भविष्यति। तत्र प्रथमं संस्कृतनाटकस्य उत्पत्तिज्ञानं तदनन्तरञ्च संस्कृतनाटकस्य विकासधारा विचार्यते। संस्कृतनाटकस्य विकासस्तावत् भासस्य नाटकचक्रमस्ति। तेषां परिचयात्मकाध्ययनादनन्तरं कालिदासस्य नाटकानां परिचय अत्र उपस्थाप्यते। कालिदासोत्तरनाट्यकाराणां नाट्यकृतिरपि अत्र उल्लिखितमस्ति। एतद् सर्वं भवन्तः ज्ञातुं प्रभवति।

५.३ नाटकस्य उत्पत्तिः

संस्कृतनाटकस्य उत्पत्तिविषये पण्डितानां मतभेदो दृश्यते। पाश्चात्यपण्डितानां मतानुसारं भारतीयनाट्यकलाया आविष्कारो वैदिककालादेव जायतेति। भारतीयपरम्परानुसारं देवतानां मनोसन्तुष्टिकारणाद् ब्रह्मणा नाट्यवेदस्य उत्पतिः कृता। ऋग्यजुःसामाथर्वचतुर्वेदेभ्यः रसं संगृह्य पञ्चमवेदत्वेन नाट्यस्य सृष्टिः कृता।

कस्यचिन्मतानुसारं मृतवीराणां कृते श्रद्धाञ्जलिज्ञापनावसरे कृतानुष्ठाने अभिनयं कुर्वन्ति, जनाः तस्मादेव नाट्योत्पत्ति इति मन्यन्ते। इतोऽपि एकस्य पण्डितस्य मतं तु तावत् प्राकृतिकपरिवर्तनं जनसमक्षं प्रत्यक्षीकरणाय नाट्यस्य सृष्टिः जातेति। अन्यत् तु जर्मनपण्डितमतानुसारं पुत्तलिकानृत्यात् नाटकस्य उद्भव भवतीति। पाश्चात्यपण्डितानां मतानुसारं पश्चिमीदेशेषु मईमासि नृट्यगानादिमाध्यमेन 'मेपोल' उत्सवः परिपाल्यते। लोकनृत्यस्य अस्य भारतवर्षस्य इन्द्रध्वजोत्सवेन सादृश्यं वर्ततेति आख्याने उपलभ्यते। तस्मादेव नाटकस्य उत्पत्तिरिति मन्यते। परन्तु तत्समीचीनं नास्ति।

अन्येषां केषाञ्चित् मतेन तु कृष्णलीलामाधारिकृत्य संस्कृतनाटकोत्पत्तिरिति। एकस्य जर्मनविदूषः मतानुसारं तु संस्कृतनाटके ग्रीक्प्रभावो दृश्यते। संस्कृतनाटके व्यवहृतयोः 'यवनी' 'यवनिका' च शब्दयोः भारतीयसंस्कृतनाट्यसाहित्ये ग्रीकस्य प्रभावः परिलक्ष्यते। रङ्गमञ्च-प्रसाधनकक्षयोः मध्यावृतवस्त्रस्य नाम 'यवनिका' परन्तु ग्रीकनाटके तद् नैव दृश्यते। अतः नाट्योत्पतिविषये एतदपि सत्यं न वर्तते।

एवं दृश्यते यत् भारतीयसाहित्याधारितं संस्कृतनाटकम्। वैदिकसाहित्यादेव नाटकस्य उत्पत्तिरिति वक्तुं शक्यते। एवञ्च कालक्रमेण परवर्तिनाट्यकाराणां प्रभावेन नाटकस्य समृद्धिः जायमाना वर्तते।

५.४ नाटकस्य विकासः

संस्कृतनाटकं त्रिषु भागेषु विभज्यते-

१. प्राक्कालिदासीयकालः
२. कालिदासीययुगः
३. कालिदासोत्तरयुगः

५.४.१ कालिदासस्य प्राक्कालीयनाटकानि

संस्कृतसाहित्ये कालिदासस्य प्राक्कालीयनाटकं नाम भासस्य नाटकानि। भासस्य त्रयोदशनाटकानि उपलभ्यन्ते -

१. मध्यमव्यायोगम्
२. पञ्चरात्रम्

३. दूतवाक्यम्
४. दूतघटोत्कचः
५. कर्णभारम्
६. उरुभङ्गम्
७. प्रतिमा
८. अभिषेकम्
९. बालचरितम्
१०. प्रतिज्ञायौगन्धरायणम्
११. स्वप्नवासवदत्तम्
१२. चारुदत्तम्
१३. अविमारकं च।

एतेषु क्रमेण षट्नाटकानि महाभारताधारितानि। प्रतिमा अभिषेकनाटकञ्च रामायणाश्रितम्। बालचरितनाटकं हरिवंशाधारितम्, प्रतिज्ञायौगन्धरायणं स्वप्नवासवदत्तञ्च बृहत्कथाश्रितं वर्तते। यद्यपि भासस्य नाटकचक्रं सर्वजनविदितं नासीत्। परन्तु, १९०९ तमे वर्षे महामहोपाध्याय टी. गणपतिशास्त्री केरलराज्यस्य 'त्रिवान्द्रम्' इति स्थाने नाटकानां ३०० वर्षं यावत् प्राचीनं पाण्डुलिपिः अप्राप्यत। विदूषां मतानुसारं भासस्य समयः ४५०-३७० ख्रिष्टपूर्वमिति निर्धारितः।

१. मध्यमव्यायोगम्

इदम् एकाङ्की नाटकमस्ति। नाटकेऽस्मिन् हिडिम्बा-नामराक्षस्या सह भीमस्य प्रणयः घटोत्कचो नाम पुत्रद्वारा चिर-विरहितमयोस्तयोः सङ्गश्च वर्णितोऽस्ति। तयोः मिलनमेव नाटकस्य मूलविषयवस्तु अस्ति।

२. पञ्चरात्रम्

नाटकेऽस्मिन् त्रयोऽङ्काः सन्ति। महाभारतस्य विराट्पर्वणि वर्णिताः विषया अत्र सन्ति। पञ्चरात्रेः कल्पिता कथा। द्रोणेन कौरवाणां यज्ञे आर्यत्वं कृतम्, दक्षिणायां स पाण्डवानां राज्यं याचितवान्। दुर्योधनः द्रोणाचार्यं कथयति यद् यदि पाण्डवाः पञ्चदिनाभ्यन्तरे मिलेयुः तर्हि राज्यम् अर्द्धं तेभ्यः दास्यामि। द्रोणाचार्यसाहाय्येन अभिमन्योः सङ्केतः प्राप्यते। तस्य उत्तरया सह विवाहो भवति। पाण्डवेभ्यः दुर्योधनः राज्यमर्द्धं प्रयच्छति।

३. दूतवाक्यम्

महाभारताधारितं नाटकमिदम् एकाङ्की अस्ति। नाटकेऽस्मिन् भूतस्य श्रीकृष्णस्य सदाशयता सदैव दुर्योधनस्य अभिमानित्वं वर्णितमस्ति। विषयवस्तुरूपेण अत्र पञ्चपाण्डवाः सन्धिप्रस्तावं प्रेषयन्ति एवञ्च श्रीकृष्णं दूतरूपेण कौरवपार्श्वं प्रेषयन्ति। तत्र च कौरवराजसभायां श्रीकृष्ण दुर्योधनयोः मध्ये विवादो जायते तत्रैव श्रीकृष्णः विश्वरूपं

धारयति। धृतराष्ट्रेण श्रीकृष्णः शान्तो भवति। पुनश्च श्रीकृष्णः पाण्डवशिविरमागच्छति।

४. दूतघटोत्कचः

इदं नाटकमपि महाभारताधारितं वर्तते। एकाङ्कीनाटकेऽस्मिन् हिडिम्बा-भीमयोरात्मनः घटोत्कचस्य महाभारतीयचरितं वर्णितम्। नाटकस्य विषयवस्त्वनुसारं जयद्रथादिसप्तवीरा अर्जुनपुत्रम् अभिमन्युम् अन्यायपूर्वकं वधादनन्तरं तत्प्रतिशोधरूपेण अर्जुनः जयद्रथं हन्तुं प्रतिज्ञां करोति स्म। तदा एव श्रीकृष्णः हिडिम्बापुत्रघटोत्कचं दूतरूपेण कौरवाणां विपदसम्बन्धिवार्तां राजसभां प्रति प्रेषयति। एवञ्च वादविवादमाध्यमेन तां वार्तां सर्वेषां समक्षं प्रकट्य प्रत्यागच्छति।

५. कर्णभारम्-

नाटकमिदम् एकाङ्की वर्तते। नाटकेऽस्मिन् कर्णस्य चरितमुदात्तं वर्णितम्। कर्णेन कवचकुण्डले दत्ते देवराजेन्द्राय। देवराजेन्द्रात् कर्णः दिव्यकवचकुण्डलं लभते।

६. उरुभङ्गम्-

एकाङ्किनाटकेऽस्मिन् प्रियापरिभवप्रतप्तेन भीमेन गदायुद्धे दुर्योधनस्य जङ्घो भग्नो भवति। एवं दुर्योधनस्य मृत्यु अपि भवति। संस्कृतसाहित्ये शोकान्तनाटकस्य इदमेकं निदर्शनमस्ति। युद्धस्य दृश्यं प्रदर्श्य नाटकस्य शास्त्रीयनियमानाम् अतिक्रमणं कृतम्।

७. प्रतिमानाटकम्-

नाटकेऽस्मिन् सप्त अंकाः सन्ति। अत्र रामचन्द्रस्य वनवासाद् रावणबधपर्यन्तं कथा वर्णिता। अस्य कथा रामायणी कथा। रामस्य विरहव्यथया निपीडितस्य महाराजस्य दशरथस्य मृत्योरनन्तरं रघुवंशीयदेवमन्दिरे तस्यापि प्रतिमा स्थापिता। मातुलगृहात् प्रत्यागतः भरतः देवमन्दिरे निजपितुः दशरथस्य प्रतिमामवलोक्य चकितो भृशं दुःखितश्च भवति। अनेकाः घटनाः नाटकेऽस्मिन् रामायणाद् भिन्नाः सन्ति। स्थापितानां प्रतिमानामत्र उल्लेखो वर्तते, अतः एव नाटकस्यास्य नामकरणं प्रतिमानाटकमिति। नाटकेऽस्मिन् रङ्गभूमौ दशरथस्य मृत्युरपि प्रदर्शितः, यत् भरतनाट्यशास्त्रविरुद्धम्।

८. अभिषेकनाटकम् -

नाटकेऽस्मिन् षट् अङ्काः सन्ति। अभिषेकनाटके किष्किन्धाकाण्डस्य, सुन्दरकाण्डस्य, युद्धकाण्डस्य च (बालिबधादारभ्य रामराज्याभिषेकान्ता) कथा वर्णिता। अत एव अस्य नाटकस्य 'अभिषेकनाटकम्' नामकरणमिति। अनेन प्रकारेण नाटकेऽस्मिन् बालिनः वधः रङ्गभूमिः प्रदर्शिता। इयं घटना नाट्यशास्त्रस्य नियमविरुद्धा।

९. बालचरितम्-

कृष्णकथामूलके 'बालचरितम्' नाटके पञ्च अंकाः सन्ति। श्रीमद्भागवताधारेण श्रीकृष्णजन्मदिवसादारभ्य कंसबधान्ता कथा नाटकेऽस्मिन् वर्णिता। नाटकेऽस्मिन्नपि रङ्गभूमेः युद्धस्य कंसवधस्य दृश्यं प्रदर्श्य नाटकस्य शास्त्रीयनियमानामतिक्रमणं कृतम्।

१०. प्रतिज्ञायौगन्धरायणम्-

अस्य नाटकस्य चत्वार एव अङ्का उपलभ्यन्ते। कदाचित् प्रद्योतनामकः नरपतिः स्वरसान्मृगयायै कमपि वनोद्देश्यमागतं वत्सराजमुदयनं गजमृगयापराधेन च्छलाद्वन्दीकृतमात्मनोऽन्यः पुरमानीयः वासवदत्तावीणाशिक्षणे नियुक्तवान्। वृत्तान्तमिदं ज्ञात्वा वत्सराजस्योदयनस्य चतुरो मन्त्री यौगन्धरायणः स्वामिनमुदयनं मोचयितुं प्रतिज्ञां कृतवान्। अत एवास्य नाटकस्य नामकरणं प्रतिज्ञायौगन्धरायणनाटकमिति। तदनन्तरं यौगन्धरायण उदयनं मुक्तं कारितवान्। वासवदत्तामपि कपटपूर्वकमपहृतवान्। नाटकेऽस्मिन् मन्त्रिणो यौगन्धरायणस्य नीतिरुदयनवासवदत्तयोः प्रणयकथा वर्णिता।

११. स्वप्नवासवदत्तम्-

नाटकेऽस्मिन् षट् अङ्काः वर्तन्ते। भासस्य निजनाट्यकृतिषु स्वप्नवासवदत्तं सफला श्रेष्ठा च नाट्यकृतिरस्ति। उज्जयिन्याः राज्ञः महासेनप्रद्योतस्य पुत्रीं वासवदत्तामपहृत्य राजोदयनः कौशाम्बीं स्वराजधानीमागच्छति। ततः वत्सराजस्योदयनस्य प्रमादतया आरुणिनामा तस्य शत्रुः राज्यस्य भागमेकमपहरति। स्वराज्यप्राप्तुकामः उदयनस्य सचिवः यौगन्धरायण आरुणिं पराजेतुं मगधराजदर्शकस्य सहायतामिच्छति। यदि मगधराजदर्शकस्य भगिन्या पद्मावत्या सहोदयनस्य विवाहो भवेत्, तर्हि मगध- राजस्य विशालसैन्यसहायतया शत्रुमारुणिं पराजित्य स्वराज्यं प्राप्तुं शक्यत इति विचार्य यौगन्धरायणेन लावाणकग्रामे मृगयानिष्क्रान्ते राजनि अग्निः प्रज्वालितः। तत्र मन्त्रिसमत्या वासवदत्ता लावणकग्रामेऽग्निदाहे दग्धा, वासवदत्तां परिरक्षितुकामः यौगन्धरायणोऽपि अग्नौ पतित' इति यौगन्धरायणः प्रचार्यते। विधानमिति विधाय यौगन्धरायण परिव्राजकवेषं धारयित्वा अवन्तिकावेषधारिणीं वासवदत्तां पद्मावत्याः हस्ते न्यासरूपेण परित्यजति तदा तस्य कौशलेन उदयनस्य विवाहः पद्मावत्या सह जातः। तदनन्तरमपि राजा वासवदत्तां न विस्मरति। पतिप्रणयमप्राप्य पद्मावती शिरोवेदना पीडिता भवति। वृत्तान्तमिदं ज्ञात्वा राजा पद्मावती द्रष्टुं समुद्रगृहं गतम्। राज्ये पद्मावतीं नावलोक्य तस्या एव शय्यामधिशेते। वासवदत्तापि वृत्तान्तमिदं श्रुत्वा तत्र गच्छति। उदयनः स्वप्ने वासवदत्तां पश्यति, ततः तां बहुशः स्मरति। उदयनस्य अन्यः सचिवः रुमण्वान् आरुणिं पराजित्य स्वराज्यं प्रापयति। तदनन्तरं वासवदत्तया सहोदयनस्य पुनर्मिलनं भवति। स्वप्ने वासवदत्तामुदयनः दृष्टवान्। अतः एवास्य नाटकस्य नामकरणं 'स्वप्नवासवदत्तम् इति। नाटकेऽस्मिन्नपि उदयनस्य शयनस्य दृश्यं रङ्गभूमौ प्रदर्श्य नाटकस्य शास्त्रीयनियमानामतिक्रमणं कृतम्।

१२. अविमारकम् -

नाटकेऽस्मिन् षट् अङ्काः सन्ति। गुणाढ्यकृतबृहत्कथातः नाटकस्यास्य कथानकं गृहीतम्। सौवीरराजपुत्रस्याविमारकस्य कुन्तीभोजकुमार्या कुरङ्गया सह प्रणयकथात्र वर्णिता।

१३. चारुदत्तम्-


नाटकेऽस्मिन् चत्वार अङ्काः सन्ति। नाटकेऽत्र चारुदत्ताभिधेयस्य उदारब्राह्मणस्य

उज्जयिन्याः प्रसिद्धया सुन्दर्या वेश्यया सह प्रणयः प्रायो वर्णितः। मृच्छकटिकनाटकस्य उपजीव्यमिदं मन्यते।



ज्ञातव्यम्

संस्कृतनाटकानां स्वकीयवैशिष्ट्यं परिलक्ष्यते। संस्कृतनाटके नान्दीविधानं मङ्गल- परिसमाप्तौ प्रभावयति। नाटकान्ते च भरतवाक्येन कल्याण-कामना क्रियते। नाटकेषु विभिन्नानां भाषाशैलीनां प्रयोगो दृश्यते। संस्कृतनाटके अङ्गीरसत्वेन वीररसः शृङ्गाररसो वा प्रधानरूपेण विराजते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: संस्कृतनाटकस्य विकासधारा कति अध्यायेषु विभज्यते ?

.....

प्रश्नः २: भासेन कति नाटकानि विरचितानि ?

.....

प्रश्नः ३: भासस्य सर्वोत्कृष्टं नाटकमस्ति-

१. अभिषेकम्

२. दूतवाक्यम्

३. स्वप्नवासवदत्तम्

प्रश्नः ४ : अभिषेकनाटकस्य आधारग्रन्थः कः ?

.....

प्रश्नः ५ : दूतवाक्यनाटकस्य उत्सः कः ?

.....

५.४.२ कालिदासकालीयनाटकानि -

कविषु कालिदासः श्रेष्ठः। एवञ्च नाट्यकारेषु अपि श्रेष्ठो नाट्यकारो महाकविकालिदासः। महाकविकालिदासेन त्रीणि नाटकानि विरचितानि। तानि यथा- १. मालविकाग्निमित्रम् २. विक्रमोर्वशीयम् ३. अभिज्ञानशाकुन्तलम्। तथा च 'मालविकाग्निमित्रम्' नाटकं सर्वप्रथमा रचना 'अभिज्ञानशाकुन्तलम्' नाटकं संस्कृतनाटकेषु सर्वश्रेष्ठं नाटकं सर्वजनस्वीकृतम्।

'मालविकाग्निमित्रम्' नाटके पञ्च अङ्काः सन्ति। नाटकस्य अस्य नायकः अग्निमित्रं नायिका च मालविका। 'अग्निमित्रम्' मौर्यराजबृहद्रथस्य सेनापतेः पुष्यमित्रस्य पुत्र आसीत्। द्वयोः प्रेमकथा एव नाटकस्य विषयवस्तु। द्वयोः विवाहेन नाटकस्य परिसमाप्तिः जायते।

'विक्रमोर्वशीयम्' कालिदासस्य द्वितीयं नाटकमस्ति। नाटकमिदं पञ्चाङ्केषु विभक्तिमस्ति। नाटकस्य अस्य नायकः पुरुरवा नायिका च उर्वशी अस्ति। चन्द्रवंशीयराजा पुरुरवा एवञ्च उर्वशी द्वयोः प्रेमकथा अत्र विषयवस्तुरूपेण वर्तते।

कालिदासस्य 'अभिज्ञानशाकुन्तलम्' नाटक सर्वश्रेष्ठम् अन्तिमञ्च नाटकम्। सप्त अङ्काः सन्ति नाटकेऽस्मिन्। नाटकस्यास्य नायिका शकुन्तला, नायकः च दुष्यन्तः। द्वयोः प्रेमकथा वर्णिता अस्ति। नाटकस्य कथा महाभारताश्रिता वर्तते। महाभारतस्य आदिपर्वणि शाकुन्तलोपाख्यानमस्ति। नाटकस्यारम्भे मृगयार्थी राजा दुष्यन्तः कन्वमुनेः आश्रमे प्रविशति। एवञ्च तत्रैव शकुन्तलायाः दर्शनमपि भवति। तदनन्तरम् ऋषीणाम् अनुग्रहेण आश्रमे यज्ञार्थं निवसति। तथैव द्वयोः प्रेमसम्बन्धः जायते। शकुन्तलायाः सखीद्वययोः अनसूया- प्रियम्वदयोः उत्साहेन दुष्यन्त-शकुन्तलयोः स्नेहाधिकं जायमानमासीत्। एवम् आश्रमे एव द्वयोः गान्धर्वविवाहो जातः। चतुर्थाङ्के राजा आश्रमे शकुन्तलां त्यक्त्वा स्वराज्यं प्रत्यावर्तनं करोति। तत्र च शकुन्तला दुष्यन्तप्रेमनिमग्ना सती दुर्वासोपस्थितिं नावगतवती। तदा दुर्वासामुनिना अभिशापः प्रदत्तः यत् तस्याः मनसि यः स्थानमधिकरोति तं विस्मरिष्यतीति स्मृतिचिह्नमाध्यमेन तस्य स्मरणमागमिष्यति इति उक्त्वा गच्छति। तदानीमेव कण्वमुनिरपि आश्रमम् आगत्य शकुन्तलां तदवस्थायां दृष्ट्वा शीघ्र पतिगृहं प्रेषयितुम् इच्छति। पञ्चमाङ्के शकुन्तला दुष्यन्तराजसभायाम् उपस्थिता अभवत्। परन्तु, दुर्वासाशापकारणाद् दुष्यन्तः शकुन्तलां विस्मृतवान्। राजप्रदताङ्गुलीयकमपि शकुन्तलायाः हस्ते नासीदिति कारणात् शकुन्तला उपायविहिना सभामध्ये अपमानिता अभवत्। षष्ठाङ्के राजा कस्यचित् धीवरस्य हस्ते शकुन्तलायाः तदङ्गुलीयकं लब्ध्वा दुष्यन्तस्य मनसि सर्वं वृत्तान्तं पुनः स्मृतिपटले आगतम्। नाटकस्य अन्ते राजा दुष्यन्तः स्वपुत्रं सर्वदमनं मिलति। एवमेव द्वयोः पुनर्मिलनमपि भवति।



अग्रगत्याः निरीक्षणम्

प्रश्नः ६: कालिदासेन कति नाटकानि विरचितानि तासां नामानि कानि ?

.....

प्रश्नः ७: मालविकाग्निनाटके कति अङ्काः सन्ति ?

.....

प्रश्नः ८: 'विक्रमोर्वशीयम्' नाटकस्य नायकः कः नायिका च का ?

.....

प्रश्नः ९: अभिज्ञानशाकुन्तलम्' नाटकस्य नायकः कः ?

.....

प्रश्नः १०: अभिज्ञानशाकुन्तलनाटके कति अङ्काः सन्ति ?

.....


५.४.३ कालिदासोत्तरयुगीयनाटकानि -

कालिदासोत्तरयुगीयनाटकं तावत् शूद्रकरचितं 'मृच्छकटिकम्' नाटकमेव प्राथम्येन उल्लेखनीयम्। अयं सुप्रसिद्धः प्रकरणग्रन्थोऽस्ति। शूद्रकस्य कालविषये पण्डितानां मतभेदो दृश्यते। मृच्छकटिकनाटकं दशाङ्केषु विभक्तमस्ति। इदं भासस्य चारुदत्तनाटकाधारितं वर्तते। चारुदत्त-वसन्तसेनयोः प्रणयवृत्तान्तमेव वर्ण्यविषयः।

कालिदासोत्तरयुगीयनाटकेषु उल्लेखनीयं नाटकमेकं मुद्राराक्षसनाटकम्। अस्य प्रणेता विशाखादत्त अस्ति। नाटकमिदं सप्ताङ्केषु विभक्तमस्ति। नाटकमिदं पुरुषप्रधानमस्ति। अत्र स्त्रीचरित्रं नोपलभ्यते। एतत् राजनीतिमूलकं नाटकमस्ति। अत्र 'चाणक्य' मुख्यचरित्रं वर्तते। असौ नन्दवंशं पराजितं कृत्वा चन्द्रगुप्तमौर्यं मगधसिंहासनमुपवेशयति। मन्त्रिणं राक्षसं कौशलपूर्वकं स्वपक्षमानेतुं चाणक्यः प्रयासमकरोत् तथा समर्थोऽपि भवति। एष एव नाटकस्य विषयः।

संस्कृतनाट्यसाहित्ये कालिदासादनन्तरं भवभूतेः स्थानं वर्तते। नाट्यकारः भवभूतिः त्रीणि नाटकानि विरचितवान्। तद्यथा - १. मालतीमाधवम् २. महावीरचरितम् ३. उत्तररामचरितं च। महावीरचरितं नाटकं सप्ताङ्केषु विभक्तमस्ति। अस्य कथा रामायणाश्रिता अस्ति। नाटकेऽस्मिन् रामस्य विवाहः, रामस्य वनवासः, सीताहरणम्, रावणवधः, राज्याभिषेकादि-घटनाः वर्णिताः सन्ति। महावीरचरितनाटकं भवभूते आद्यसृष्टि उत्कृष्टं नाटकञ्च। 'मालतीमाधवम्' नाटकं भवभूतेः द्वितीयसृष्टिः। एतत् प्रकरणग्रन्थो वर्तते। प्रकरणग्रन्थस्य कथा कविकल्पिता। नाटकमिदं दशाङ्केषु विभक्तमस्ति। मालती-माधवयोः प्रेमकथा एव प्रधानालोच्यविषयोऽस्ति। 'उत्तररामचरितम्' नाटकं भवभूतेः सर्वश्रेष्ठम् अन्तिमं च नाटकम्। सप्ताङ्केषु विभक्तं नाटकमिदम्। रामायणस्य उत्तरकाण्डाधारितं नाटकम् इदम्। रावणवधादनन्तरं रामस्य सिंहासनारूढे सति सीताविसर्जनम्, अश्वमेधयज्ञानुष्ठानम्, लव-कुशयोः वीरत्वादिवर्णनं नाटकस्य आलोच्यम्।

कालिदासोत्तरयुगीयनाटकेषु भट्टनारायणेन रचितं 'वेणीसंहारम्' नाटकम् अन्यतमम्। नाटकमिदं षट्षु अङ्केषु विभक्तमस्ति। अस्य कथा महाभारताधारितम्। भीमः, दुर्योधनः, अश्वत्थामा, युधिष्ठिरः श्रीकृष्णश्च नाटकस्य प्रमुखपुरुषचरित्रम्, एवं च द्रौपदी भानुमती च अन्यतमं स्त्रीचरित्रम्। कौरवराजसभायां दुःशासनेन अपमानितत्त्वात् अपमानस्य प्रतिशोधपर्यन्तं द्रौपदी वेणीं नैव बध्नाति इति प्रतिज्ञां कृतवती। भीमः दुर्योधनस्य उरुभङ्गं कृत्वा सरक्तहस्तेन द्रौपद्याः वेणीसंहारं कृतवान्। अत एव नाटकस्य नामकरणं वेणीसंहारं जातम्।



अग्रगत्याः निरीक्षणम्

प्रश्नः ११: ''मृच्छकटिकम्'' नाटकं प्रकरणं वा ?

.....

प्रश्नः १२: राजा शूद्रकः ..... शास्त्रे पारङ्गत आसीत्।

प्रश्नः १३: ''मुद्राराक्षसम्'' नाटकस्य रचयिता कः ?

.....

प्रश्नः १४: भवभूतिः कति नाटकानि लिखितवान् ? (समीचीनमुत्तरं लिखत)

क) द्वे (ख) त्रीणि (ग) एकं (घ) एतेषु कश्चन अपि नास्ति।

.....

प्रश्नः १५: भट्टनारायणस्य नाटकस्य नाम किम् ?

.....

५.५ अध्यायस्य असमीयाभाषायां सारांशः

কালিদাসৰ পূৰ্বযুগৰ নাটক বুলিলে ভাসৰ ৰচিত নাটকসমুহকে অনুমান কৰিব পাৰি। ভাসে সৰ্বমুঠ তেৰখন নাটক ৰচনা কৰিছিল। সেই সমূহৰ নাম হ'ল 1] মধ্যমব্যায়োগম্ 2] পঞ্চৰাত্রম্ 3] দূতবাক্যম্ 4] দূতঘটোৎকচঃ 5] কর্ণভাৰম্ 6] ঊৰুভংগম্ 7] প্রতিমা 8] অভিষেকম্ 9] বালচৰিতম্ 10] প্রতিজ্ঞাযৌগন্ধৰায়ণম্ 11] স্বপ্নবাসবদত্তা 12] অবিমাৰকম্ আৰু 13] চাৰুদত্তম্।

এই নাটকসমূহৰ প্রথম ছয়খন মহাভাৰতৰ আধাৰত ৰচিত। 'প্রতিমা' আৰু 'অভিষেক' ৰামায়ণৰ আধাৰত ৰচিত। বালচৰিতৰ মূল আধাৰ 'হৰিবংশ'। 'প্রতিজ্ঞা যৌগন্ধৰায়ণ' আৰু 'স্বপ্নবাসবদত্তা' বৃহৎ কথাৰ আধাৰত ৰচিত। 'অবিমাৰক' আৰু 'চাৰুদত্ত'ৰ বিষয়বস্তুৰ আধাৰ গ্রন্থ এতিয়ালৈ গম পোৱা নাযায়। ভাসৰ দ্বাৰা ৰচিত উক্ত নাটকসমূহৰ বিষয়ে জনসমাজ বহুদিনলৈ জ্ঞাত নাছিল। কিন্তু 1909 চনত মহামহোপাধ্যায় গণপতি শাস্ত্রীয়ে বর্তমানৰ কেৰেলা ৰাজ্যৰ ত্রিবান্দ্রম্ নামৰ ঠাইত এই নাটকসমূহৰ 300 বছৰ পুৰণি পাণ্ডুলিপি উদ্ধাৰ কৰে। গ্রন্থসমূহৰ সমালোচনাত্মক পৰীক্ষা কৰি তথা নাটক কেইখনৰ বহুতো সাদৃশ্য দেখি শাস্ত্রী মহোদয়ে এই সিদ্ধান্তত উপনীত হয় যে এই তেৰখন গ্রন্থৰ ৰচক একেজনেই আৰু ৰচকজন হৈছে মহাকবি ভাস।

পণ্ডিতসমাজে বিভিন্ন যুক্তিৰ আধাৰত ভাসৰ সময়ৰ উচ্চতম সীমা খৃঃ পুঃ 450 আৰু অন্যতম সীমা খৃঃ পূঃ 370 চন বুলি ধাৰণা কৰে।

1] মধ্যমব্যায়োগম্ ঃ মহাভাৰতৰ আধাৰত ৰচিত "মধ্যমব্যায়োগম্" নামৰ নাটকখন এটা অংকৰ। নাটখনত হিড়িম্বা পুত্র ঘটোৎকচে মাকৰ আদেশ মতে ভোজনৰ বাবে এজন ব্রাহ্মণ সন্তানক বধ কৰিবলৈ উদ্যত হোৱা সময়তে দৈবক্রমে মধ্যম পাণ্ডৱ ভীমৰে সৈতে

ভেটা-ভোট হয়। দুয়োৰে মাজত (ভীম আৰু ঘটোৎকচ) তুমুল যুদ্ধ হয় আৰু শেষত দুয়ো হিড়িম্বাৰ ওচৰ পায়। মাকে (হিড়িম্বাই) পিতা-পুত্রক (ভীম আৰু ঘটোৎকচক) পৰিচয় কৰি দিয়ে আৰু ফলত ব্রাহ্মণ সন্তানজন আসন্ন মৃত্যুৰ মুখৰপৰা ৰক্ষা পৰে। আচলতে ব্রাহ্মণ সন্তান হৰণৰ মাধ্যমেৰে হিড়িম্বা আৰু ভীমৰ মিলনেই হৈছে এই নাটকৰ মূল বিষয়বস্তু।

2] পঞ্চৰাত্রম্ ঃ মহাভাৰতৰ বিৰাটপর্বৰ ঘটনাক আশ্রয় কৰি "পঞ্চৰাত্রম্" নামৰ নাটকখন ৰচিত হৈছে। ঘটনা অনুসৰি দুর্যোধনে যজ্ঞ এটি সমাপন কৰি দ্রোণাচার্য্যক দক্ষিণা দিবলৈ ইচ্ছা প্রকাশ কৰে। দ্রোণে এই সুযোগতে দক্ষিণা স্বৰূপে পাণ্ডৱসকলক আধা ৰাজ্য ঘূৰাই দিয়াৰ প্রস্তাৱ কৰে। পাঁচ ৰাতিৰ ভিতৰতে পাণ্ডৱসকলক বিচাৰি দিব পাৰিলে দুর্যোধনে দ্রোণৰ প্রস্তাৱ কার্য্যত ৰূপায়িত কৰিব বুলি মান্তি হয়। দ্রোণই বহু যত্ন কৰি বিৰাট নগৰত পাণ্ডৱসকলৰ অনুসন্ধান পালে আৰু চর্ত অনুসৰি ৰাজ্যৰ আধা অংশ দান কৰে। এনেদৰে তিনিটা অংকত বিভক্ত "পঞ্চৰাত্রম্" নাটকৰ সমাপ্তি ঘটে।

3] দূতবাক্যম্ ঃ মহাভাৰতৰ আধাৰত ৰচিত "দূতবাক্যম্" নাটকখন এটা অংকত ৰচিত। এই খনক ভাসৰ দ্বাৰা ৰচিত প্রথম নাটক বুলি কোৱা হয়। ঘটনাৰ বিষয়বস্তু অনুসৰি পঞ্চপাণ্ডৱে সন্ধিৰ প্রস্তাৱ আগবঢ়াই শ্রীকৃষ্ণক দূত হিচাপে কৌৰৱৰ ওচৰলৈ পঠায়। কৌৰৱৰ ৰাজসভাত শ্রীকৃষ্ণ আৰু দুর্যোধনৰ মাজত তর্ক-বিতর্ক হয় আৰু দুর্যোধনে শ্রীকৃষ্ণক বন্দী কৰিবলৈ চেষ্টা কৰাত তেওঁ বিশ্বৰূপ ধাৰণ কৰে। তেতিয়া ধৃতৰাষ্ট্রই শ্রীকৃষ্ণক স্তুতি কৰি শান্ত কৰিবলৈ সক্ষম হয়। এনেদৰে শান্তিৰ প্রস্তাৱ সফল নোহোৱাত শ্রীকৃষ্ণ পাণ্ডৱ শিৰিৰকৈ উভতি যায়।

4] দূতঘটোৎকচ ঃ মহাভাৰতৰ কাহিনীৰ আধাৰত ৰচিত আন এখন নাটক হৈছে "দূতঘটোৎকচ"। নাটকখনৰ বিষয়বস্তু অনুসৰি জয়দ্রথকে আদি কৰি সাতগৰাকী বীৰে অর্জুন পুত্র অভিমন্যুক অন্যায়ভাৱে বধ কৰাত তাৰ প্রতিশোধৰূপে অর্জুনে জয়দ্রথক বধ কৰিবলৈ প্রতিজ্ঞা কৰে। তেতিয়া শ্রীকৃষ্ণই হিড়িম্বাৰ পুত্র ঘটোৎকচক কৌৰৱসকলৰ অগন্তুক বিপদৰ কথা জনাবলৈ দূত হিচাপে কৌৰৱৰ ৰাজসভালৈ পঠায়। দুতেৰে সৈতে কৌৰৱসকলৰ বাদানুবাদ হয় আৰু ঘটোৎকচে শ্রীকৃষ্ণৰ বাণী সকলোকে শুনাই প্রত্যাৱর্তন কৰে।

5] কর্ণভাৰম্ ঃ মহাভাৰতৰ কাহিনীৰ আধাৰত ৰচিত 'কর্ণভাৰম্' নামৰ নাটকখন এটা অংকত ৰচিত। এবাৰ কর্ণই পৰশুৰামৰ পৰা দিব্য কবচ কুণ্ডল লাভ কৰে। কিন্তু পৰশুৰামে কর্ণক সকীয়াই থলে যে যথাসময়ত এই কবচ-কুণ্ডলে কাম নিদিব। অর্জুনে যি সময়ত যুদ্ধ কৰিবলৈ কর্ণৰ ওচৰ পায়, সেই সময়ত ইন্দ্রই ব্রাহ্মণৰ ৰূপ ধাৰণ কৰি কবচ কুণ্ডল কর্ণৰ পৰা দান স্বৰূপে খুজিলে। কর্ণইও নিজৰ সর্বনাশ মাতি কবচ-কুণ্ডল ব্রাহ্মণৰূপী ইন্দ্রক দান কৰে। পিচতহে কর্ণই এজন দেৱদূতৰ পৰা ব্রাহ্মণৰূপী ইন্দ্রৰ প্রকৃত স্বৰূপ গম পায়।

6] উৰুভংগম্ ঃ "উৰুভংগম্" নামৰ নাটকখনত ভীম আৰু দুর্যোধনৰ মাজত হোৱা ভয়ংকৰ

গদাযুদ্ধৰ বৰ্ণনা পোৱা যায়। গদাযুদ্ধত দুর্যোধনৰ উৰুভংগ হৈ মৃত্যু ঘটে। নাটকত দুর্য্যোধনৰ পুত্ৰ আৰু পত্নীৰ বিলাপৰ কৰ্ণনা আছে।

7] প্ৰতিমা ঃ ভাসৰচিত "প্ৰতিমা" নাটকখন ৰামায়ণৰ কাহিনীৰ আধাৰত ৰচিত। ই সাতটা অংকত বিভক্ত। নাটকখনত ৰামৰ বনবাসৰপৰা আৰম্ভ কৰি ৰাৱণবধলৈকে ঘটনা প্ৰৱাহৰ বিৱৰণ আছে। পৰলোকগত পূৰ্ব-পুৰুষসকলৰ সৈতে পিতৃ দশৰথৰ প্ৰতিমাও দেখিবলৈ পায়। প্ৰতিমাৰ জৰিয়তে পিতৃ দশৰথৰ বিয়োগৰ কথা জনা বাবে নাটকখনৰ নাম "প্ৰতিমা" হয়। নাটকখনত ৰাৱণৰ সীতাহৰণ, ৰাৱণৰ অস্ত্ৰাঘাতত জটায়ুৰ মৃত্যু, সীতাক উদ্ধাৰ কৰাৰ বাবে ভৰতৰ ৰামলৈ সৈন্য-সামন্ত প্ৰেৰণ, ৰাম-ৰাৱণৰ যুদ্ধত ৰাৱণবধ, তথা ভৰতৰ দ্বাৰা ৰামৰ হাতত অযোধ্যাৰ ৰাজ্যভাৰ প্ৰদান আদি ঘটনাসমূহ বৰ্ণিত হৈছে।

8] অভিষেকম্ ঃ ছয়টা অংকত বিভক্ত "অভিষেকম্" নাটকখনো ৰামায়ণৰ আধাৰত ৰচিত। নাটকখনত সীতা হৰণৰ পৰা ৰাৱণবধ তথা ৰামৰ অভিষেকলৈকে কথাবস্তু বৰ্ণিত হৈছে। নাটকখনত বালিবধ, হনুমানৰ লংকাত প্ৰৱেশ কৰি সীতাক সাক্ষাৎ, লংকাত হনুমানক বন্ধন, বিভীষণৰদ্বাৰা ৰাৱণক ৰামৰ সৈতে মিত্ৰতা কৰিবলৈ উপদেশ প্ৰদান, বিভীষণৰ ৰামত শৰণ, ৰাম-ৰাৱণৰ যুদ্ধ, ৰাৱণৰ যুদ্ধত মৃত্যু, লংকাত বিভীষণৰ আৰু অযোধ্যাত ৰামৰ অভিষেক আদি বিষয় আলোচিত হৈছে।

9] বালচৰিতম্ ঃ "বালচৰিতম্" নাটকত শ্ৰীকৃষ্ণৰ জন্মৰ পৰা কংসবধলৈকে সংঘটিত ঘটনাৱলী বৰ্ণিত হৈছে। ইয়াত শ্ৰীকৃষ্ণৰ বাল্যলীলা, কৃষ্ণৰ দ্বাৰা কংসবধ, কংসবধৰ পিচত কংসৰ পিতৃ উগ্ৰসেনৰ পুনৰাভিষেক তথা কৃষ্ণৰ গুনানুকীৰ্তনেৰে নাটকখনৰ সমাপ্তি ঘটিছে।

10] প্ৰতিজ্ঞাযৌগন্ধৰায়ণম্ ঃ "প্ৰতিজ্ঞাযৌগন্ধৰায়ণম্" নাটকত বৎসৰাজ উদয়ন আৰু অবন্তীকুমাৰী বাসবদত্তাৰ প্ৰণয় কাহিনী বৰ্ণিত হৈছে। নাটকৰ বিষয়বস্তু অনুসৰি উদয়ন হ'ল এজন সুসংগীতজ্ঞ আৰু তেওঁ বাসবদত্তাক সংগীত শিক্ষা প্ৰদান কৰে। এনেদৰে দুয়োজনাৰ মাজত প্ৰেমাভাব গঢ়ি উঠে আৰু এই কাৰ্যাত দুয়োকে মন্ত্ৰী যৌগন্ধৰায়ণে সহায় কৰে।

11]) স্বপ্নবাসবদত্তম্ ঃ 'স্বপ্নবাসবদত্তম্' নাটকখন হৈছে ভাসৰ সৰ্বোৎকৃষ্ট নাটক। এইখন নাটকৰ বিষয়বস্তু প্ৰতিজ্ঞাযৌগন্ধৰায়ণ নাটকৰ পৰৱৰ্ত্তী ঘটনাৰ ওপৰত আধাৰিত। ৰজা উদয়ন মহাসেন কন্যা পত্নী বাসবদত্তাৰ প্ৰেমত ইমানেই মতলীয়া হৈ পৰিছিল যে তেওঁ ৰাজ্যৰ কাম-কাজৰ প্ৰতি অমনোযোগী হৈ পৰে। ফলত তেওঁৰ ৰাজ্যৰ বহু অংশ আন শত্ৰু ৰজাৰ কৱলত পৰে। তেতিয়া মহামন্ত্ৰী যৌগন্ধৰায়ণে হতৰাজ্য উদ্ধাৰৰ বাবে মগধৰাজ দৰ্শকৰ ভনীয়েক পদ্মাৱতীৰ সৈতে উদয়নৰ বিবাহ পাতি মগধৰ সৈন্যদলৰ সহায়ত উদয়নৰ হেৰোৱা ৰাজ্য উদ্ধাৰৰ বাবে যোজনা চলায়। এই কাৰ্য্যৰ বাবে যৌগন্ধৰায়ণে ৰাণী বাসবদত্তাক নিজৰ বিশ্বাসত লৈ দুয়োজনেই (যৌগন্ধৰায়ণ আৰু বাসবদত্তা) লাবানকত অগ্নিদগ্ধ হৈ মৃত্যুৰ মুখত পৰা বুলি উৰাবাতৰি প্ৰচাৰ কৰে। আনহাতে পৰিব্ৰাজকৰ বেশত যৌগন্ধৰায়ণে পদ্মাৱতীৰ ওচৰলৈ গৈ নিজৰ ভগ্নী বুলি পৰিচয় দি আবন্তিকাবেশিনী

বাসবদত্তাক ন্যাসৰূপে কিছুদিনৰ বাবে ৰাখিবলৈ পদ্মাৱতীক সন্মত কৰায়। ৰজা উদয়নৰ পদ্মাৱতীৰ লগত বিবাহৰ যো-যা চলে যদিও তেওঁ বাসবদত্তাৰ বিৰহত কাতৰ হৈ থাকে আৰু সেইকথা বাসদত্তা আৰু পদ্মাৱতীয়েও গম পায়। এদিনাখন গধূলি ৰজা উদয়ন সমুদ্র গৃহৰ শয্যাত বিশ্রাম কৰি থাকোতে বাসবদত্তাই পদ্মাৱতীক বিচাৰি সেই ঠাই গৈ পায়। বাসবদত্তাই উদয়নক পদ্মাৱতী বুলি ভাৰি তেওঁৰ শয্যাৰ ওচৰত শুই দিয়ে। সেই সময়তে ৰজাই সপোনত বাসবদত্তাক দেখি মাতে আৰু বাসবদত্তাইও ৰজাক সহাৰি জনায় স্পর্শ কৰি তাৰ পৰা ওলাই যায়। ৰজাই সাৰ পাই বাসবদত্তাক বিচাৰে যদিও বসন্তকে তালৈ আহি ৰজাৰ ভ্রম দূৰ কৰিবলৈ চেষ্টা কৰে। ইফালে উদয়নৰ ৰাজ্য উদ্ধাৰ হয় আৰু ঘটনাৰ সকলো ৰহস্য দূৰ হয়। ফলত ৰজা আৰু বাসবদত্তাৰ পুনর্মিলন হয়। এয়াই হৈছে স্বপ্নবাসবদত্তম্ নাটকৰ মূল বিষয়বস্তু।

12]) অবিমাৰকম্ ঃ ভাসৰ 'অবিমাৰকম্' নাটক লোককথাৰ আধাৰত ৰচিত। নাটখনত মহাৰাজ কুন্তিভোজৰ কন্যা কুৰংগী আৰু মহাৰাজ সৌবীৰৰ ৰাজকুমাৰ অবিমাৰকৰ প্রণয়কাহিনী বর্ণিত হৈছে। সৌবীৰ ৰজাই শাপভ্রষ্ট হৈ সপৰিবাৰে কুন্তীভোজৰ ৰাজ্যত আত্মগোপন কৰি থাকোঁতেই 'অবিমাৰকম্' নাটকৰ কথাবস্তু আৰম্ভ হয়। নায়ক অবিমাৰকে এটা হাতীৰ কবলৰপৰা নায়িকা কুৰংগীক ৰক্ষা কৰে আৰু দুয়োজনৰে পাৰস্পৰিক প্রেমৰ সূচনা হয়। এবাৰ অবিমাৰকে কুন্তিভোজৰ হাতত ধৰা পৰিলত ৰজাই তেওঁক প্রাণদণ্ডৰ আদেশ দিয়ে। সেই সময়তে নাৰদে উপস্থিত হৈ ৰজাক সকলো কথা ভালদৰে বুজাই দিয়াত নাৰদৰ কথা অনুসৰি নাটকৰ নায়ক আৰু নায়িকাৰ বিবাহ সম্পন্ন হয়।

13]) চাৰুদত্তম্ ঃ 'চাৰুদত্তম্' নাটকখন ভাসৰ অন্তিম ৰচনা বুলি কোৱা হয়। উজ্জয়িনীৰ ব্রাহ্মণ চাৰুদত্ত আৰু গণিকা বসন্তসেনাৰ প্রকৃত প্রেম কাহিনীয়েই এই নাটকৰ বিষয়বস্তু। বসন্তসেনাৰ শকাৰ নামৰ আন এজন প্রেমিক আছিল কিন্তু বসন্তসেনাই তেওঁৰ প্রতি অলপো আসক্ত নাছিল। দৰিদ্র ব্রাহ্মণ চাৰুদত্তৰ লগত বসন্তসেনাৰ প্রেম বৰ সুন্দৰভাবে নাটকখনত দেখুৱা হৈছে। কোৱা হয় এই নাটকখন সম্পূর্ণ কৰাৰ আগতেই নাট্যকাৰ ভাসৰ পৰলোক প্রাপ্তি হয়।

কালিদাস হৈছে সর্বকালৰ শ্রেষ্ঠ নাট্যকাৰ তথা কবি। কালিদাসে তিনিখন নাটক ৰচনা কৰিছিল। সেইসমূহ হৈছে- 1। মালবিকাগ্নিমিত্রম্, 2। বিক্রমোর্বশীয়ম্ আৰু 3¼ অভিজ্ঞান শাকুন্তলম্। পণ্ডিতসমাজে কালিদাসৰ "মালবিকাগ্নিমিত্রম্" নাটকখনকেই তেওঁৰ প্রথম ৰচনা বুলি মানি লয়। আকৌ এইজনা নাট্যকাৰৰ 'অভিজ্ঞানশাকুন্তলম্' নাটকখনক সর্বসন্মতভাৱে শ্রেষ্ঠ ৰচনা বুলি গণ্য কৰে।

'মালবিকাগ্নিমিত্রম্' নাটকখন পাচটা অংকৰ সমষ্টি। নাটকখনৰ নায়ক অগ্নিমিত্র আৰু নায়িকা মালবিকা। অগ্নিমিত্র আছিল মৌর্য্যৰজা বৃহদ্রথৰ সেনাপতি পুষ্যমিত্রৰ পুত্র। অগ্নিমিত্র আৰু মালবিকাৰ প্রেমকাহিনী হৈছে এইখন নাটকৰ বিষয়বস্তু। মালবিকা আৰু অগ্নিমিত্রৰ বিবাহ সম্পন্ন হোৱাৰ লগে লগে নাটকৰ শুভ সমাপ্তি ঘটে।

'বিক্রমোর্বশীয়ম্' হৈছে কালিদাসৰ দ্বাৰা ৰচিত দ্বিতীয়খন নাটক। এইখন নাটকতো পাঁচটা অংক আছে। নাটকৰ নায়ক হৈছে পুৰুৰৱা আৰু নায়িকা উৰ্বশী। চন্দ্রবংশীয় ৰজা পুৰুৰৱা আৰু উৰ্বশীৰ প্রেম কাহিনীয়েই কালিদাসৰ এইখন নাটকৰ প্রধান বিষয়বস্তু।

"অভিজ্ঞানশকুন্তলম্" হৈছে কালিদাসৰ শ্রেষ্ঠ আৰু অন্তিম নাটক। নাটকখন সাতটা অংকত বিভক্ত। নাটকৰ নায়িকা হৈছে শকুন্তলা আৰু নায়ক ৰজা দুষ্যন্ত। দুয়োজনাৰ প্রেমকাহিনীয়েই হৈছে নাটকৰ বিষয়বস্তু। নাটকৰ কাহিনীভাগ মহাভাৰতৰ আদিপর্বৰ পৰা লোৱা হৈছে। নাটকৰ প্রথম অংকত মৃগয়ার্থী ৰজা দুষ্যন্তই কল্প মুনিৰ আশ্রমত প্রৱেশ কৰি কন্বমুনিৰ অনুপস্থিতিত দুগৰাকী সমবয়সীয়া কিশোৰীৰ সৈতে অপৰূপা শকুন্তলাক দর্শন কৰে। তাৰ পিচত ৰজাই দ্বিতীয় অংকত ঋষিসকলৰ আমন্ত্রণক্রমে সাৰথিৰ সৈতে আশ্রমতে যজ্ঞ ৰক্ষার্থে থাকে। তৃতীয় অংকত শকুন্তলাৰ ৰজা দুষ্যন্তৰ প্রতি থকা প্রেমাসক্তিৰ উল্লেখ পোৱা যায়। ৰজা দুষ্যন্ত আৰু শকুন্তলাৰ প্রেম প্রণয়ৰ অগ্রগতিত শকুন্তলাৰ দুই সখী প্রিয়ম্বদা আৰু অনসূয়াই যথেষ্ট অৰিহণা যোগায়। ৰজাই শকুন্তলাৰ ওচৰত গন্ধর্ববিবাহৰ প্রস্তাৱ আগবঢ়ায়। চতুর্থ অংকত ৰজাই শকুন্তলাক আশ্রমতে এৰি নিজ ৰাজ্যলৈ প্রত্যাবর্তন কৰে। লগতে তেওঁ শকুন্তলাকো সোনকালে নিজ ৰাজধানীলৈ লৈ যোৱাৰ প্রতিশ্রুতি দি থৈ যায়। ইফালে দুষ্যন্তৰ প্রেমত নিমগ্ন শকুন্তলাই দুর্বাসাৰ (আশ্রমত) উপস্থিতি গম নাপায়। দুর্বাসাই শকুন্তলাৰ পৰা আতিথ্য লাভ নকৰি শকুন্তলাক অভিশাপ দিয়ে যে শকুন্তলাই যাৰ কথা ভাবি তেওঁক সমাদৰ কৰা নাই, সময়ত সেই ব্যক্তিয়েই তেওঁক পাহৰি যাব। ইতিমধ্যে কণ্ঠ তীর্থভ্রমণৰ পৰা উভতি আহি পালিতা কন্যা শকুন্তলা অন্তঃসত্ত্বা বুলি গম পাই শকুন্তলাক পতি গৃহলৈ পঠিয়াবলৈ আয়োজন কৰে।

পঞ্চম অংকত শকুন্তলা আশ্রমবাসীসকলৰ সৈতে ৰজা দুষ্যন্তৰ ৰাজসভাত উপস্থিত হয়। কিন্তু দুর্বাসাৰ শাপৰ প্রভাৱত পৰি ৰজাই শকুন্তলাৰ কথা মনত পেলাবলৈ অসমর্থ হয়। শকুন্তলাই ৰজাৰ নামাঙ্কিত আঙুঠিটো ৰজাক দেখুৱাব খুজি আঙুলিত নেপাই বিব্রতা হৈ পৰে।

ষষ্ঠ অংকত ৰজা দুখ্যন্তই মাছমৰীয়া এজনৰ হাতত তেওঁৰ নামাঙ্কিত আঙুঠিটো পাই শকুন্তলাৰ স্মৃতি পুনৰ বোধন কৰিবলৈ সক্ষম হয়। নাটকখনৰ শেষৰ অংকত ৰজা দুষ্যন্তই নিজ পুত্র সর্বদমনক নাটকীয়ভাবে দেখা পায়। এই অংকতে শকুন্তলা আৰু ৰজা দুষ্যন্তৰ পুনর্মিলন হয় আৰু কাশ্যপ মুনিৰ অনুমতি লৈ সপৰিবাৰে হস্তিনাপুৰলৈ যাত্রা কৰে। ইয়াতেই নাটকৰ সমাপ্তি ঘটে।

কালিদাসোত্তৰ যুগৰ নাটক বুলিলে শূদ্রক ৰচিত "মৃচ্ছকটিকম্" নামৰ নাটকখনৰ কথাই প্রথমে উল্লেখ কৰিব পাৰিব। এইখন এখন সুপ্রসিদ্ধ প্রকৰণ শ্রেণীৰ ৰূপক। নাটকৰ প্রস্তাৱনাত পোৱা বিৱৰণ মতে ৰজা শূদ্রক হস্তিশাস্ত্রত পার্গত আছিল। কিন্তু ৰজা শূদ্রক আৰু নাট্যকাৰ শূদ্রক এজন ব্যক্তি নে দুজন ভিন্ ভিন্ ব্যক্তি, সেই বিষয়ে পণ্ডিতসকলৰ মাজত মতভেদ আছে। একেদৰে শূদ্রকৰ স্থিতিকাল সম্বন্ধেও পণ্ডিতসকল একমত নহয়। "মৃচ্ছকটিকম্"ত দহটা অংক আছে। ই ভাসৰ "চাৰুদত্ত" নাটকৰ আধাৰত ৰচিত। চাৰুদত্ত নামে এজন ব্রাহ্মণ আৰু বসন্তসেনা নামেৰে উজ্জয়িনীৰ ধনী বেশ্যা এজনীৰ প্রণয় কাহিনীয়েই এই প্রকৰণৰ উপজীব্য বিষয়।

কালিদাসোত্তৰ যুগৰ আন এখন উল্লেখযোগ্য নাটক হৈছে "মুদ্ৰাৰাক্ষস"। ইয়াৰ ৰচক বিশাখাদত্ত। নাটকখন সাতটা অংকত বিভক্ত। এইখন এখন পুৰুষ প্ৰধান নাটক। ইয়াত নাৰী চৰিত্ৰৰ উল্লেখ নাই। ইয়াত কোনো ধৰণৰ প্ৰেমকথা আৰু হাস্যৰস বা শৃংগাৰ ৰসৰ উল্লেখ নাই। ই এখন সম্পূৰ্ণ ৰাজনীতিমূলক নাটক।

'চাণক্য'ৰ চৰিত্ৰটোৱেই হৈছে এই নাটকৰ প্ৰাণ কেন্দ্ৰ। তেওঁ অৰ্থাৎ চাণক্যই নন্দবংশ নিৰ্মূল কৰি নিজৰ অনুগত চন্দ্ৰগুপ্ত মৌৰ্য্যক মগধৰ সিংহাসনত বহুৱায়। কিন্তু চাণক্যই নন্দবংশৰ শেষৰ অনুগত মন্ত্ৰী 'ৰাক্ষস'ক চন্দ্ৰগুপ্তৰ পক্ষলৈ আনিবলৈ নোৱাৰালৈকে শান্তিত থাকিব পৰা নাছিল। সেয়েহে বিভিন্ন কৌশলেৰে মন্ত্ৰী ৰাক্ষসক নিজৰ হাতৰ মুঠিলৈ আনিবলৈ চাণক্যই অতি সংঘাতপূৰ্ণ প্ৰচেষ্ঠা চলায়। চাণক্যই এই কাৰ্য্যত সফলো হয়। এয়াই হৈছে "মুদ্ৰাৰাক্ষস" নাটকৰ উপজীব্য বিষয়।

সংস্কৃত নাট্য-সাহিত্যত কালিদাসৰ পিচতে ভৱভূতিৰ স্থান বুলি কোৱা হয়। নাট্যকাৰ ভৱভূতিয়ে তিনিখন নাটক ৰচনা কৰে। সেইসমূহ হৈছে- 1। মহাবীৰ চৰিত, 2। মালতী-মাধৰ আৰু 3¼উত্তৰ ৰামচৰিত।

'মহাবীৰচৰিত' নাটক সাতটা অংকত বিভক্ত। ইয়াৰ কাহিনী ভাগ ৰামায়ণৰ পৰা লোৱা হৈছে। নাটকখনত ৰামৰ বিবাহ, ৰামৰ বনবাস, সীতাহৰণ আৰু ৰাৱণবধৰ পাছত ৰামৰ অভিষেক আদি ঘটনাসমূহ বৰ্ণিত হৈছে। "মহাবীৰ চৰিত" নাটক ভৱভূতিৰ আদ্য সৃষ্টি আৰু ই ভৱভূতিৰ এখন উৎকৃষ্ট নাটক বুলি ধৰা হয়।

"মালতীমাধৱ" নাটক নাট্যকাৰ ভৱভূতিৰ দ্বিতীয় সৃষ্টি। প্ৰকৃততে ই এখন "প্ৰকৰণ" প্ৰকৃতিৰ ৰূপক। প্ৰকৰণৰ কাহিনী কবিকল্পিত হয়। মালতীমাধবৰ কাহিনীভাগ দহটা অংকত বিভক্ত। মালতী আৰু মাধৱৰ প্ৰেমকাহিনীয়েই ইয়াৰ প্ৰধান আলোচ্য বিষয়।

"উত্তৰৰামচৰিত" নাটক ভৱভূতিৰ সৰ্বশ্ৰেষ্ঠ আৰু অন্তিম নাটক বুলি কোৱা হয়। নাটকখন সাতটা অংকত বিভক্ত। ইয়াৰ কাহিনীভাগৰ উৎস ৰামায়ণৰ উত্তৰাকাণ্ড। ৰাৱণবধৰ পিচত অযোধ্যাৰ সিংহাসনত অভিষিক্ত হোৱাৰপৰা সীতাবিসৰ্জন, অশ্বমেধ যজ্ঞানুষ্ঠান, লৱ-কুশৰ বীৰত্ব আদিৰ বৰ্ণনাই নাটকৰ আলোচ্য বিষয়।

কালিদাসোত্তৰ যুগৰ নাটকসমূহৰ ভিতৰত ভট্টনাৰায়ণ ৰচিত "বেণীসংহাৰ" নাটকখন অন্যতম। এই নাটকখন ছয়টা অংকত বিভক্ত। ইয়াৰ কাহিনীভাগ মহাভাৰতৰ আধাৰত ৰচিত। ভীম, দুৰ্যোধন, অশ্বত্থামা, যুধিষ্ঠিৰ আৰু শ্ৰীকৃষ্ণ এই নাটকৰ প্ৰমুখ পুৰুষ চৰিত্ৰ আৰু দ্ৰৌপদী তথা ভানুমতী অন্যতম স্ত্ৰীচৰিত্ৰ। কৌৰৱৰ সভাত দুঃশাসনৰ হাতত অপমানিত হোৱাত নিজ অপমানৰ প্ৰতিশোধ নোলোৱা পৰ্যন্ত দ্ৰৌপদীয়ে বেণী নাবান্ধো বুলি প্ৰতিজ্ঞা কৰে। স্বয়ং ভীমেও দ্ৰৌপদীৰ অপমানৰ পোটক তুলিবলৈ দুঃশাসন আৰু দুৰ্যোধনৰ বধৰ প্ৰতিজ্ঞা কৰে। ভীমে দুৰ্যোধনৰ উৰুভংগ কৰিহে ৰক্তাক্ত হাতেৰে দ্ৰৌপদীৰ বেণী সংহাৰ কৰে। সেই বাবেই এই নাটকখনৰ নাম "বেণীসংহাৰ" হয়।



५.६ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- पाश्चात्यविद्वांसः मन्यन्ते यत् संस्कृतनाटकस्य उत्पत्तिः वैदिककाले एव अभवत्। वस्तुतः भारतीयसाहित्ये संस्कृतनाटकस्य जन्म अभवत्।
- भासस्य त्रयोदशनाटकानि- १.मध्यमव्यायोगम् २. पञ्चरात्रम् ३. दूतवाक्यम् ४. दूतघटोत्कचः ५. कर्णभारम् ६. उरुभङ्गम् ७. प्रतिमा ८. अभिषेकम् ९. बालचरितम् १०. प्रतिज्ञायौगन्धरायणम् ११. स्वप्नवासवदत्तम् १२. अविमारकम् १३. चारुदत्तं च।
- अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रं च कालिदासस्य त्रीणि नाटकानि सन्ति।
- कालिदासस्य परवर्तीकालस्य विविधनाट्यकाराणां नाटकानां नामानि यथा- मृच्छकटिकम्, मुद्राराक्षसम्, मालतीमाधवम् इत्यादीनि।



५.७ ज्ञानाधिक्यम्

१) दाहालः, लोकमणि; संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वाराणसी।

२) डॉ. मिश्र, कृष्णदत्त; संस्कृत निबन्ध मकरन्दः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।



५.८ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : तेषां त्रिषु वर्गेषु विभक्तुं शक्यते।

प्रश्नः २ उत्तरम् : त्रयोदशः (१३)।

प्रश्नः ३ उत्तरम् : स्वप्नवासवदत्तम्।

प्रश्नः ४ उत्तरम् : रामायणम्।

प्रश्नः ५ उत्तरम् : महाभारतम्।

प्रश्नः ६ उत्तरम् : तेन त्रीणि नाटकानि लिखितानि। तानि च – १. मालविकाग्निमित्रम्, २. विक्रमोर्वशीयम् ३. अभिज्ञानशाकुन्तलं च।

प्रश्नः ७ उत्तरम् : पञ्च अङ्काः।

प्रश्नः ८ उत्तरम् : नायकः पुरूरवा नायिका च उर्वशी।

प्रश्नः ९ उत्तरम् : दुष्यन्तः।

प्रश्नः १० उत्तरम् : सप्त।

प्रश्नः ११ उत्तरम् : प्रकरणम्।

प्रश्नः १२ उत्तरम् : हस्तीशास्त्रम्।

प्रश्नः १३ उत्तरम् : विशाखादत्तः।

प्रश्नः १४ उत्तरम् : त्रीणि।

प्रश्नः १५ उत्तरम् : वेणीसंहारम्।



५.९ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १ : 'स्वप्नवासवदत्तम्'नाटकं केन विरचितम्?

प्रश्नः २ : 'अभिज्ञानशाकुन्तलम्' नाटकस्य रचयिता कः?

प्रश्नः ३ : 'उत्तररामचरितम्' नाटकं केन विरचितम्?

प्रश्नः ४ : 'मृच्छकटिकम्' नाटकं केन प्रणीतम्?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

प्रश्नः १ : संस्कृतनाटकस्य उत्पत्तिविषये लिख्यताम्?

प्रश्नः २ : कालिदासस्य नाटकानां सामान्यविवरणं प्रदेयम्?

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १००-५०० शब्देषु लिखन्तु)

प्रश्नः १ : भासस्य नाटकानां परिचयं प्रदेया?

प्रश्नः २ : कालिदासोत्तरनाटकानां परिचयं लिखत?

*** ***** ***

अध्यायः ६ : गीतिकाव्यम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

६.१ उद्देश्यम्

६.२ परिचयः

६.३ गीतिकाव्यम्

- ६.३.१ गीतिकाव्यस्य स्रोतः
- ६.३.२ गीतिकाव्यस्य विभागाः
- ६.३.३ विभिन्नगीतिकाव्यानाम् उल्लेखः

६.४ अध्यायस्य असमीयाभाषायां सारांशः

६.५ अध्यायात् किमवगतम्

६.६ ज्ञानाधिक्यम्

६.७ अग्रगत्याः निरूपणम्

६.८ अभ्यासप्रश्नाः

६.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- गीतिकाव्यस्य लक्षणविषये ज्ञातुं शक्नुवन्ति।
- गीतिकाव्यस्य स्रोतविषये अवगन्तुं शक्नुवन्ति।
- विभिन्नगीतिकाव्यानां परिचयं प्राप्तुं शक्नुवन्ति।
- गीतिकाव्यस्य विभागानां विषये अवगन्तुं शक्नुवन्ति।

६.२ परिचयः

संस्कृतसाहित्ये नाटकस्य विषये भवद्भिः पूर्वप्रकरणे प्राप्तम्। अस्य अध्यायस्य अध्ययनानन्तरं भवन्तः संस्कृतकाव्यस्य अस्य महत्त्वपूर्णस्य भागे गीतिकाव्यस्य विस्तृतज्ञानं प्राप्नुयुः। संस्कृतकाव्यं मुख्यतया द्वयोः वर्गयोः विभक्तम् अस्ति : १. दृश्यकाव्यं श्रव्यकाव्यं च।

दृश्यकाव्ये रूपकम् उपरूपकम् इत्यादयः अन्तर्भवन्ति। एतादृशं काव्यं वयं मञ्चे अभिनयद्वारा नेत्राभ्यां आनन्दं प्राप्तुं शक्नुमः। यथा कालिदासस्य अभिज्ञानशाकुन्तलम् नाटकस्य मञ्चनं कृत्वा आनन्दं च प्राप्तुं शक्यते, अतः तत् दृश्यकाव्यस्य अन्तर्गतम् अस्ति।

श्रव्यकाव्यं तु मुख्यतया शब्दानां माध्यमेन आनन्दं प्राप्तुं शक्यते इति साहित्यस्य एकः प्रकारः अस्ति। इदं गद्यपद्ययोः विभक्तम्।

गद्यस्य द्वौ भागौ स्तः- १. कथा, आख्यायिका च

काव्यं च द्विधा विभक्तम्- १. महाकाव्यं, खण्डकाव्यं चेति।

गीतिकाव्यं सामान्यतया खण्डकाव्यस्य अन्तर्गतमिति मन्यते। अस्य काव्यस्य अतीव दृढं सुन्दरं च रूपम् अस्ति।

ऐतिहासिककाव्यानि गद्यपद्ययोः रचितानि भवन्ति। संस्कृतकाव्यस्य एतेषां भिन्नप्रकाराणां वर्गीकरणानां च सुगमतया स्पष्टतया च अवगन्तुं तानि संक्षेपेण अधः व्याख्यातानि सन्ति।

काव्यसाहित्यानां विभागः
काव्यसाहित्यं = दृश्यकाव्यं, श्रव्यकाव्यं च।
दृश्यकाव्यं = रूपकम्, उपरूपकम् च।
श्रव्यकाव्यं = गद्यकाव्यं, पद्यकाव्यं, चम्पूकाव्यम् च।
गद्यकाव्यं = कथा, आख्यायिका च।
पद्यकाव्यं = महाकाव्यम्, खण्डकाव्यम् च।

६.३ गीतिकाव्यम्

संस्कृतसाहित्यस्य एकं मनोहरं रमणीयं च भागं गीतिकाव्यम्। गीतिकाव्यं गहनभावना, भावः, संवेदनशीलतया च पूर्णं मधुरं काव्यम् अस्ति। सरलतया तीव्रभावनाचिन्तापूर्णानि काव्यानि गीतिकाव्यानि इति उच्यन्ते।

संस्कृतसाहित्ये गीतकाव्यानां प्रायः लघुकाव्ये अथवा खण्डकाव्ये अन्तर्भुक्तिकरणं करोति। काव्येऽस्मिन् मुख्यतया शृङ्गारः (प्रेमः), वैराग्य (संयमः), रूपसौन्दर्यं, प्रकृतिदृश्यं च विषयवर्णनं प्राप्यते। अनेन पाठकाः आध्यात्मिकं आनन्दम् अनुभूयते। भर्तृहरेः शतकत्रयान् अमरुशतकं च काव्यं मुक्तककाव्यस्य उत्तमम् उदाहरणम् अस्ति।

प्रबन्धमूलकेषु गीतिकाव्येषु महाकविकालिदासस्य मेघदूतम् अनुसृत्य तदनुवर्तिकाव्यानि च सन्ति। गीतिकाव्ये प्रकृतेः बाह्याभ्यन्तरस्वभावस्य उत्तमवर्णनानि दृश्यन्ते।

संस्कृतसाहित्ये एकम् उल्लेखनीयं गीतिकाव्यं महाकविकालिदासप्रणीतं मेघदूतम् इति। अस्य काव्यस्य मनोहरभाषा, सुन्दरवर्णनं च इत्यादि कारणैः स्थायिवैभवं प्राप्तम्।

६.३.१ गीतिकाव्यानां स्रोतः

गीतिकाव्यानां मूलस्रोतविषये बहवः विद्वांसः विचारान् ददति। संस्कृतसाहित्ये गीतिकाव्यस्य प्रारम्भिकानि उदाहरणानि ऋग्वेदस्य उषासूक्ते उपलभ्यन्ते। अस्मिन् उषासूक्ते गीतिकाव्यस्य प्रथमं उदाहरणम् प्राप्यते। अपि च इतिहास-पौराणिककथासु च गीतिकाव्यसदृशानि उपादानानि विद्यन्ते। यथा - रामायणस्य, महाभारतस्य, नानापुराणानां च भागविशेषेषु गीतिधर्मी-काव्यस्य स्पष्टानि उदाहरणानि सन्ति।

परन्तु महाकविकालिदासस्य कालात् आरभ्य गीतिकाव्यस्य विशिष्टं सुव्यवस्थितं च रूपं प्राप्तम् अस्ति। कालिदासस्य मेघदूतम् ऋतुसंहारं च गीतिकाव्यानां प्रथमदृष्टान्तौ इति अभिज्ञायते। एतानि काव्यानि गीतिकाव्यस्य स्वरूपं सुदृढं कुर्वन्ति, संस्कृतसाहित्ये च एषां विशेषस्थानं भवन्ति।

६.३.२ गीतिकाव्यस्य विभागाः

गीतिकाव्यस्य परिभाषां ज्ञात्वा मुख्यतया द्विधा विभक्तम्।

१. भक्तिमूलं गीतकाव्यं वा स्तोत्रं वा

२. शृङ्गारमूलं गीतिकाव्यं वा सन्देशकाव्यं वा

प्रथमभागे एतादृशानि गीतिकाव्यानि सन्ति, येषु आध्यात्मिकविचाराः, ईश्वरभक्तिः, ईश्वरप्रेम च अधिकं बलं दत्तम् अस्ति। एतत् प्रकारं गीतिकाव्यम् भक्तिगीतकाव्यम् इति नाम्ना प्रसिद्धमस्ति। यथा जयदेवस्य प्रसिद्धः गीतगोविन्दग्रन्थः अस्मिन् वर्गे अन्तर्भवति।

द्वितीयवर्गे शृङ्गारप्रधानानि गीतिकाव्यानि दृश्यन्ते, यत्र प्रेम, रूपशोभा, स्निग्धभावनाः च मुख्यविषयाः भवन्ति। एषु काव्येषु प्रेमी वा प्रेयसी वा दूतेन स्वस्य प्रणयस्य सन्देशं प्रेषयति। एतानि गीतिकाव्यानि दूतकाव्यानि इति आख्यायन्ते। महाकविकालिदासस्य मेघदूतम् ऋतुसंहारं च शृङ्गारप्रधानं गीतिकाव्यानां उत्कृष्टं उदाहरणम्।



ज्ञातव्यम्

महाकविः कालिदासः स्वकाव्यजीवनस्य आरम्भम् ऋतुसंहारकाव्येन कृतवान् इति ज्ञायते। तस्य प्रसिद्धं काव्यं मेघदूतं बहुभाषासु अनूदितं जातम्, यथा आङ्गल-जर्मन-तिब्बती-चिनी-भाषासु। मेघदूतस्य प्राचीनतमं अनुवादं त्रयोदशशतिकायां तिब्बतीभाषायां कृतमस्ति। तेन तिब्बती- अनुवादाधारेण जर्मनपण्डितेन मेघदूतं जर्मनभाषायाम् अनुवादं कृतम्। मेघदूतखंडकाव्ये १५५ श्लोकाः विद्यन्ते, याः मन्दाक्रान्ताछन्दसि रचिताः। यस्य सौन्दर्यं च सरलता काव्यस्य विशेषगुणाः सन्ति।

भक्तिमूलकगीतकाव्येषु बौद्धस्तोत्रं जैनस्तोत्रं च उल्लेखनीयम्। एते स्तोत्रकाव्यद्वयं क्रमशः बौद्धधर्मस्य च जैनधर्मस्य च प्रचारार्थं रचितं जातम्।

६.३.३ विभिन्नगीतिकाव्यानां उल्लेखः

अधुना गीतिकाव्येषु विविधदृष्टान्तानां विषये ज्ञापयते। महाकविकालिदासेन रचितं ऋतुसंहार- गीतिकाव्यं तस्य सर्वश्रेष्ठम् उदाहरणम् अस्ति। अस्मिन् शृंगारप्रधाने गीतिकाव्ये समाहितस्य कालिदासस्य साहित्यिकपाण्डित्यस्य उज्ज्वलं प्रतिफलनं दर्शयति।

अस्मिन् खण्डकाव्ये भारतवर्षस्य षट्-ऋतूनां अपूर्वसौन्दर्यस्य अनुपमं विवरणं परिलक्ष्यते। ऋतुसंहार इति नाम्ना षट् ऋतूनां समाहारः एव सूच्यते।

कविना काव्येऽस्मिन् ग्रीष्म, वर्षा, शरद्, हेमन्त, शीत तथा बसन्त - एते षट् ऋतवः चरणेन वर्ण्यते। एकोनविंशति श्लोकैः एषां ऋतूनां सुरम्यं चित्रणं सम्पूर्णं दर्शयति। एषाम् ऋतुनां परिवर्तने प्रेमिक-प्रेमिकयोः अन्तः उत्पन्नानां अनुभवानां यथावत् प्रकटं क्रियते।

महाकविकालिदासस्य ऋतुसंहारकाव्यं बसन्तऋतोः अत्युत्तमवर्णनया समाप्तिर्भवति। ऋतूनां तात्त्विकवर्णनायाः कालिदासेन वाल्मीकिरामायणम् अनुसरति इति यथार्थं प्रतीयते। संस्कृतसाहित्ये अत्यन्तं प्रमुखं गीतिकाव्यं मेघदूतं कालिदासस्य सर्वोत्तमं काव्यमिति मन्यते। मन्दाक्रान्ता-छन्दसि रचितं एतत् गीतिकाव्यं खण्डकाव्यस्य प्रथमम् उदाहरणम् इति। मेघदूतकाव्यं द्विधा विभक्तम् -

पूर्वमेघः -अस्मिन् भागे यक्षः मेघं अनुरोधयति, तस्य प्रियतमायायै संदेशं प्रेषयति। अत्र बाह्यप्रकृतेः सुंदरं वर्णनं दृष्यते।

उत्तरमेघः -अस्मिन् अंशे यक्षस्य अन्तर-गहनं अनुभवः च अलकापुर्याः वर्णनं क्रियते।

यक्षः, यः कुबेरस्य आदेशपालने व्यर्थं भूत्वा रामगिरिपर्वते निवासितः, मेघं स्वदूतं नियोज्य प्रियतमां प्रति प्रेमसंदेशं प्रेषयितुम् अनुरोधयति। यक्षस्य विषादः, प्रेम्नः गम्भीरता, च मेघेण प्रकृतेः सुंदरचित्रवर्णनम् इति मेघदूतं अतुलनियं गीतिकाव्यरूपेण प्रतिष्ठापयति।

अस्मिन् काव्ये नर्मदा नदी, विदिशा नगरी, बेत्रवती नदी, अवन्ती राज्ये उज्जयिनी नगर्याः च अलकापुर्याः मनोहरं वर्णनं दृश्यते। मेघदूतस्य प्रभावे परवर्तीदूतकाव्यानि रचितानि जातनि। विशेषदूतकाव्येषु सन्ति नेमिदूतम्, पवनदूतम्, हंसदूतम्।

ऋतुसंहारम्

एतत् कालिदासस्य अन्यं शृंगारप्रधानं गीतिकाव्यम्। अस्मिन् काव्ये षट्-ऋतूनां (ग्रीष्म, वर्षा, शरद्, हेमन्त, शीत, बसन्त) सौंदर्यवर्णनं ११४ श्लोकानां मध्ये कृतम्। प्रत्येकं ऋतुं प्रकृतिसमयवृद्ध्यां सह मानवहृदयस्य आन्तरिकानुभूतिं च प्रदर्शयति।

घटकर्परः

एतत् काव्यं मेघदूतस्य प्रेरणया रचितं अस्ति। एतत् लघुगीतिकाव्यरूपेण २२ श्लोकैः सन्निविष्टम्। अस्मिन् काव्येऽपि मेघं दूतरूपेण योजयित्वा विरहीप्रेमिकाय संदेशं प्रेषयति। पारम्परिकरूपेण राजाविक्रमादित्यस्य राजसभायाः एकः पण्डितः अस्य रचनाकारः इति मन्यन्ते।

नेमिदूतम्

एतत् गीतिकाव्यं सप्तदशशतिकायां विक्रमनामकं जैनकविना विरचितम्। अस्मिन्

काव्ये मेघदूतस्य प्रभावः स्पष्टम् अस्ति। नेमिनाथस्य जीवनचरिते आधारितम् अस्मिन् काव्ये मेघदूतस्य १२५ श्लोकानाम् उद्धरणम् अस्ति।

पार्श्वाभ्युदयनम्

जैनकविजिनासनः जैनभगवतः पार्श्वनाथस्य जीवनचरिते आधारितं काव्यं लिखितवान्। चतुर्सर्गेषु विभाजिते अस्मिन् काव्ये ३६४ श्लोकाः सन्ति, यत्र १२० श्लोकाः मेघदूतम् अनुसृत्य रचिताः।

अन्य- उल्लेखनीय-गीतिकाव्यानि अमरु इत्यस्य अमरुशतकम्, बिल्हनस्य चौरपञ्चाशिका, गोवर्धनस्य आर्यसप्तशती।

पवनदूतम् गीतिकाव्यं त्रयोदशशतिकान्ते धोयीनामकं कविना विरचितम्। अस्य गीतिकाव्यस्य मुख्याधारः कालिदासस्य मेघदूतं आसीत्। पवनदूते लक्ष्मणसेनेन सह मलयपर्वतस्य गंधर्वकन्या-कुबलयवत्याः प्रेमकथां वर्णयति। दिग्विजयोद्देश्यं दक्षिणयात्राप्रवृत्तः लक्ष्मणसेनः कुबलयवत्याः प्रेमपाशे बद्धः जातः। तस्य हृदयस्य गभीरानुभूतेः प्रतिफलनरूपेण दक्षिण-पूर्वस्य वायुं दूतरूपेण प्रियतमायाः कृते प्रेषयति। एषा मर्मस्पर्शिनी घटना पवनदूतकाव्ये काव्यसन्देशं निर्मितवती।

तस्मिन् समये त्रयोदशशतिकायां अब्दुल-रहमाननामकः एकः मुस्लिमकविः संदेशव्यसकं नामकं सुंदरं दूतकाव्यं रचयामास। तत्पश्चात् पञ्चदशशतिकायां विष्णुदासः मनोदूतमिति काव्यं रचितवान्। षोडशशतिकायां माधवकविन्द्रभट्टाचार्यः उत्तरदूतं लिखितवान्। सप्तदशशतिकायां गौडीयभक्ति-आंदोलनस्य अंशरूपेण कविरूपगोस्वामी उद्धवसंदेशमिति दूतकाव्यं विरचितवान्। अस्मिन् काव्ये श्रीकृष्णगोपिगणानां विरहप्रेमभावनां प्रदर्शितमस्ति। तदुपरि रूपगोस्वामी हंसदूतमिति अन्यमप्येकं गीतिकाव्यं रचितवान्। इतोपि संस्कृतसाहित्ये चातकदूतं कोकिलदूतं च अन्यानि दूतकाव्याणि रचनानि अभवन्।

प्राचीनकालादेव प्राकृतभाषायां गीतिकाव्यनिर्माणं जातम्। सप्तबाहनवंशीयराजा हालेन लिखितः गाथासप्तशती अत्रविशेषोल्लेखनीयः। अस्मिन् काव्ये ग्राम्यजीवनस्य जीवंतचित्रणं शृंगाररसस्य अपूर्वं प्रतिपादनं च दर्शितम्। मानवजीवनस्य विविधावस्थाः, अनुभूतयः, सहजं सरलतां च गाथासप्तशतीमध्येसूक्ष्मरूपेणप्रतिफलिताः।

अस्य काव्यस्य प्रभावेण परवर्तीकाले कविगोवर्धनः संस्कृतभाषायां आर्यसप्तशतीं रचयामास। गोवर्धनः बंगराजलक्ष्मणसेनस्य सभाकवेः तथा प्रसिद्धकवेः जयदेवस्य समसामयिकः आसीत्। आर्यसप्तशतीमध्ये प्रेम-शृंगारः, जीवनस्य भिन्नदिशः अपूर्वरूपेण प्रतिपाद्यन्ते। प्राकृतसंस्कृतसाहित्ये एतानि गीतिकाव्यानि भारतीयसाहित्ये सुष्ठुप्रभावं विस्तारयामास।

अमरूशतकं नामकं प्रसिद्धं गीतिकाव्यं काव्यकारः अमरुः रचयामास। अनुमीयते यत् अमरुः युगस्य पूर्वे काव्यकृत्कविः आसीत्। अस्मिन काव्ये शतश्लोकाः समाविष्टाः

याः एषा सृष्टिर्विशेषं सौंदर्यं प्रदानं कर्तुं शक्नोति। पद्येषु भावप्रवृत्तिः च मनोहरं रूपं च काव्यं अपूर्वगुणैः समृद्धिम् अर्पयति। काव्ये विभिन्नानि छन्दः दीर्घसमासांश्च सुसंयोगेन प्रत्यक्षेण दृश्यन्ते। एतत् गीतिकाव्यं शृंगाररसपूर्णं च भाषायाः लालित्येन प्रेम्नः गहरेण च अनूठं अनुत्तमं रूपं प्राप्तम् अस्ति।

प्रसिद्धव्याख्यानानुसारं भगवान् आदिशंकराचार्यः मण्डनमिश्रस्य पत्नीभारतीसमक्षे रतिचार्चासम्बन्धी कठिनप्रश्नान् उत्तरितुं अक्षमं आसीत्। सः अमरुनामकं राज्ञः देहं धारयित्वा रानीसहितं समयं व्यतीतवान्। तस्मिन् काले शंकराचार्येण रतिचर्चायाः विषये विषदज्ञानं प्राप्तम्। तस्मिन् अनुभवसम्पन्नतया अमरुः अमरूशतकं नामकं गीतिकाव्यं रचयामास। अस्मिन् काव्ये कविना भाषायाः लालित्यं च प्रेम्नः गभीरं सुन्दरं समन्वयं च कृतम्।

चौरपञ्चाशिका नामकं अन्यं गीतिकाव्यं एकादशशतिकायां कश्मीरीकविः बिल्हणेन रचितम्। अस्मिन् काव्ये पञ्चाशत्श्लोकाः आसन्, यत्र प्रत्येकं श्लोकं प्रेमिकप्रेमिकयोर्मध्ये प्रेम्नः मधुराभिव्यक्तिः प्रदर्शिताः। कथायामुक्तमस्ति यत् कविबिल्हणः गुजरातराजवीरसिंहस्य राजकन्यायाः गृहशिक्षकरूपेण नियुक्तमासीत्। कालक्रमेण कविना सह राजकन्यायाः प्रेमबन्धनं निर्मितं जातम्। एषा वार्ता राज्ञः कर्णे पतितः। राजा क्रुद्धः भूत्वा कविं मृत्युदण्डं प्रादिष्टवान्।

मृत्युदण्डं स्वीकृत्य वध्यभूमिं प्रति वहनकाले कविबिल्हणेन मार्गे स्वप्रेमिकां उद्दिश्य स्वतः पञ्चाशत्श्लोकाः रचितवान्। यदा सः अन्तिमं श्लोकं रचितवान्, तदा घातकः राजानम् सूचितवान्। एषा घटना राजानम् प्रभावितं कृतवान्। श्लोकेषु अन्तर्निहितं प्रेमं अवगत्य राजा कविं क्षमां कृतवान् राजकन्यया सह विवाहनिर्णयं कृतवान्। अस्मिन् काव्ये मर्मस्पर्शीप्रभावः प्रेमशक्तेः अपूर्वं उदाहरणं दृश्यते।

गीतिकाव्यस्य एकः विशेषशाखारूपेण भक्तिकाव्यानि व्याप्नोति। एतानि काव्यानि भक्तिभावेन पूर्णमस्ति। एतेषु काव्येषु भक्तेः माहात्म्यं तथा उपास्यदेव-देवीषु सदेवं संवेदनशीलं च मनस्थितिं अभिव्यक्तिं दर्शयति। समाजे एतानि काव्यानि अतिशयं लोकप्रियं धार्मिक-दार्शनिकचिन्तनैः च समृद्धाः आसन्। संस्कृतसाहित्ये अनेकानि कवयः शृंगाररसयुक्तानि काव्यानि रचयित्वा भक्तिप्राणयुक्तान् व्यक्ती रोचयन्ते। भक्तिकाव्येषु देव-देवीषु शारीरिकसौंदर्यस्य स्तुतिं तथा तेषां देवत्वमहिमां भावानां चित्रनं च अङ्कयन्ति।

भक्तिकाव्यानां मध्ये कालिदासस्य 'श्यामलादत्तक' काव्यं प्रसिद्धम्। यद्यपि एतत्काव्यं कालिदासेन रचितं इति कथ्यते, तथापि एषा सूचना पूर्णरूपेण सुनिश्चितं नास्ति। अस्मिन् काव्ये देवीसरस्वत्याः सौंदर्यवर्णनम् उच्चैः कृतम्। श्यामलादत्तकसदृशकाव्यानि देव-देवीभ्यः अर्पितभावस्य अद्वितीयम् उदाहरणम्।

सप्तमशतिकायां प्रसिद्धः गद्यकविबाणः 'चण्डीशतकम्' नामकं भक्तिमूलकं गीतिकाव्यं रचयामास। अस्मिन् काव्ये द्वयाधिकाशतकं श्लोकसंयोगः दृश्यते।

देवीचण्डीमहात्म्यं वर्णितं 'मार्कण्डेयपुराणम्' अस्य काव्यस्य मुख्यं स्रोतमस्ति। अस्मिन् काव्ये देवीचण्ड्याः स्तुतिं तथा अर्चनां सुंदररूपेण व्याख्यायते। दीर्घसमासयुक्ताः अलंकारश्रेण्याः काव्यमेतत् आकर्षितरूपं प्रददाति।

सप्तमशतिकायाः अन्यः एकः विशिष्टकविमयूरेन 'सूर्यशतकम्' नामकं प्रसिद्धं भक्तिकाव्यं रचितम्। किंवदन्त्यानुसारम्, मयूरः बाणस्य समसामयिकः शिष्यः च आसीत्। अस्मिन् काव्ये सूर्यदेवस्य स्तुतिं कृतवान्। कविसूर्यदेवस्य विभिन्नांगानि, रथं, अश्वान् च सुंदररूपेण वर्णयति। एतत्स्तुतिकाव्यं शतश्लोकानां एकं सृजनात्मकं संकलनम्।

भक्तिकाव्यस्य अन्यं महत्त्वपूर्णं सृजनमस्ति 'भक्तामरसस्तोत्रम्', यः मानतुंगेन जैनकविना रचितम्। सः स्वस्य रोगात् मुक्तिं प्राप्तुं जैनमुनिं स्तुतिं कृत्वा एतत् काव्यं लिखितवान्। मानतुंगस्य कालवधिः बाणमयूराभ्यां सह समकालिकः आसीत्। भक्ति-आत्मविश्वासानां गहनानुभूतिः काव्यस्य प्रमुखं लक्षणम्।

प्रथमशताब्देः कवि अश्वघोषेन 'गाण्डीस्तोत्रगाथा' नामकं गीतिकाव्यं रचितम्। तस्य रचना बौद्धधर्मेण संबंधितं मुख्यमन्त्रे सम्बद्धम् अस्ति। परवर्तीसमये शतशताब्देः कविमातृचेतः 'चतुःशतकं' तथा 'अध्यर्धशतकं' नामकं द्वे स्तुतिकाव्ये रचयामास। एतद्वयं काव्यं तिब्बतीभाषायां अनूदितमस्ति, यत् बौद्धधर्मस्य प्रसारस्य इदमेकम् उदाहरणम्।

बौद्धधर्मस्य स्तुतिकाव्येषु राजाहर्षेण 'सुप्रभातस्तोत्रं' तथा 'अष्टकमहाश्रीचैत्यस्तोत्रं' विरच्यविशेषं स्थानं प्राप्तम्। तस्य सृजनं बौद्धधर्मस्य सूक्ष्मं विवेचनं दर्शयति। तदुपरि आचार्यनागार्जुनेन 'चतुःस्तवं' नामकं महत्वपूर्णं बौद्धस्तोत्रं रचितम्। एतत् काव्यमपि तिब्बतीभाषायां अनूदितं भूयते। एतानि सर्वाणि काव्यानि भक्ति-धर्म-अनुभूत्यादीनां सुष्ठुरूपेण वर्णयित्वा एकं अद्वितीयं दृष्टान्तं प्रस्तूयते।

स्तोत्रकाव्यानां मध्ये 'स्तोत्ररत्नम्' इत्याख्यं प्रसिद्धं काव्यं दशमशताब्देः यमुनाचार्येण विरचितम्। एतत्काव्यं वैष्णवधर्मस्य मूलसिद्धान्तानां प्रचाराय रचितम्। यमुनाचार्यस्य अंतर्दृष्टियुक्तभक्तिः वैष्णवभावनां च स्पष्टता एतस्मिन् काव्ये गभीरं तात्पर्यं ददाति। वैष्णवपरंपरायाम् एतस्य काव्यस्य विशेषं स्थानं वर्तते।

लीलाशुकः इत्याख्यः कृष्णभक्तकविः 'कृष्णकर्णामृतम्' इत्येकं अद्वितीयं काव्यं रचितवान्। अस्मिन् काव्ये बालककृष्णस्य विविधाः लीलाः, गोपवधूनां कृष्णप्रेमः तथा रासलीलायाः मनोहारिणी वर्णनम् अस्ति। प्रायः ३०० श्लोकैः एतत्काव्यं त्रिषु अश्वासेषु विभक्तम्। श्रीचैतन्यमहाप्रभुः तथा श्रीमाधवदेवसदृशाः महान्धार्मिकनेतृणां उपरि अस्य काव्यस्य गभीरः प्रभावः दृश्यते। कृष्णस्य लीलाभिः प्रसिद्धम् एतत् काव्यं वैष्णवधर्मस्य जीवितं प्रतीकमिव वर्तते।

वैष्णवकविः वेङ्कटाध्वरिः सप्तदशशताब्देः 'लक्ष्मीसहस्रनाम'नामकं भक्ति-काव्यं रचितवान्। मद्रासप्रदेशे निवासिनं एतं कविं वैष्णवधर्मस्य अमूल्यरत्नमिति मन्यन्ते। अस्मिन् काव्ये सहस्रश्लोकैः लक्ष्मीदेव्याः स्तुतिः प्रशंसा च कृताः। भाषायाः सुललितत्वं

श्लोकानां गाम्भीर्यं च एतत् काव्यं विशेषस्थानं प्रददाति।

''स्तोतिकुसुमाञ्जलिः'' इति काव्यं चतुर्दशशताब्दे: कविना जगद्धरभट्टेन विरचितम्। अष्टत्रिंशत्स्तोत्रान्तर्गते चत्वारिंशदधिकद्विसहस्रश्लोकाः अस्मिन् काव्ये सन्ति। करुणरसस्य अनन्यं उदाहरणं भवति एतत् काव्यम्। वर्णनस्य गाम्भीर्यम्, अलङ्काराणां वैचित्र्यम्, तथा भावानां सूक्ष्मः प्रकर्षः एतस्य काव्यस्य विशेषतां प्रदर्शयन्ति।

''मुकुन्दमाला'' इति काव्यं वैष्णवसाहित्यस्य गौरवमयी रचना। एतत् काव्यं वैष्णवकविना कुलशेखरेण विरचितम्। चतुस्त्रिंशत्श्लोकैः एतत्काव्यं वैष्णवधर्मस्य आदर्शान् प्रतिफलति। वैष्णवस्तोत्रकाव्यानां मध्ये एतत्मुकुटमणिरूपेण परिगण्यते। अन्येकदार्शनिकगुणसम्पन्नं काव्यं ''शिवमहिम्नःस्तोत्रम्'' नामकं यत् शिवस्य स्तुत्यर्थं आचार्येण पुष्पदण्डकविना रचितं इति ख्यातिः।

शङ्कराचार्यस्य कृत्येषु ''सौन्दर्यलहरी'' तथा ''शिवानन्दलहरी'' नामकं स्तोत्रकाव्ये संस्कृतसाहित्ये अत्युत्तमं स्थानं अधिकृतं भवति। सौन्दर्यलहर्यां शतश्लोकैः महादेवीपार्वत्याः सौन्दर्यस्य अपूर्ववर्णनं क्रियते। अन्यत्, शिवानन्दलहरी महादेवं प्रति भक्तेः गम्भीरं चित्रं अङ्कयते। शङ्कराचार्यस्य धार्मिकं दार्शनिकं च चिन्तनं एतयोः काव्ययोः मध्ये प्रकाश्यते।

''मोहमुद्गरः'' अथवा ''भजगोविन्दस्तोत्रम्'' इत्यस्मिन् काव्ये शङ्कराचार्यः जनानां मोहविमुक्तिं कर्तुं दार्शनिकं सत्यं वर्णयति। सरलया भाषया विरचितं एतत् काव्यं पाठकान् वा श्रोतृन् चिन्तनशीलान् करोति।

जयदेवेन रचितं ''गीतगोविन्दम्'' संस्कृतगीतिकाव्यानां इतिहासे सर्वोच्चं स्थानं प्राप्नोति। द्वादशशताब्दे: बङ्गदेशे राजालक्ष्मणसेनस्य सभाकविना जयदेवेन एतत्काव्यं विरचितम्। राधाकृष्णयोः लीलावर्णनैः युक्तं एतत् काव्यं द्वादशसर्गेषु विरचितम्। मेघदूतमानुसृत्यं एतत्काव्यं वैष्णवधर्मस्य मधुरतमं सृष्टिरूपेण प्रख्यातम्।

गीतिकविजयदेवस्य जीवनस्य प्रारम्भिककालं मथुरावृन्दावनयोः परिभ्रमणेन व्यतीतवान्। तत्र सः राधाकृष्णयोः मनोहरगीतकथाः श्रुत्वा तीव्रं प्रेरणाम् अनुभवत्। अस्य अनुभवेण तस्य हृदये राधाकृष्णयोः लीलानां गाम्भीर्यं प्रेम च भक्तिश्च संचारिताः।

परवर्तीकाले सः पुरीं जगन्नाथधामं गतवान्, यत्र पद्मावती इति नाम्ना स्त्रियं परिणीतवान्।

जयदेवस्य सर्जनशीलता च गाम्भीर्यं च लक्ष्मणसेनस्य राजसभायामपि मान्यता प्राप्तम्। राजालक्ष्मणसेनः जयदेवं पञ्चरत्नेषु प्रमुखत्वेन सम्मानितवान्। जयदेवस्य जन्मकालं विषयकं कविसमाजमतेन यत् सः द्वादशशताब्दे: उत्तरार्धे अवतीर्णः जातः।

पण्डितजगन्नाथस्य गीतिकाव्येषु भक्तिरसस्य विशेषधारां व्यक्तं भूतम्। तेन विरचितानि गीतिकाव्यानि— गङ्गालहरी, अमृतलहरी, करुणालहरी, लक्ष्मीलहरी, तथा सुधालहरी—एतेषु भक्तेः गाम्भीर्यम् आत्मीयता च परिदृश्यमानं भूयते।

काव्यसाहित्यस्य युगे बाणभट्टस्य 'हर्षचरितम्' ऐतिहासिकपटभूमौ रचितम्। पुष्यभूतिवंशस्य राजाश्रीहर्षस्य शासनकाले घटितानां समस्तानां घटनानां कालानुक्रमिकं वर्णनं कविना अत्रोपस्थाप्यते। तथापि 'हर्षचरितम्' इतिहासस्य वस्तुनिष्ठ अभिलेखः नास्ति, कविना गद्यकाव्यरूपेणैव काव्यमिदं रचितम्। तथापि हर्षचरितस्य प्रथमे अंशे वर्ण्यमाना बाणभट्टस्य जीवनकथा महती ऐतिहासिकप्राप्तिः।

गौडवहः –

अन्यत् उल्लेखनीयम् ऐतिहासिककाव्यमस्ति वाकपतिराजस्य 'गौडवह' इति। महाराष्ट्रीप्राकृते निबद्धमिदं काव्यं १२०८ श्लोके निबद्धम्, यशोवर्मना गौडेश्वरस्य पराजय एव अस्य ग्रन्थस्थ प्रतिपाद्यः मुख्यविषयः। अष्टमशतिकायां रचिते काव्येऽस्मिन् कवेः परिचयो किञ्चित् ज्ञायते।

नवसाहसाङ्कचरितम् –

इतिहासस्य पश्चाद्भूमौ रचितमपरं काव्यमस्ति 'नवसाहसाङ्कचरितम्', नवसाहसाङ्कः पारमारवंशीयनरपतेः मुञ्जस्य अपरो नाम। धाराधिपतिनवसाहसाङ्कस्य शासनकाल एव अस्य ग्रन्थस्य रचनायाः समयः। अष्टादशसर्गात्मकस्यास्य काव्यस्य सिन्धुराजेन सह शिशुपालनागस्य कन्यायाः शशिप्रभायाः परिणयवृत्तान्त एव मुख्यविषयः।

विक्रमाङ्कदेवचरितम् –

एकादशशतिकायां काश्मीरप्रदेशे विरचितस्य विक्रमाङ्कदेवचरितस्य रचना बिल्हणेन कृता, ग्रन्थस्य मुख्यः चरित्रः चालुक्यराजा। युद्धविवादम् चावलम्ब्य रचितेऽस्मिन् काव्ये विक्रमादित्यत्रिभूवनमल्लं प्रशंसितम्। चालुक्यचोलशासनव्यावस्थायाः न ग्रन्थेऽस्मिन् प्राप्यते।

राजतरङ्गिणी -

ऐतिहासिकपरम्परायां लिखितं महत्वपूर्णं ग्रन्थमस्ति कल्हणस्य 'राजतरङ्गिणी' इति। तस्य पिता चपणकः तत्कालीनस्य काश्मीरराजस्य श्रीहर्षस्य मुख्योऽमात्य आसीत्। राज्ञ अलकदत्तस्याग्रहेन, राज्ञः जयसिंहस्य उत्साहेन च कल्हणेन राजतरङ्गिणी रचिता। ग्रन्थमिदं कल्हण एकादश-ऐतिहासिकग्रन्थेषु नीलामत्पुराणञ्चानुसृत्य रचितवान्। प्राचीनकालात् द्वादशशतिकापर्यन्तं काश्मीरस्य इतिहासं प्रामाणिकरूपेण अस्मिन् ग्रन्थे सञ्जीकृतं वर्तते। अनेकशिलालेखान्, दानस्तुतीन्, पाण्डुलिपिन् चाधारीकृत्य राजतरङ्गिण्याः रचनमभवत्। कविना निष्पक्षतया काव्यमिदं रचितमिति कारणात् सर्वोत्तम-ऐतिहासिककाव्यस्य स्थाने स्थितम्। काश्मीरविषये ज्ञातानि सर्वाणि तथ्यानि अस्मिन् ग्रन्थे प्रस्तुतानि सन्ति। यद्यपि काश्मीरराज्ञां पौर्व्यापोर्वे, स्थितौ च केचन् असंगतिः दृश्यते तथापि तत्कालीनस्य काश्मीरस्य सामाजिकव्यावस्थायाः निर्दोषं विवरणं प्राप्यते। विषयवर्णने चरित्रवर्णने रसपरिवेशने च एतादृशम् ऐतिहासिककाव्यं संस्कृतसाहित्यजगति नोपदृश्यते।

राजतरङ्गिणी ग्रन्थे ८ तरङ्गाः ७८२६ श्लोकाश्च सन्ति। अथ गोनन्दनामकनृपात् आरभ्य, विभिन्नानां राजवंशानां वर्णनमुपलभ्यते। ऐतिहासिकमूल्येन सह अस्य काव्यात्मकता अपि कवेः निपुणतां प्रदर्शयति। ललितमधुरसरलभाषया ग्रन्थमिदम् उत्कृष्टकाव्यरूपेण स्वीकृतम्। रसालंकारदीनां प्रयोगे अपि कविः कुशलतां प्रदर्शयति।

कल्हणस्य पश्चात् केचन लेखकाः राजतरङ्गिणीमनुसत्य अपरा 'राजतरङ्गिणी' इत्याख्यं ग्रन्थं रचितवन्तः। तेषां मध्ये जौमराजः चुलतान-जयनुल-आवेदिनस्य शासनकालपर्यन्तम् (१४१९-१४७०ई.) इतिहासं लिपिवद्धं कृतवान्। तस्यैव शिष्य श्रीवरः १४५९ई -८६ई. पर्यन्तं काश्मीरस्येतिहासं लिपिबद्धमकरोत्। प्राज्यभट्टः नामक अपरः लेखक अपि चतुर्थ्यां राजतरङ्गिण्याम् इतिहासं प्रकाशितवान्।

कुमारपालचरितम् -

हेमचन्द्रेण विरचितं 'कुमारपालचरितम्' द्वयाश्रयकाव्यम् इति नाम्ना अपि ज्ञायते। ईसवीये १०८९ तमे वर्षे हेमचन्द्रस्य जन्मोऽभवत्। काव्येऽस्मिन् अष्टाविंशति सर्गाः सन्ति। विंशति सर्गाः संस्कृतभाषायां शेषाः प्राकृतभाषायां रचिताः। एतदेव कारणाद् अस्य काव्यस्य नाम द्वयाश्रयकाव्यम्। हेमचन्द्रः कुमारपालस्य अमात्य आसीत्।

रामपालचरितम् -

सन्ध्याकरनन्दिनः रामपालचरितस्य रचना एकादशशताब्द्यामभवत्। अत्र वंगदेशस्य नृपस्य रामपालस्य पराक्रमवर्णनेन सह भारतवर्षस्य पूर्वभारतस्य विश्वसनीय इतिहासः प्राप्यते।

पृथ्वीराजविजयम् -

द्वादशशताब्द्यां जयानकेन रचितम् पृथ्वीराजविजयमिति काव्यं खण्डितावस्थायां प्राप्यते। काव्येऽस्मिन् चौहानकुलश्रेष्ठः पृथ्वीराजराजस्य वीरत्ववर्णनमुपलभ्यते। ११९१

ईशवीये, पृथ्वीराजः शाहावुद्दीनघोरीं विजितवान्।

त्रयोदशशतिकायां सोमेश्वरदत्तः कीर्तिकौमुदीं, चतुर्दशशताब्द्याम् अरिसिंहः सुकृतसंकीर्तनम्', पञ्चदशशताब्द्यां नयचन्द्रसूरिः चौहामनृपस्य हम्मीरस्य वर्णनं चतुर्दशसर्गात्मकं हम्मीरवर्णनमिति काव्यं रचितवन्तः।



ज्ञातव्यम्

ऐतिहासिककाव्यस्य परम्परा संस्कृतसाहित्यजगति अविच्छिन्नरूपेण प्रचलिता अस्ति आधुनिककालेऽपि अनेके विद्वांस ऐतिहासिकविषयमवलम्ब्य बहुनि काव्यानि रचितवन्तः। तेषां मध्ये कवीन्द्रपरमानन्दप्रणीतं शिवभारतम्, रामभद्राम्बायाः रघुनाथाभ्युदय, कवेः मैथिलस्य ताराचन्द्रोदयम्, अम्बिकादत्तव्यासस्य शिवराजविजयम् इति प्रधानानि।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: हर्षचरितस्य लेखकः कः ?

.....

प्रश्न २: कल्हणेन किम् रचितम् ?

.....

प्रश्न ३: किं काव्यं द्वयाश्रयकाव्यमिति ज्ञायते ?

.....

८.५ लिपिकाव्यं तथा विभिन्नानां लिपिकाव्यानामुल्लेखः

प्राचीनभारतस्य इतिहासरूपेण लिपिकाव्यस्य महत्वं यथा अपारमस्ति तदेव भारतीयकाव्यसाहित्यवैभववर्धनेऽपि लिपिकाव्यानामवदानम् अनिर्वचनीयमस्ति। प्रायेण लिपिकाव्यं छन्दोनिबद्धं प्रशस्तिमूलकं च। काव्यिकगुणसम्पन्नस्य गद्यस्यापि अत्र उदाहरणानि न दुर्लभानि। अधुना भवान् कानिचित् लिपिकाव्यानि अध्येतुं शक्नोति।

गिरनारलिपिः -

लिपिकाव्येषु महाक्षत्रप रुद्रदामनस्य गिरनार-शिलालेखः उल्लेखनीयः अस्ति। अलंकार रसादिप्रयोगदृष्ट्या लेखोऽयं काव्येषु उच्चकोटेः स्थानं प्राप्नोति। सुदर्शनसरसः प्लावनवर्णस्य काव्यसौन्दर्ये अतुलनीयम्। राजा रुद्रादामनः गद्य-पद्य-उभयोः लेखने कुशलः आसीत्। वैदर्भीरीतेः निपुणतायाः निदर्शनमपि अस्मिन् शिलालेखे प्राप्यते। शिलालेखोऽयं १५० ईशवीये लिखितः।

नासिकलिपि -

गिरनारलिपेः समकालिनः एवास्ति सिरिपुलोमभ्यः नासिकलिपिः। द्वितीयशतिकायाम् अस्य रचनमभवत्। प्राकृते रचिता इमा लिपिः दीर्घसमासवधोऽपि सन् अनुप्रास-अलंकारप्रयोगेन

मनोज्ञा भवति।

इलाहावादप्रशस्तिः –

अस्य रचयिता हरिषेणः। मूलतः इयं लिपिः समुद्रगुप्तस्य प्रशस्तिः एव। इशवीये ३४०तमे वर्षे अस्याः रचनमभवत्। लिपिसाहित्यस्य श्रेष्ठतमः निदर्शनः अस्ति इयं लिपिः। अस्याः समुद्रगुप्तस्य कुलमहिमा, चरित्रवर्णनं, दिग्विजयविषये सम्यक् ज्ञानं लभते। समुद्रगुप्तः कविः विद्वान् च आसीत्। संगीतादिकला-विद्यायाः अपि विशारदः आसीत्। गद्यपद्यसंमिश्रणेन रचिते अस्मिन् प्रशस्तौ कवेः काव्यरचने निपुणता दृश्यते। रसालंकारदीनां प्रयोगेण इयं प्रशस्तिः काव्यत्वगुणेन समृद्धा भवति। न केवलं काव्यिकदृष्ट्या अपि तु ऐतिहासिकदृष्ट्या अपि अस्याः प्रशस्तेः अपारं महत्वं वर्तते।

मान्दासोरलिपिः –

प्राचीनकाव्यसाहित्यस्य उपजीव्यरूपेण उल्लेखनीयः अपरः शिलालेखः अस्ति मान्दासोरलिपिः। अस्य रचना ४७२ इशवीये अभवत्। अस्य रचयिता आसीत् वत्सभट्टिः। दशपुरस्य मान्दासोरसूर्यमन्दिरस्य प्रतिष्ठास्मारकरूपेण चतुःचत्वारिंशत्-श्लोकैः रचितः अयं शिलालेखः कवेः कवित्वशक्तेः परिचायकः। बहवः श्लोकाः कालिदासस्य रचनासादृश्यं धारयन्ति।

आइहोलशिलालेखः –

६३४ इशवीये लिखितः पुलकेशीद्वितीयस्य आइहोल इति शिलालेखः काव्यकृतेः उत्कृष्टः निदर्शनः। अस्मिन् शिलालेखे कालिदासभासयोः उल्लेखमस्ति। तेन तयोः कालनिरूपणे सौकर्यं जातम्। रविकीर्तिना लिखिते अस्मिन् शिलालेखे सप्तत्रिंशत् श्लोकाः सन्ति।

निधानपुरताम्रलिपिः –


सप्तमे ईशवीये निधानपुर ताम्रलिपेः रचनमभवत्। अत्र प्राचीनकामरूपस्य राज्ञः भास्करवर्मणः वर्णनमुपलभ्यते। मङ्गलाचरणे महेश्वरस्य स्तुतिः प्राप्यते। गद्यांशः दीर्घसमासत्वात् बाणभट्टेनास्य गद्यशैल्याः तुलना क्रियते। अस्मिन् शासने भौमनरकवंशस्य अन्येषां राज्ञामपि वर्णनमस्ति। काव्यिकसौन्दर्येऽपि रसालंकाराणां प्रयोगेण अयं प्रशंसनीयः। प्राचीनकामरूपस्य वर्णनं, भास्करस्य समकालिनः श्रीहर्षराजस्य सन्दर्भेऽपि अस्मात् विज्ञायते।

भारतवर्षस्य विभिन्नेषु प्रान्तेषु बहुलिपयः सन्ति। तासां मध्ये सर्वासां पाठोद्धारं न जातम्। परन्तु एते लेखाः भारतवर्षस्य कलासाहित्यसंस्कृतेः इतिहासविषये, तस्य युगस्य चित्रं प्रकाशयन्ति। काव्यस्य भाषायाश्च विवर्तनस्याध्ययने लिपिकाव्यमपि मार्गं प्रदर्शयति।



ज्ञातव्यम्

अधिकांशानि लिपिकाव्यानि प्रशस्तिमूलकानि। कदाचित् ब्राह्मणेभ्यः दीयमानाः शासनाश्च भवन्ति। सामान्यतया भारतवर्षे लेखनार्थे प्रयुज्यानि साधनानि तालपत्रम्, भूर्जपत्रम्, कर्गदं, कपासवस्त्रं, काष्ठफलकं, चर्म, पाषाणं, इष्टकाः धातुश्च आसन्। कर्गदवस्त्रपत्रेषु लेखनमाध्यमं मसि आसीत्। लेखनयन्त्रे लेखनी वर्णवर्तिका, शलाका इत्यादयः प्रयोज्याः अभवन्।



अग्रगत्याः निरीक्षणम्

प्रश्नः ४: गिरनारलिपिः केन रचिता ?

.....

प्रश्नः : नासिकलिपिः कस्यां भाषायां रचिता ?

.....

प्रश्नः ६: हरिषेणेन कां लिपिं लिखितवान् ?

.....

प्रश्नः ७: कस्यां लिप्यां कालिदासभारवयोः उल्लेखमस्ति ?

.....

प्रश्नः ८: निधानपुर ताम्रलिपेः भाषा केन कविना सह तुलना क्रियते ?

.....

८.६ कोषकाव्यं तथा विभिन्नानां कोषकाव्यानामुल्लेखः

अधुना भवता कोषकाव्यविषये ज्ञास्यते। कोषकाव्यमिति परस्परनिरपेक्षं समानविधायां काव्यसंग्रहम्। मुक्तकसंग्रहेषु, कोषकाव्येषु वयं संस्कृतसाहित्यस्य स्थानम् अनेकेषां ख्यातकवीनां परिचयं प्राप्नुमः, येषां काव्यं अन्यरूपेषु न लभ्यते, येषां नामानि एव केवलं एतेषु ग्रन्थेषु एव उल्लिख्यते। कविहालस्य 'गाथा साप्तसती' अथवा गाहासतसर काव्यजगति प्रथमम्। परन्तु अस्य भाषा-महाराष्ट्री प्राकृतः आसीत्। इदानीं संस्कृते रचितानि सूक्तिसंग्रहाः, सुभाषितसंग्रहाः अथवा कोषकाव्यानि उल्लिख्यन्ते।

कवीन्द्रवचनसमुच्चयः - प्राचीनतमा सुभाषितरलकोषः अस्ति कवीन्द्रवचनसमुच्चयः। 'ड. एफ. डब्लुउ रमास महाभागेन १९२२ ईसवर्शे प्रकाशितः। परन्तु तत् तु अपूर्णमासीत् । वनदेव उपाध्यायमते तु अस्य प्रथमः संकलनकर्ता विद्याधरः ११०० ईसवीये संग्रहं कृतवान्। अन्य कालिदासभोजादीनां रचना अपि दृश्यते। श्लोकसंख्या अपि उपाध्याय-महाभागानां मते २७३८.

सदुक्तिकर्णामृतः- अस्य संकलनं वंगदेशस्थ प्रसिद्धराजालक्ष्मणस्य धर्माध्यक्षवटुदासस्य पुत्रः श्रीधरदासः १२०५ ईसवीये कृतवान्। सदुक्तिकर्णामृतस्य महत्वस्य उपयोगितायाश्च कारणात् सूक्तिसंग्रहेषु यथार्थतया अद्वितीयमिति गणयितुं शक्यते। समस्तग्रन्थम् अमर शृंगारः, चाटु अपदेश उच्चावचश्चेति पञ्चप्रवाहे विभक्ताः, अस्मिन् ग्रन्थे ४८५ कवीनां रचना उद्धृता। अत्र श्लोकसंख्या २३८० दृश्यते। प्रायः पञ्चाशत् कवीनामुल्लेखः संरकृतसाहित्ये प्राप्यते । अवशिष्टानां चतुःशताधिकानां कवीनां नाम्ना प्रमाणितमेतत् यत् मध्ययुगेऽपि संस्कृत-काव्यस्य प्रचुरमात्रायां रचनमभवत्।

सूक्तिमुक्तावली - अस्य ग्रन्थस्य रचयिता यादवनरेशकृष्णस्य करिवाहिनीपति भगदत्तः जल्हणः आसीत्। सूक्तिमुक्तावल्ल्यां २४३ कविना विरचिताः २८०० श्लोकाः वर्तन्ते। अस्य रचना १२५७ ईसवीये अभवत्। जल्हणदेशेन वैधभानुकवि अस्य रचनमकरोत् इति एका कथा

प्राप्यते। ग्रन्थस्य विभागाः 'पद्धति' इति नाम्ना ज्ञायते। राजशेखरेन उल्लिखितानि प्राचीनमहिलाकवेः नामानि अत्रेव प्राप्यन्ते।

शार्ङ्गधरपद्धतिः - अस्य रचयिता शार्ङ्गधरः शाकम्भरीदेशाधिपति नृपस्य हम्मीरस्य प्रपौत्रः आसीत्। अत्र २६३ परिच्छेदाः ६३०० श्लोकाः आसीत्। परन्तु अधुना ४६१६ श्लोका एव प्राप्यते। १३६३ इशवीये अस्य रचनमभवत्। अस्मिन् संग्रहे नवीनानां विषयानां समायोजनं दृश्यते। अन्तिमभागे शान्तरसस्य योगस्य च विस्तारेण वर्णनमुपलभ्यते।

सुभाषितावली - सुभाषितावली इति कोषकाव्यस्य रचयिता वल्लभदेवः। संग्रहेऽस्मिन् ३५२७ श्लोकाः सन्ति। वल्लभदेवः काशी-प्रदेशस्य निवासी आसीत्। वल्लभदेवः ग्रन्थे जोनराजमुल्लिखितवान्। जोनराजा काश्मीरसुलतानजयनाल-आवेदिनस्य समकालिक आसीत्। अतः अस्य कालनिर्धारिणं चतुर्दशशतिकायां कर्तुं शक्यते।

पद्यावली - पञ्चदशशतिकायां वङ्गदेशस्य रुपगोस्बामीमाहाभागोऽपि 'पद्यावली' इति नाम्ना कृष्णभक्तिविषयका सूक्तान् आकलितवान्। बहुवंगीय कवयः अत्रोपलभ्यन्ते येषां सूचना कुत्रापि न लभ्यते। अस्मिन् लघुसंग्रहे २२५ कविभ्यः संगृहीताः ३८६ श्लोकाः सन्ति। अमरू-भवभूति-इत्यादयः प्राचीनाः कवयः अपि अत्र उद्धृते। अस्मिन् ग्रन्थे केवलं राधाकृष्णयोः ललितलीलाविषयकाः श्लोकाः एव संगृहीताः।

हारावली - हारावली अथवा सुभाषितहारावली इति संग्रहस्य संकलकः आसीत् हरिकविः। स दक्षिणादेशनिवासी आसीत्। काश्मीरतः कन्याकुमारीपर्यन्तं ये कवयः आसन् तेषां सर्वेषां रचनं संगृहीतवान्। अकवरसभाया 'अकबरयमकालिदासः' इति कोऽपि कवि तेनोलिखितः। जगन्नाथस्य भामिनीविलासादपि तेन उद्धृते। अतः हरिकवेः समयः सप्तदशे निरूप्यते ।

अन्यानि अपि कोषकाव्यानि सन्ति। तेषां मध्ये आचार्यसिद्धमणिकृतः सूक्तिरत्नाकरः, हरिदासस्य प्रस्वावरत्नाकरः व्रजनाथस्य पद्यतरङ्गिणी, नारोजीपण्डितस्य सुभाषितरत्नभाण्डागारः, सूक्तिमालिका च प्रधानानि।


वेदभाष्यकारसायणाचार्यस्य अपि ग्रन्थद्वयं प्रसिद्धमस्ति सुभाषितसुधानिधिः, पुरुषार्थसुधानिधिश्च। संस्कृतसाहित्ये बहवः संग्रहकाराः सन्ति। तेषां संग्रहाणाम् ऐतिहासिकमूल्यमपि चिन्तनीयम्।



ज्ञातव्यम्

कोषकाव्यं सुभाभिवली, संग्रहकाव्यम् इत्यादिनाम्ना अपि ज्ञायते।
सुभाषितस्य महत्त्वमुच्यते-

पृथिव्यां त्रीणि रत्नानि जलमन्नंसुभाषितम्।
मूढ़ा पाषाणखण्डेषु रत्नसंज्ञा विधीयते।



अग्रगत्याः निरीक्षणम्

प्रश्नः ९: 'गाथा सप्तशती' इति काव्यं कस्यां भाषायां रचितम्?

.....

प्रश्नः १०: 'कवीन्द्रवचनसमुच्चय' इतिकोषकाव्यस्य संकलकः कः?

.....

प्रश्नः ११: सदुक्तिकर्णामृते कति प्रवाहाः सन्ति?

.....

प्रश्नः १२: सूक्तिमुक्तावल्याः विभागाः केन नाम्ना ज्ञायते?

.....

प्रश्नः १३: 'सुभाषितावली' इति कोषकाव्यस्य रचयिता कः?

.....

८.७ पालिकाव्यम्

अधुना भवान् पालिकाव्यविषये ज्ञातुं शक्नोति। संस्कृत-काव्यवत् पालिसाहित्यधारा अपि अविच्छिन्नरूपेणाद्यापि प्रवहति। महात्माबुद्धस्य जीवनादर्शः बौद्धधर्मस्य तत्वमेव पालिभाषायां लिखितसाहित्यस्य प्रधानवैशिष्टम्। यद्यपि सुगतस्य शिक्षायै, बौद्धधर्मस्य प्रचाराय काव्यानां रचनमभवत्, तथापि अलंकाररसादीनां प्रयोगे उत्कृष्टगुणोपेता भवन्ति। काव्यानि संस्कृतकाव्यानुसृतानि वर्तन्ते। अतः एषु काव्येषु संस्कृतकाव्यरीतेः प्रभावः दृश्यते।

पालिकाव्यस्य भागद्वयं प्राप्यते। वर्णनात्मकं आख्यानात्मकं च। वर्णनात्मककाव्येषु द्वादशशतिकायाः तेलकटाहगाथा, बुद्धरक्षितस्य जिनालंकारः, त्रयोदशशतिकायाः मेघकटस्य लोकप्यदीपसार, उल्लेखनीयानि। अपरकाव्यानि अनागतवंस, पञ्चमधु, सद्यम्मोपायन, पञ्चगतिदीपन इत्यादीनि प्राप्यते।

आख्यानात्मके ग्रन्थाः सीलवंसस्य बुद्धालंकारः, रसवाहिनी सहस्ववत्युपकरणम्, राजाधिरासविलासिनी च। प्रायशः सर्वासां रचनायां विषयवस्तु त्रिपिटकान् गृहीतम् आसीत्। त्रिपिटकस्य विषयवस्तुः परिवर्तनेन, परिवर्धनेन, संशोधनेन च पालिकाव्येषु छन्दोवद्धं क्रियते।



ज्ञातव्यम्

पालि एका प्राचीना प्राकृतभाषा। अस्याः भाषायाः यानि वैशिष्टानि सन्ति, तस्मादेतद् स्पष्टं भवति यत् इयं भाषा लौकिकसंस्कृतस्य अपेक्षया वैदिकभाषायाः निकटतमा वर्तते। बुद्धवचनं यस्यां भाषायां संगृहीतं भवति, सा एव पालिभाषा। पालिभाषायां लिपिवद्धं अशोकसमये अभवत्। ततः सिंहले

सिंहलीलिप्यां त्रिपिटकस्य पुनर्लेखनमभवत्।

पालिसाहित्यस्य भागद्वयं वर्तते, पालि अथवा पिटकसाहित्यम्, अनुपालि अथवा अनुपिटकसाहित्यम्। पालिसाहित्यस्य कालः बुद्धपरिनिर्वाणतः ईसवीय पूर्वतः प्रथमशतिकापर्यन्तम्। अनुपिटक-साहित्यस्य कालः ईसवीयप्रथमशतिकातः वर्तमान कालपर्यन्तं गणयितुं शक्यते। पालिसाहित्यं न केवलं भारतवर्षे एव सृष्टम् अपि तु श्रीलंकायाम्, ब्रह्मदेशे (म्यानमार) अपि पालिसाहित्यस्य रचना अभवत्। दशम-एकादशईसवीयतः पालिकाव्यानां रचता अभवन्।



अग्रगत्याः निरीक्षणम्

प्रश्नः १४: कस्य धर्मस्य प्रचाराय पालिकाव्यानां रचनमभवत्।

.....

प्रश्नः १५: पालिकाव्यस्य कति भागं वर्तते।

.....

प्रश्नः १६: बुद्धरक्षितः कस्य काव्यस्य रचनां कृतवान्।

.....

८.८ अध्यायस्य असमीयाभाषायां सारांशः

এতিয়া আপোনালোকে ইতিমধ্যে পঢ়ি অহা পাঠ্যাংশৰ থূলমূলকৈ অসমীয়া বৰ্ণনা পঢ়িবলৈ পাব।

ঐতিহাসিক কাব্য — ইতিহাস লিপিবদ্ধ হোৱা কাব্যই ঐতিহাসিক কাব্য। ঐতিহাসিক গ্ৰন্থ বুলিলে পাশ্চাত্য আৰু ভাৰতীয় দৃষ্টিভংগীৰ পাৰ্থক্য আছে। পাশ্চাত্যত ইতিহাস বুলিলে কাল আৰু তিথিতে কৰা ঘটনাৰ বৰ্ণনা। কিন্তু ভাৰতীয় ধাৰণাত কোনো মহাপুৰুষ বা প্ৰখ্যাত ৰজাৰ জীৱনৰ বৰ্ণনা, আদৰ্শ, সামাজিক আৰু নৈতিকতাত ইয়াৰ প্ৰভাৱ বৰ্ণনা কৰা হয়।

ইতিহাস সম্বন্ধীয় ৰচনা ভাৰতত প্ৰাচীন কালৰ পৰাই প্ৰচলিত হৈ আহিছে। ইতিহাস বুলি ক'লে পুৰাণ, ইতিবৃত্ত, আখ্যায়িকা, ধৰ্মশাস্ত্ৰ, আনকি ৰামায়ণ-মহাভাৰতো অন্তৰ্ভুক্ত হয়।

ভাৰতবৰ্ষত ঐতিহাসিক কাব্য তেনেই তাকৰ। ইয়াৰ কাৰণ কেইবাটাও। সেইবোৰ হ'ল-

প্ৰথমতে, ভাৰতীয়লোকসকল ইহলোকতকৈ পৰলোকত বেছি বিশ্বাসী সংসাৰৰ নিৰৰ্থকতাৰ কথা ভাবি সংঘটিত ঘটনাসমূহ লিপিবদ্ধ কৰা নহয়।

দ্বিতীয়তে কবিসকলে পৃষ্ঠপোষক ৰজাক প্ৰশংসা কৰিবলৈ চেষ্টা কৰিছিল। সেয়েহে প্ৰকৃত ইতিহাস লেখন সম্ভৱ হোৱা নাছিল।

তৃতীয়তে, কাব্যিক গুণসম্পন্নতাত বেছি গুৰুত্ব প্ৰদান কৰা বাবে কাব্যসমূহত ইতিহাসতকৈ কাব্যকৌশল অধিক প্ৰদৰ্শিত হৈছিল।

চতুর্থতে, ভাৰতীয় পৰম্পৰাত কৃষ্ণৰাম আদি ছবিসমূহ আদর্শনীয় চৰিত্র।

সেয়েহে ৰচনাসমূহত এই চৰিত্রসমূহেই প্রাধান্য পাইছিল। অন্য ঐতিহাসিকভাৱে প্রসিদ্ধ ৰজাসকলৰ বিষয়ে লিখা কমেই হৈছিল।

পঞ্চমতে সমগ্র ভাৰতবর্ষ জনপদত খণ্ডিত হোৱা বাবে এক ৰাষ্ট্রীয়ভাৱনাৰ অভাৱত ইতিহাস ৰচনাৰ বাবে উদ্বুদ্ধ হোৱা নাছিল।

বৈদিক ব্রাহ্মণগ্রন্থসমূহত পোন প্রথমবাৰৰ বাবেই ঐতিহাসিক গুণসম্পন্নতা দেখিবলৈ পোৱা যায়। পুৰাণসমূহো ভাৰতবর্ষত ইতিহাসৰ আধাৰ। মহাভাৰত আৰু ৰামায়ণকো ইতিহাস হিচাবেই গণ্য কৰা হয়। জৈন আৰু বৌদ্ধ পৰম্পৰাতো ইতিহাস ৰক্ষণৰ পৰম্পৰা দেখিবলৈ পোৱা যায়। ইয়াৰ উপৰিও শিলালেখ, তাম্রলেখ, দানপত্র, প্রশস্তিসমূহো ঐতিহাসিক গুণসম্পন্ন।

বুদ্ধদেৱৰ জীৱনৰ ওপৰত লিখা অশ্বঘোষৰ 'বুদ্ধচৰিত' প্রথম ঐতিহাসিক কাব্য বুলিব পাৰি। বাণভট্টৰ 'হর্ষচৰিত' ইতিহাস-সম্বন্ধীয় এখন গদ্যকাব্য। পুষ্যভূতিবংশৰ ৰজা শ্রীহর্ষৰ শাসনকালত ঘটিত ঘটনাৰ কালানুক্রমিক বর্ণনা পোৱা যায়। বাকপতিৰাজ গৌডবাহ মহাৰাষ্ট্রী প্রাকৃত ভাষাত ৰচিত এখনি ঐতিহাসিক কাব্য। ওঠৰটা সর্গযুক্ত বীৰাধিপতি নৱসাহসাঙ্কৰ জীৱন চৰিতক অৱলম্বন কৰি নৱসাহসাঙ্ক ৰচিত হৈছিল। কবি বিল্হণে একাদশ শতিকাৰ চালুক্যৰাজ বিক্রমাদিত্যৰ জীৱনৰ ওপৰত 'বিক্রমাংকদেৱচৰিত' নামৰ কাব্য ৰচনা কৰিছিল।

ঐতিহাসিক পৰম্পৰাত ৰচিত কাব্যসমূহৰ ভিতৰত মহত্বপূর্ণ গ্রন্থ কাশ্মীৰৰ ইতিহাস সম্বলিত কল্হণক 'ৰাজতৰঙ্গিনী'। কাশ্মীৰৰ ইতিহাস প্রাচীনকালৰ পৰা দ্বাদশশতিকা পর্যন্ত ৪ টা তৰংগত 7826?টা শ্লোকত বর্ণনা কৰিছে। বিভিন্ন উৎসৰ পৰা ঐতিহাসিক তথ্যসমূহ সংগ্রহ কৰি অতি নিৰপেক্ষভাৱে ৰজতৰঙ্গীনি ৰচনা কৰা হৈছিল। সেয়েহে ৰাজতৰঙ্গীনিয়েই প্রকৃত ইতিহাসৰ মর্যদা পায়। ৰাজতৰঙ্গীনিৰ পাছতো একেই নামেৰে কাশ্মীৰৰ ইতিহাস বিভিন্ন লিখকে লিখিবলৈ প্রয়াস কৰিছিল।

জৈন কবি হেমচন্দ্রই গূজৰ ৰজা কুমাৰপালৰ ওপৰত ভিত্তি কৰি 28 টা সর্গত কুমাৰপাল চৰিত ৰচনা কৰিছিল। প্রাকৃত আৰু সংস্কৃত উভয় ভাষাতেই ৰচিত হোৱা বাবে এই কাব্যখনক দ্বয়াশ্রয় কাব্য বুলিও জনা যায়। একাদশ শতিকাত সন্ধ্যাকৰনন্দীয়ে বংগ দেশৰ ৰজা ৰামপালৰ পৰাক্রম বর্ণনা কৰি ৰচনা হোৱা পৃথ্বীৰাজবিজয়ো আন এখন ঐতিহাসিক কাব্য।

ত্রয়োদশ শতিকাৰ সোমেশ্বৰদত্তৰ কীর্তিকৌমুদী, চতুর্দশ শতিকাত অৰিসিংহৰচিত সুস্কৃতসংকীর্তন, পঞ্চদশ শতিকাত নয়চন্দসুৰি বিৰচিত হম্মিৰমর্দন আদি উল্লেখযোগ্য ঐতিহাসিক কাব্য।

লিপিকাব্য-

প্রাচীন ভাৰতৰ ইতিহাসৰূপে লিপিকাব্যসমূহৰ গুৰুত্ব অসীম। লিপি কাব্যসমূহ শিলালেখ, দানস্তুতি, তম্রলেখ, তামপত্র ভূর্জপত্র কায়ষ্ট আদিত লিপিবদ্ধ কৰা হৈছিল। কেতিয়াবা লিপিকাব্যসমূহত গদ্যাংশও মিশ্রিত হৈ আছিল।

লিপিকাব্যসমূহৰ ভিতৰত গিৰনাৰ লিপি উল্লেখযোগ্য। মহাক্ষত্রপ ৰুদ্রদামনৰ এই লিপি

150 খ্ৰীষ্টাব্দত ৰচিত হৈছিল। কাব্য হিচাপেও লিপিখনি অত্যন্ত উৎকৃষ্ট। গিৰনাৰ শিলালেখৰ সমসাময়িক লিপি হিচাপে নাসিকলিপিৰ উল্লেখ পোৱা যায়। সিৰিপুলামায়ীৰ এই লিপি প্ৰাকৃত ভাষাত ৰচিত হৈছিল। এলাহাবাদ প্ৰশস্তিৰ ৰচয়িতা হৰিষেন। এই প্ৰশস্তিত ৰজা সমুদ্ৰগুপ্তক প্ৰশংসা কৰা হৈছে। সমুদ্ৰগুপ্ত এগৰাকী সুশাসকৰ উপৰিও কবি বিদ্যান আৰু কলাবিদ্যাত নিপুণ আছিল।

প্ৰাচীন ইতিহাসৰ উৎস হিচাপে আন এখন উল্লেখযোগ্য লিপি হল মান্দাসো�ৰ লিপি। এই লিপিৰ ৰচয়িতা বৎসচন্দি। দসপুৰৰ মান্দাসোৰ সূৰ্যমন্দিৰৰ প্ৰতিষ্ঠা স্মাৰকৰূপে 44 টা শ্লোকত এই লিপি ৰচিত হৈছিল।

538 খ্ৰীষ্টাব্দত দ্বিতীয় পুলকেশীন আইহোল শিলালেখ কাব্যকৃতিৰ উৎকৃষ্ট নিদৰ্শন। এই শিলালেখত কালিদাস আৰু ভাৰবিৰ উল্লেখ আছে। তাৰ দ্বাৰা দুয়োগৰাকী কবিৰ কাল নিৰ্ণয় সম্ভৰ হৈছে।

খ্ৰীষ্টীয় সপ্তমশতিকাত নীধনপুৰ তাম্ৰলিপি ৰচিত হৈছিল। প্ৰাচীন কামৰূপৰ ভৌম বংশৰ নৃপতি ভাস্কৰবৰ্মণৰ বৰ্ণনা ইয়াত কৰা হৈছে। লিপি খনিত অন্য ভৌম বংশীয় নৃপতিৰ উল্লেখো আছে।

ভাৰতবৰ্ষৰ বিভিন্ন প্ৰান্তত অনেক লিপি আছে। তাৰ ভিতৰত বহুলিপিৰ পাঠোদ্ধাৰ হোৱা নাই। লিপিসমূহে ভাৰতবৰ্ষৰ কলাসাহিত্য ইতিহাসত সেই যুগৰ সুন্দৰ চিত্ৰ প্ৰতিফলিত কৰে। কাব্যসাহিত্য আৰু ভাষাৰ বিবৰ্তনৰ ক্ষেএতো লিপিসমূহে পথ প্ৰদৰ্শন কৰে।

কোষকাব্য - পৰস্পৰনিৰপেক্ষ একেধৰণৰ কাব্যসংগ্ৰহ। কোষ কাব্যসমূহত এনে কবিসকলৰ নাম পোৱা যায়, যিসকলৰ কাব্যগ্ৰন্থ উপলব্ধ নহয়। এই কোষ কাব্যবিলাকৰ ভিতৰত ‘গাহা সতসই’ বা ‘গাথা সপ্তসতী’ প্ৰথমেই উল্লেখনীয়। এই কাব্যখনি মহাৰাষ্ট্ৰীপ্ৰাকৃতত ৰচিত হৈছিল। সংস্কৃত কোষকাব্য বিলাকৰ ভিতৰত সকলোতকৈ প্ৰাচীন কোষকাব্য হ’ল ৰবীন্দ্ৰবচনসমুচ্চয়। এই কোষকাব্যৰ সংকলনকৰ্তা আছিল বিদ্যাধৰ। ইয়াৰ সংকলন একাদশ-দ্বাদশ শতিকাত হৈছিল, বংগদেশৰ শ্ৰীধৰদাসে 1204 খৃষ্টাব্দত ‘সদুক্তিকৰ্ণামৃত’ নামৰ কোষকাব্য খনিৰ সংকলন কৰিছিল। কাব্যখনিত 495 জন কবিৰ ৰচনা উদ্ধৃত কৰা হৈছে। তাৰ ভিতৰত প্ৰায় পঞ্চাশগৰাকী কবিৰ উল্লেখ সংস্কৃত সাহিত্যত পোৱা যায়। জলহনৰ ‘সুক্তিৰত্নাৱলী’ আন এখন মহত্বপূৰ্ণ কোষকাব্য। এই কাব্যখনি 1257 খৃষ্টাব্দত ৰচিত হৈছিল। 2800 শ্লোকৰ এই কাব্যখনিৰ অধ্যায় বিভাগসমূহক ‘পদ্ধতি’ নামেৰে জনা যায়। 163 পৰিচ্ছেদত 6300 শ্লোকযুক্ত শাৰঙ্গধৰ কবিৰ শাৰঙ্গধৰ পদ্ধতি নামৰ কোষকাব্যও এখন গুৰুত্বপূৰ্ণ কোষকাব্য। ইয়াত 4616 টা শ্লোক বৰ্তমান উপলব্ধ। ইয়াৰ ৰচনা 1363 খৃষ্টাব্দত হৈছিল। এই কোষকাব্যখনিত নতুন বিষয়বস্তু সংযোজিত হৈছিল।

3527 শ্লোকসম্বলিত ‘সুভাষিতাৱলী’ৰ সংগ্ৰহকৰ্তা আছিল বল্লভদেৱ। চতুৰ্থশতিকাত এই গ্ৰন্থখনি ৰচনা কৰা হৈছিল। বল্লভ দেৱ কাশীনগৰ বাসিন্দা আছিল। বল্লভ দেৱৰ কাল চতুৰ্দশ শতিকা বুলি ধৰা হয়।

পঞ্চাদশ শতিকাত বংগদেশত ৰূপ গোস্বামীয়ে ভক্তিমূলক শ্লোক সংগ্রহ পদ্যাৱলী নামেৰেৰ প্রণয়ন কৰিছিল। অমৰু, ভৰভূতি আদি প্রাচীন কবিৰ লগতে বংগদেশৰ অখ্যাত কবিৰ ৰচনাও এইখন কাব্যত সন্নিৰিষ্ট কৰা হৈছে। হাৰাৱলী বা সুভাষিতহাৰাৱলী সংকলক হৰিকবি। দক্ষিণ দেশৰ নিবাসী হৰি কবিয়ে সকলো প্রান্তৰ কবিৰ ৰচনা সংগৃহীত কৰিছিল। হৰি কবিৰ সময় সপ্তদশ শতিকা বুলি নির্দ্ধাৰিত কৰা হয়।

অন্যকোষকাব্য ও সংস্কৃত সাহিত্য জগতত উপলব্ধ। সেই সকলোবোৰৰ ভিতৰত আচার্য সিদ্ধমনিৰ বুদ্ধি ৰত্নাকৰ, হৰিদাসৰ প্রস্তাৰৰত্নাকৰ, ব্রজনাথৰ পদ্যতৰংগিণী ইত্যাদি। বেদভাষ্যকাৰ সায়ণাচার্যৰ নামতো দুখন কোষকাব্য পোৱা যায়। এই সকলো কোষকাব্যৰ ঐতিহাসিক মূল্য অপৰিসীম।

পালি কাব্য

সংস্কৃত কাব্যৰ দৰে পালি সাহিত্যৰ ধাৰা ও অবিচ্ছিন্ন ৰূপে প্রবাহিত হৈ আহিছে। মহাত্মা বুদ্ধৰ জীৱন আদর্শ আৰু বৌদ্ধ ধর্মৰ তত্ত্বসমূহৰ বিষয়েই পালি কাব্যসমূহত বর্ণনা কৰা হয়। তথাপিও অলংকাৰ ৰস আদিৰ প্রয়োগৰ দ্বাৰা উৎকৃষ্ট কাব্যৰূপে পৰিগণিত হৈছিল। সংস্কৃত কাব্য অনুসৰণ কৰিয়েই পালি কাব্যসমূহ ৰচিত হৈছিল বাবেই সংস্কৃত কাব্য ৰীতিৰ প্রভাৱ ইয়াত দেখিবলৈ পোৱা যায়।

পালি কাব্য দুই প্রকাৰৰ আখ্যানাত্মক আৰু বর্ণনাত্মক। বর্ণনাত্মক কাব্যসমূহৰ ভিতৰত দ্বাদশ শতিকাৰ কল্যাণীয়থেৰৰ তেলকটাই গাথা, বুদ্ধৰক খিতৰ জিনালংকাৰ, ত্রয়োদশ শতিকাৰ মেঘংকৰৰ লোকপ্পদীপসাৰ উল্লেখযোগ্য। আন আন কাব্যসমুহ অনাগতবংশ, পঞ্চমধু, সদ্ধম্মোপায়ন, পঞ্চগতিদীপন ইত্যাদি।

আখ্যানাত্মক গ্রন্থসমূহৰ ভিতৰত সীলবংশৰ বুদ্ধালংকাৰ, ৰসবাহিনী, সহস্রবল্থুপকৰণ, ৰাজাধিৰামবিলাসিনী, ৰচনা কৰা সমূহৰ প্রায় সকলোৰে বিষয়বস্তু ত্রিপিটকৰ পৰা গ্রহণ কৰা হৈছে।



৮.৯ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- इतिहासवर्णात्मकम् ऐतिहासिककाव्यविषये ज्ञातवान्।
- लिपिकाव्यस्य लक्षणं विभिन्नलिपिकाव्यविषये ज्ञातवान्।
- कोषकाव्यस्य लक्षणं विभिन्नकोषकाव्यानां विषये ज्ञातवान्।
- पालिकाव्यविषये सम्यग्रूपेण ज्ञातवान्।



८.१० ज्ञानाधिक्यम्

१) शर्मा थानेश्वर (२०२०), संस्कृत साहित्यर इतिवृत्त, गुवाहाटी, चन्द्रप्रकाश।

२) Krishnamacharya .M (2004) , History of Classical Sanskrit Literature, New Delhi, MLBD.

३) उपाध्याय, वलदेव (२००९) संस्कृतसाहित्य का इतिहास, शारदा निकेतन, वाराणसी।

४) गुप्ता, डॉ पुष्पा, (२०११), संस्कृत साहित्य का बृहद् इतिहास, ईस्टार्न बुक लिंकर्स, दिल्ली।



८.११ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : बाणभट्टः।

प्रश्नः २ उत्तरम् : राजतरङ्गिणीम्।

प्रश्नः ३ उत्तरम् : कुमारपालचरितम्।

प्रश्नः ४ उत्तरम् : रुद्रदामनः।

प्रश्नः ५ उत्तरम् : प्राकृतभाषायाम्।

प्रश्नः ६ उत्तरम् : इलाहावादप्रशस्तिम्।

प्रश्नः ७ उत्तरम् : आइहोललिप्याम्।

प्रश्नः ८ उत्तरम् : बाणभट्टेन सह।

प्रश्नः ९ उत्तरम् : प्राकृतभाषायाम्।

प्रश्नः १० उत्तरम् : विद्याधरः।

प्रश्नः ११ उत्तरम् : पञ्च।

प्रश्नः १२ उत्तरम् : पद्धतिः।

प्रश्नः १३ उत्तरम् : बल्लभदेवः।

प्रश्नः १४ उत्तरम् : बौद्धधर्मस्य।

प्रश्नः १५ उत्तरम् : द्वे भागे।

प्रश्नः १६ उत्तरम् : जिनालंकारः।



८.१२ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: भारतीयऐतिहासिककाव्यस्य विशेषत्वं लिखन्तु।

प्रश्नः २: 'गौडवह' इति काव्यस्य विषये संक्षेपेण लिखन्तु।

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

प्रश्नः १: ऐतिहासिककाव्यस्य स्वल्पतायाः कारणानि लिखन्तु।

प्रश्नः २: राजतरङ्गिनीमधिकृत्य संक्षेपेण लिखन्तु।

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १: ऐतिहासिककाव्यानां विषये लिखन्तु।

प्रश्नः २: कोषकाव्यानां परिचयं लिखन्तु।

*** ***** ***

अध्यायः ९ : गद्यकाव्यम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

९.१ उद्देश्यम्

९.२ परिचयः

९.३ गद्यस्वरूपम्

- ९.३.१ गद्यस्य भेदाः
- ९.३.२ गद्यस्य उत्सः
- ९.३.३ सुबन्धु-बाणभट्ट-दण्डीनां गद्येषु शैलीगतवैशिष्ट्यम्
- ९.३.४ गद्यसाहित्यस्य भेदाः

९.४ अध्यायस्य असमीयाभाषायां संक्षिप्तविवरणम्

९.५ अध्यायात् किमवगतम्

९.६ ज्ञानाधिक्यम्

९.७ प्रगतेः सम्पुर्तिः

९.८ अभ्यासप्रश्नाः

८.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन गद्यस्य स्वरूपं ज्ञातुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन गद्यस्य भेदोपभेदान् सोदाहरणं ज्ञातुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन गद्यस्य उत्पत्तिं विकासं च कथमिति ज्ञातुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन कवेः दण्डिनः जीवनकालविषयं ज्ञातुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन दण्डिनः शैलीं गद्यवैशिष्ट्यं च ज्ञातुं शक्नुवन्ति।

८.२ परिचयः

संस्कृतगद्यसाहित्यस्य परम्परा अतीव प्राचीना वर्तते। ऋग्वेदे कृष्णयजुर्वेदस्यान्तर्गते तैत्तिरीयसंहितायां, काठकसंहितायां, मैत्रायणिसंहितायां, अथर्ववेदस्य व्रात्यकाण्डे गद्यस्य निदर्शनं परिलक्ष्यते। ततैव ब्राह्मणसाहित्यस्य आरण्यकोपनिषदः केषुचित् स्थानेषु गद्यस्य वैशिष्ट्यानि परिलक्ष्यन्ते। कल्पादिसूत्रेषु सूत्रात्मकशैल्या गद्यस्य नुतनधारा प्रवाहिता दृश्यते। वैदिकसाहित्यानन्तरं लौकिकसाहित्येषु प्रसिद्धेषु रामायणमहाभारतपुराणादिग्रन्थेषु गद्यस्य सरलस्वरूपं दृष्टिगतं भवति। प्राचीनशिलालेख-ताम्रलिपयःविभिन्नदर्शनग्रन्थानां भाष्यानि च गद्यसाहित्यस्य सुन्दरनिदर्शनानि सन्ति।

८.३ गद्यस्वरूपम्

गद्यशब्दः गद्धातोः (गद् वक्तायां वाचि) यत्-प्रत्यये कृते निष्पन्नो भवति। साधाराणार्थे भावाभिव्यक्तेः स्पष्टप्रक्रिया एव गद्यम् इति वक्तुं शक्यते। कालान्तरं गद्यस्य काव्यशास्त्रीयस्वरूपं समागतम्। काव्यशास्त्रीयसिद्धान्तानां समावेशसहितं यदा गद्यकाव्यस्य विकासः अभवत् तदा गद्यकाव्यस्य विरचने अतीव क्लिष्टता समागता। अष्टमशताब्दीं यावत् गद्यकाव्यकृतिः कवीनां कौशलत्वप्रदर्शनाय सञ्जाता। अत एव उच्यते — गद्य कवीनां निकषं वदन्ति। संस्कृतभाषायां गद्यकाव्यस्य अन्यतमं स्थानं वर्तते। वस्तुतः गद्यकाव्यं द्विधा विभक्तुं शक्यते।

यथा —

१. प्राचीनसंस्कृतगद्यसाहित्यम्

२. आधुनिकसंस्कृतगद्यसाहित्यम्

प्राचीनसंस्कृतगद्यसाहित्ये सुबन्धोः वासवदत्ता इति प्रथमो वर्तते। कवेः गद्ये उपमा-उत्प्रेक्षाद्यलङ्काराणां प्रयोगः सौन्दर्यं वर्धयति एव, अपि तु श्लेषालङ्कारयोजनं कवेः गद्ये चमत्कारं जनयति। सुबन्धो अनन्तरं बाणभट्टेण कादम्बरी इति अद्वितीयरचनायां शब्दप्रयोग-कथाशैल्या यादृशं विशिष्टम् उदाहरणं प्रस्तूयते तदद्यापि कविसमाजे प्रशंस्यं भवति। वर्ण्यविषयानुसारं शब्दप्रयोगः बाणभट्टस्य वैशिष्ट्यं वर्तते। अर्थस्य नूतनत्वं, स्वभावोक्तिचारुत्वं, श्लेषस्पष्टत्वं, अक्षराणां विकटबन्धता च कादम्बरीग्रन्थस्य वैशिष्ट्यं वर्तते। यथा —

क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव पल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण मधुकर इव मदेन, मद इव नवयौवनेन पदम्।

तथैव परिसंख्यालङ्कारस्य चारुत्वं बाणगद्यस्य अन्यतमं वैशिष्ट्यं वर्तते। यथा —

यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितम्, वयः परिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूतिमत्वम्, एणकानां गीतव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः मूलानामधोगतिः।

प्राचीनगद्यसाहित्ये प्रणयवर्णनं राज्ञः यशोगुणवर्णनम् आधिक्येन परिलक्ष्यते। परन्तु आधुनिकगद्यसाहित्ये कविः सामाजिक-राजनैतिकदशावर्णनं, स्वतन्त्रतासंग्रामवर्णनम्, नारीदशावर्णनं चेत्याधिकं विदधाति। वस्तुविवेचनदृष्ट्या आधुनिकगद्यसाहित्यं अनेकवर्ण्यविषयाणां वर्णनं विधीयते। गद्यसाहित्यस्य कथा, लघुकथा, उपन्यासः, यात्रासाहित्यं, जीवनवृत्तवर्णनं इत्याद्यनेकविधास्सन्ति। आधुनिकगद्यसाहित्ये कथायाः लघुकथायाश्च प्राधान्यं वर्तते। एकविंशशतिकायाः अन्तिमदशके संस्कृतगद्यसाहित्ये लघुकथारचनायाः प्रयासो परिलक्ष्यते। सर्वप्रथमं शिवराजविजयकारे अम्बिकादत्तव्यासेन अयं प्रयासो विधीयते। तद्विरचिते रत्नाष्टकं नामके कथासंग्रहे हास्यरसप्रधानानि उपदेशप्रधानानि च अष्टकथानां संकलनं वर्तते।

९.३.१ गद्यस्य भेदाः

आचार्यविश्वनाथः साहित्यदर्पणग्रन्थे काव्यस्वरूपनिरूपणप्रसङ्गे काव्यस्य भेदद्वयं प्रदर्शयति। तद्यथा - दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यकाव्येषु नाटकप्रहसनादिरूपकाणाम् उपरूपकाणां च विशदविवेचनं विदधाति। श्रव्यकाव्ये पुनः भेदद्वयं तेन समुपस्थापितम्। तद्यथा — गद्यकाव्यं पद्यकाव्यञ्चेति। गद्यकाव्यं परिभाषयन् सो लिखति यत् — वृत्तगन्धोज्झितं गद्यम्। गद्यस्य चत्वारो प्रकारास्सन्ति। तद्यथा — मुक्तकं, वृत्तगन्धिः, उत्कलिकाप्रायः, चूर्णकञ्च। यथोक्तं साहित्यदर्पणस्य षष्ठपरिच्छेदे —

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्।।

एते भेदाः रचनाशैली-समासशैली-पदसन्निवेशादीनां आधारेण सञ्जाताः।

१. मुक्तकं — गद्यस्य प्रथमो भेदोऽस्ति मुक्तकम्। मुक्तकस्य रचना असमस्तपदैः क्रियते। लघुपदैः लघुवाक्यैः मण्डिता सरलसरसपदावलीयुता रचना मुक्तकमुच्यते। यथा — गुरुर्वचसि पृथुरसि। अर्थात् वाण्यां यस्य गुरूता वर्तते सः पृथु इव बलवान् भवति।

२. वृत्तगन्धि — वृत्तस्य गन्धो यस्मिन् भवति सः वृत्तगन्धि इति उच्यते। वृत्तम् इत्युक्ते छन्दः गन्ध इत्युक्ते प्रतीतिः। वृत्तगन्धिः गद्यस्य तद्भागो वर्तते, यत्र वृत्तांशः नैकस्थले प्रतीयते। यथा — 'समरकण्डूलनिविडभुजदण्डकुण्डलीकृतकोदण्डशिंजिनीटंकारोज्जागरितवैरीनगर' प्रस्तुतवृत्तगन्धोदाहरणे कुण्डलीकृतकोदण्ड इति अंशः अनुष्टुब्छन्दसः एकचरणे घटितो वर्तते। द्वितीयेन समरकण्डूल इति अंशस्य प्राक् अक्षरद्वयं भवति चेत् अयमंशोऽपि अनुष्टुब्छन्दसः एकं चरणं पूरयति। इत्थं यत्र कोऽपि अंशः वृत्तबद्धो भवति, तत् वृत्तगन्धिगद्यमिति उच्यते।

३. उत्कलिकाप्रायः — गद्यकाव्यस्य तृतीयो भेदोऽस्ति उत्कलिकाप्रायः। गद्यस्य तद्भागः यः दीर्घसमासबद्धो भवति। यथा — 'अणिसविसुमरणिसिदसरसविसरविदलिदसमरपरिगदपवरपरवल' इति प्रस्तुतगद्यांशे दीर्घसमासयुक्तपदं परिलक्ष्यते। एतादृशदीर्घसमासयुक्तपदानि उत्कलिकाप्रायगद्ये भवन्ति।

४. चूर्णकम् — गद्यकाव्यस्य चतुर्थभेदो वर्तते चूर्णकम्। यस्यां गद्यशैल्यां अल्पसमासयुक्तपदानि वर्तन्ते, तद्गद्यं चूर्णकमिति उच्यते। अर्थात् अत्र लघुपदानां सन्निवेशः क्रियते। यथा — 'गुणरत्नसागर! जयदेवनागर! कामिनीमदन! जनरंजन!' प्रस्तुतोदाहरणे स्वल्पसमासयुक्तपदानां प्रयोगो विधीयते। अतः अत्र गद्यस्य चूर्णकभेदो वर्तते।

आचार्यविश्वनाथः एतेषां भेदानां लक्षणं एकेनैव श्लोकेन इत्थं समुपस्थापयति—

आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यत् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्।।

आचार्यो विश्वनाथः कथा आख्यायिका चेति गद्यस्य द्वौ अवान्तरभेदौ अपि प्रतिपादयति। तत्र कथायाः लक्षणं तेन इत्थं निरूप्यते —

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्
क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम्।

अर्थात् गद्यकाव्यस्य एकः भेदः अस्ति कथा इति। कथायाः इतिवृत्तं रसयुक्तं भवति। कथायां क्वचित् आर्या छन्दः, क्वचित् वक्त्रछन्दः, क्वचित् पुनः अपवक्त्रछन्दो वर्तते। कथायाः प्रारम्भः नमस्कारात्मकमङ्गलाचरणेन भवति। कथायां दुर्जनानां निन्दा तथा सज्जनानां प्रशंसनं विधीयते। बाणभट्टविरचिता कादम्बरी इति कथाग्रन्थस्य उदाहरणं वर्तते।

पुनः आख्यायिकायाः लक्षणं विश्वनाथाचार्येण इत्थं निरूपितम् —

आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम्।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित्क्वचित्।
कथांशानां व्यवच्छेद आश्वास इति बध्यते।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्।।
अन्यापदेशेन आश्वासमुखे भाव्यर्थसूचनम्।

इत्थम् आख्यायिका अपि गद्यस्य अपर एको भेदः अस्ति। अस्मिन् भागे प्रायः कथायाः वैशिष्ट्यानि एव वर्तन्ते। ऐतिहासिकविषयमाधारीकृत्य विनिर्मितायाम् आख्यायिकायां कविः स्ववंशस्य गुणानुकीर्तनं करोति। अन्यकवीनां चर्चा अपि विदधाति। अत्र पद्यसूक्तानि वर्तन्ते। आख्यायिकायां कथांशानां विभागः आश्वासाभिधया क्रियते। आर्या-वक्त्र-अपवक्त्रछन्दसां केनापि एकेन छन्दसा वर्णनीयविषयस्य उपस्थापनं क्रियते। आख्यायिकायाः उदाहरणं यथा - हर्षचरितम्। गद्यस्य कथा-आख्यायिकेति भेदद्वयम् आचार्यस्य दण्डिनः काव्यादर्शे, भामहाचार्यस्य काव्यालङ्कारे अपि स्वीकृतं वर्तते।

९.३.२ गद्यस्य उत्सः

प्रमुखगद्यकाव्यानां परिचयः अधः उल्लिख्यते —

१. वासवदत्ता — गुणाढ्यस्य बृहत्कथाम् आधारीकृत्य सुबन्धुः वासवदत्ता इति गद्यग्रन्थं विरचितवान्। अस्मिन् ग्रन्थे कन्दर्पकेतु-वासवदत्तयोः प्रणयकथा वर्णिता अस्ति।

२. दशकुमारचरितम् — गद्यकविदण्डिना विरचितं दशकुमारचरितम् इति ग्रन्थः त्रिषु खण्डेषु विभक्तो वर्तते। तद्यथा - पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका चेति। पूर्वपीठिकायां पञ्चोच्छ्वासाः सन्ति, दशकुमारचरिते अष्टोच्छ्वासाः सन्ति, उत्तरपीठिकायाम् एक उच्छ्वासो अस्ति। पूर्वपीठिकायाः पञ्चोच्छ्वासेषु अवन्तीसुन्दर्याः कथावस्तु वर्णितम् अस्ति, मध्यभागस्य अष्टोच्छ्वासेषु राजकुमाराणां चरित्रवर्णनम् अस्ति, तथा उत्तरपीठिकायाः एकस्मिन् उच्छ्वासे कुमारद्वयस्य वर्णनं समुपलभ्यते।

३. कादम्बरी— कादम्बर्याः वर्ण्यविषयः गुणाढ्यस्य बृहत्कथातः संगृहीतः। अस्यां कथायां जन्मत्रयस्य वर्णनं प्राप्यते। अस्य नायकः प्रथमजन्मनि चन्द्रमा, द्वितीयजन्मनि चन्द्रापीडः, तृतीयजन्मनि शूद्रकः जातः। प्रथमजन्मनः पुण्डरीकः, द्वितीयजन्मनि वैशम्पायनः, तृतीयजन्मनि शुकः सञ्जातः। अस्यां कथायां भागत्रयं वर्तते। तद्यथा - कथामुखः, पूर्वभागः, उत्तरभागश्च।


४. हर्षचरितम् — अष्टोच्छ्वासेषु विभक्तं हर्षचरितम् इति एक आख्यायिकाग्रन्थो वर्तते। ग्रन्थोऽयं बाणभट्टेन विरचितः। अस्य ग्रन्थस्य प्रारम्भे एकविंशतिसंख्यकश्लोकेषु भगवतः शिवस्य देव्याः पार्वत्याश्च वन्दनं विधीयते। तदनन्तरं संस्कृतसाहित्यस्य प्रमुखकवीनां तथा ग्रन्थानां स्तुतिः परिलक्ष्यते। प्रथमोच्छ्वासे बाणः स्वस्य वर्णनं मित्रवर्णनं च विदधाति। त्रयाणाम् उच्छ्वासानां पश्चात् असौ हर्षचरितकथायाः प्रारम्भं करोति।

५. शिवराजविजयः—शिवराजविजयस्य रचकः अम्बिकादत्तव्यासः आधुनिकसाहित्यिकेषु अग्रगण्योऽस्ति। शिवराजविजयस्य कथानकः धाराद्वयेन प्रवाहितो दृश्यते। एकतः महाराष्ट्रस्य अधीश्वरशिवाजीत्याख्यस्य वीरस्य अपरतश्च नायकस्य रघुवीरसिंहस्य वर्णनं परिलक्ष्यते। कथानकोऽयं त्रिषु विरामेषु विभक्तोऽस्ति। प्रत्येकेषु विरामेषु चत्वारो निश्वासाः सन्ति। पाञ्चालीरीत्यां विरचिते शिवराजविजये अम्बिकादत्तव्यासः क्वचित् समासबहुलपदानां प्रयोगः परिलक्ष्यते।

६. मन्दारमञ्जरी— मन्दारमञ्जरी विश्वेश्वरपाण्डेयवर्येण विरचितो भवति। अस्मिन् ग्रन्थे बाणभट्टस्य कादम्बरीग्रन्थ इव पूर्वभागः उत्तरभागश्च इति भागद्वयं प्राप्यते। कथ्यते यत् कादम्बरीग्रन्थस्य पूर्वभागः विश्वेश्वरपाण्डेयवर्येण निर्मितः तथा उत्तरभागः तस्य शिष्यैः निर्मितः। राजशेखरमलयवत्योः पुत्रस्य चित्रभानोः तथा चन्द्रकेतुचन्द्रलेखयोः सूतायाः मन्दारमञ्जर्याः प्रणयकथा अस्मिन् ग्रन्थे वर्णिता अस्ति।

७. गद्यचिन्तामणि — गद्यचिन्तामणिग्रन्थस्य रचकः अस्ति वादीभसिंहः। महाराजसृय जीवन्धरस्य जीवनाधारिते गद्यचिन्तामणिग्रन्थे एकादशलम्भकाः सन्ति। गद्यचिन्तामणि एका आख्यायिका अस्ति। अस्य उपजीव्यमस्ति गुणभद्रकृतम् उत्तरपुराणम्।

८. तिलकमञ्जरी — तिलकमञ्जरी धनपालेन विरचिता वर्तते। उज्जयिन्याः निवासी सर्वदेवस्य पुत्रः धनपालः मुंजराज्ञः सभाकविः आसीत्। कादम्बर्याः शैल्यां विरचितायां तिलकमञ्जर्यां तिलकमञ्जर्याः समरकेतोश्च प्रणयकथा वर्णिता अस्ति।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: ..... कवीनां निकषं वदन्ति।

.....

प्रश्नः २: दण्डिना विरचितं गद्यकाव्यं किम्?

.....

प्रश्नः ३: हर्षचरिते कति उच्छ्वासाः सन्ति?

.....

प्रश्नः ४: कथाख्यायिके कस्य भेदे स्तः?

.....

प्रश्नः ५: सुबन्धोः गद्यकाव्यं किम्?

.....

प्रश्नः ६: कादम्बरीकथा केन रचिता?

.....

प्रश्नः ७: 'शिवराजविजयम्' कस्य कृतिः?

.....

९. प्रबन्धचिन्तामणि — चन्द्रप्रभमुनेः शिष्यस्य मेरुतुङ्गाचार्यस्य कृतिः प्रबन्धचिन्तामणिः इति ग्रन्थः एकादशप्रबन्धेषु निबद्धोऽस्ति। प्रबन्धचिन्तामणिग्रन्थे प्रसिद्धानाम् ऐतिहासिकविदूषां कवीनाम् आचार्याणां च वर्णनं वर्तते।

१०. प्रबन्धकोशः— प्रबन्धकोशः इति ग्रन्थः राजशेखरसूरिणा विरचितो वर्तते। राजशेखरसूरिः चतुर्दशशताब्देः कविः आसीत्। अनेन विरचितः प्रबन्धकोशः इति ग्रन्थः चतुर्विंशंतिप्रबन्धः इत्याख्यया अपि अभिधीयते। अनेन नामकरणेन एव ज्ञायते यत् अस्मिन् ग्रन्थे चतुर्विंशंतिसंख्याकानां महापुरुषाणां जीवनवृत्तान्तं वर्णितमस्ति।

११. वेमभूपालचरितम् — वत्सगोत्रीयः वामनभट्टबाणः वेमभूपालचरितमिति ग्रन्थं विरचितवान्। अस्मिन् ग्रन्थे वेमभूपालस्य यशोगानमेव वर्ण्यविषयः अस्ति।

असौ नलाभ्युदयकाव्यं, रघुनाथचरितम् इति महाकाव्यम्, पार्वतीपरिणयनाटकं, शब्दचन्द्रिका शब्दरत्नाकरश्चेति कोशग्रन्थद्वयं विरचितवान्।

९.३.३ सुबन्धु-बाणभट्ट-दण्डीनां गद्येषु शैलीगतवैशिष्ट्यम्

सुबन्धुः गद्यरत्नत्रयिषु अन्यतमो वर्तते। सुबन्धोः समयस्थानवंशादिविषये यथार्थतथ्यं नोपलभ्यते। तस्य मातापितरौ च अज्ञातौ वर्तेते। गद्यकाव्यरचकेषु सुबन्धुः प्रथमो गद्यकारो वर्तते। तद्विरचिता वासवदत्ता अलङ्कृतशैल्यां निबद्धा प्रथमा गद्यकृतिरस्ति। बाणभट्टद्वारा कृतं सुबन्धोः प्रशंसनमवलोक्य पण्डिताः सुबन्धुं बाणभट्टस्य पूर्ववर्ती इति स्वीकुर्वन्ति।

वासवदत्तायाः शैलीगतवैशिष्ट्यम् —

ओजसमासबहुलता-कठिनपदविन्यास-पाण्डित्यप्रदर्शन-काव्यगौरवानां कृते प्रख्यातः सुबन्धुः वासवदत्तायां श्लेषं गौडीरीतिं च व्यवहरति। यथा दृश्यते —

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः।
प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धनम्।। वासवदत्ता, १३।

अर्थात् यं वरं प्रदाय देवी सरस्वती स्वानुग्रहं प्रकटयति, यः सुबन्धुः सज्जनानां एकमात्रबन्धु अस्ति, यश्च प्रत्येकाक्षराणां श्लेषालङ्कारबहुलप्रबन्धविन्यासे विदग्धतानिधिः अस्ति। सः एव वासवदत्तां विरचयति।

सुबन्धोः वासवदत्तायां प्रकृतिवर्णनं स्त्रीसौन्दर्यं नगरीवर्णनं विस्तृतसंवादादेः विस्तारेण वर्णनं विधीयते। तस्मात् कवेः कलापक्षः अत्यधिकं विकसितं भवति। वासवदत्तायाम् अलङ्कारप्रभुत्वं, पौराणिकथा, विदग्धता तथा समासरसिकता इत्यादीनां अधिकप्रदर्शनं विधीयते। श्लेषविरोधाभासपरिसंख्याद्यलङ्काराणाम् आधिक्यता परिलक्ष्यते। अलङ्कारादीनां बहुलता सुबन्धुं रससिद्धकवित्वश्रेण्याः दूरीकरोति। यतो हि सुबन्धोः वासवदत्तायां रसपरिपाके कथाप्रवाहे च न्यूनता परिलक्ष्यते। आनन्दवर्धनस्य उक्तिः सुबन्धोः उपरि पूर्णतया घटितो भवति। आनन्दवर्धनस्य मतानुसारं केचन कवयः अलङ्कारप्रयोगे एव स्वकुशलत्वं प्रदर्शयन्ति तथा रसपरिपाकं सर्वथा उपेक्षयन्ति। सुबन्धुः स्थाने स्थाने श्लेषप्रयोगमहत्वं प्रतिपादयति। यथा —

प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम्। (वासवदत्तायाः भूमिकाश्लोकः १३)

श्लेषप्रयोगशैल्याः हेतोः विद्वत्समाजे सुबन्धोः प्रसिद्धिः जाता। सुबन्धोः श्लेषप्रयोगः अद्भुतः विलक्षणश्च भवति। विरोधाभास-परिसंख्या-उत्प्रेक्षादीनां प्रयोगः कवेः नूतनदृष्टिः सूक्ष्मचिन्तनं च प्रदर्शयति। अस्य रचनायां सङ्गीतात्मकता, लयात्मकता च दृश्यते। क्लिष्टपदावलीनां कोमलकान्तपदावलीनां च मिश्रणं नूनमेव दर्शनीयं भवति। कठिनादनन्तरं सरलपदावलीप्रयोगः तथा सरलादनन्तरं कठिनपदावलीप्रयोगः काव्यं समतां प्रददाति। ओजप्रसादमाधुर्यादिगुणोपेतम् इयं काव्यविधा अनुपमा वर्तते। पाण्डित्यप्रदर्शनं तथा सरसपदावली इति उभयोः विरुद्धगुणयोः समन्वयहेतोः वासवदत्तायां

मणिकाञ्चनसंयोगः परिलक्ष्यते।

बाणभट्टस्य शैलीगतवैशिष्ट्यम्

बाणभट्टो गद्यकाव्यस्य सम्राट् अस्ति। अस्य गद्यशैली गद्यकविनां कृते आदर्शो वर्तते। असौ गद्यस्य समस्तगुणान् परित्यज्य पाञ्चालीशैल्यां गद्यकाव्यं निर्माति। असौ पाञ्चालीशैलीप्रयोगे तादृशो निपुण आसीत् यत् सर्वे पाठकाः बाणभट्टं प्रति नतमस्तकाः अभवन्। असौ कलापक्ष-भावपक्ष-अर्थगौरवादिषु सिद्धहस्त आसीत्। कादम्बरीकथायाः शुकनासोपदेशे राजकुमारं प्रति मन्त्रिणा शुकनासेन पाञ्चालीरीत्यां प्रदत्त उपदेशः निश्चयेन प्रशंसनीयो वर्तते। बाणभट्टः लक्ष्म्याः वर्णनप्रसङ्गे उल्लिखति —

लब्धापि दुःखेन पाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। नरूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति।

इत्थं बाणभट्टः स्वकाव्ये अल्पसमासप्रयोगेन पाञ्चालीरीतेः अलौकिकसौन्दर्यं निरूपयति। चरित्रचित्रणे सजीवताम् आनेतुं तथा प्रभावशीलताम् उत्पादयितुं बाणभट्टः समासबहुल-ओजगुणयुक्तशैल्याः स्थाने स्थाने आश्रयं गृहीतवान्। तथैव अन्यत्र लघुलघुवाक्यानां प्रयोगं विधाय असौ स्वशैलीं प्रभावोत्पादकीं सशक्तां च कृतवान्। असौ कादम्बर्यां अटवी-सन्ध्यावर्णने दीर्घसमासानां प्रयोगं विदधाति। तथैव विरहवर्णनावसरे लघुकलेवरप्रासादिकवाक्यानां प्रयोगं विदधाति। बाणस्य लेखनशैल्यां पाञ्चालीरीतेः सुन्दरं निदर्शनं समुपलभ्यते। यथा —

शब्दार्थयोः समोगुम्फः पांचालीरीतिरिष्यते।

शिलाभट्टारिका वाचि बाणोक्तिषु च सा यदि।।

वर्ण्यविषयस्य अनुरूपं पदविन्यासः अर्थात् यथा अर्थः तथा शब्दः इति पाञ्चालीरीतेः प्राणो वर्तते। घनघोरवन इव वर्ण्यविषयः भवति चेत् कवेः वाणी अपि उत्कृष्टपदावल्या मण्डिता स्यात्। यदि तत् कामिनीनां लावण्यरूपचित्रणं भवति तर्हि कवेः पदविन्यासः नितान्तललितः तथा कमनीयः स्यात्। शब्दोपरि अखण्डसाम्राज्यः कवेः बाणभट्टस्य विशेषत्त्वं वर्तते। त्रिलोचनकवेः दृष्टौ बाणस्य रसभावयुतकवितायाः प्राक् अन्यकवीनां रचना केवलं चपलतामात्रं भवति।

हृदि लग्नेन बाणेन यन्मन्दोऽपि पदक्रमः।

भवेत् कविकुरंगाणां चापलं तत्र कारणम्।।

बाणः रससिद्धः कविः अस्ति। शृंगाररसः बाणस्य प्रियः अस्ति। तस्य रचनायां प्रकृतेः मनोरमं वर्णनं, मनोभावानाम् मार्मिकविवेचनं च विधीयते। बाणः दीर्घसमास-अल्पसमास-समासरहितानां प्रत्येकानां वर्णनं विदधाति। भावभाषयोः सुन्दरसमन्वय एव बाणस्य विशेषत्वं वर्तते।

संस्कृतसाहित्यस्य महाकविषु बाणभट्टः अप्रतिद्वन्द्वी आसीत्। सः कविनां कविः, लेखकानां लेखकः भारतीयविद्वद्भिः सः बहु प्रशंसितः अस्ति। विद्वांसः अङ्गीकृतवन्तः

यत्--'बाणोच्छिष्टं जगत्सर्वम्' इति। अर्थात् जगति सर्वं वस्तु बाणेन उच्छिष्टं स्पृष्टं वा। लोके तादृशं किमपि नास्ति यत् तस्य कृतिषु न वर्णितम्। तस्य सर्वेऽपि साहित्यकृतयः सर्वविषयाणां कुशलवर्णनं प्रतिबिम्बयन्ति। बाणभटः वर्णनसम्राट् आसीत्। तस्य विषयवर्णनपद्धतिः अतुलनीया अस्ति। सः कस्यापि वस्तुनः साधारणवर्णनस्य पक्षपाती नास्ति। कवेः मनः किमपि नूतनं प्रस्तोतुं, किमपि असाधारणं विचित्रं वा वर्णयितुम् उद्विग्नं दृश्यते। एतत् चिन्तनं, एषा व्याकुलता च तं अविस्मरणीयकथां वर्णयितुं साहाय्यं करोति। कथावर्णनावसरे सः भविष्यति किं भविष्यति इति वक्तुं त्वरितगतिं नाङ्गीकरोति, सः स्वस्य लेखनकार्यं मन्दं चालयति। घटनानां वर्णनमेव कथा उच्यते। परन्तु बाणभट्ट क्षणं क्षणं भाषाचित्राङ्कणं कृत्वा स्वकथानां निर्माणं कृतवान्। अत एव तस्य कार्यं गतिशीलं नास्ति यथा कादम्बरीकथाग्रन्थस्य उज्जयिनीवर्णनप्रसङ्गे 'अस्ति सकलत्रिभुवनललामभूता.....उज्जयिनी इति नाम नगरी' इति अस्मिन् गद्यांशे लेखकस्य मुख्यम् उद्देश्यमस्ति अवन्तिदेशे उज्जयिनी इति नगरम् आसीत् इति पाठकेभ्यः सूचनाप्रदानम्। किन्तु बाणभट्ट उज्जयिनीवर्णनम् 'अस्ति' इति पदेन आरभते ततः नगरस्य अनेकविशेषणानां प्रयोगं करोति। बहु पश्चात् वक्ष्यमाणं नगरं उज्जयिनी इति कथयति। एवं च अतिदीर्घसमासगद्यस्य प्रयोगेन, बहुविशेषणानां प्रयोगेन च बाणभटस्य वर्णनं बहु मन्दं गच्छति। कवेः रवीन्द्रनाथटैगोरदेवस्य मतानुसारं 'यदा अन्ये लेखकाः घटनाभिः कथां कथयन्ति तदा बाणः रेखाचित्रैः कथयति। बाणभट्टः स्वस्य कृतिषु पात्राणां प्रस्तुतीकरणे अपि निपुणः अस्ति। तस्य कृतिषु राजा-राज्ञी, राजकुमार-राजकुमारी, मन्त्री, तपस्वी, अप्सरा इत्यादीनि चरित्राणि चित्रितानि सन्ति। यद्यपि सः एतानि पात्राणि न्यूनाधिकं रूढिगतरूपेण प्रस्तुतं करोति तथापि पात्राणि स्वव्यक्तित्वेन महान्ति भवन्ति। बाणभट्टः स्वजीवने विभिन्नेषु कालेषु अनेकस्थानेषु यात्रां कृतवान्। अस्यां यात्रायां सः बहु अनुभवं प्राप्तवान्। सः अनेकेषां जनानां सम्पर्कम् अपि प्राप्तवान्। सः मानवस्वभावं बहु निकटतया अवलोकयति स्म। अत एव सः स्वकृतिषु प्रयुक्तानां पात्राणां सजीवचित्रणे निपुणत्वम् आप्नोति। काव्यस्य आत्मा रसः। बाणभट्ट अपि स्वकृतिषु रसस्य आवश्यकतां न नोपेक्षते। तस्य हर्षचरितम् कादम्बरी चेत्यनयोः प्रसिद्धयोः ग्रन्थयोः प्रायः सर्वे रसाः सन्ति। कादम्बरी कथा शृङ्गाररसप्रधाना अस्ति। तदतिरिक्ताः अन्ये रसाः अपि अस्मिन् ग्रन्थे समानरूपेण रमणीयाह्लादप्रदायकाः सन्ति। तथा च 'हर्षचरितम्' इत्यस्य मुख्यविषयः वीर इति। अस्मिन् काव्ये नानापात्राणाम् अद्भुतः संयोगः अस्ति। बाणभट्टस्य कृतिषु प्रकृतेः अनेकानि सुन्दराणि वर्णनानि सन्ति। सः पाठकस्य समक्षं सजीवं स्वाभाविकं वर्णनं प्रस्तोतुं सर्वदा प्रयतते। हर्षचरितम् कादम्बरी चेति काव्यद्वये सः नदीनां, वृक्षाणां, नगराणां, आश्रमाणां, प्रभातस्य सायंकालस्य च अद्वितीयचित्रणं विदधाति। प्रकृतिस्त्रीपुरुषाणां सौन्दर्यं विस्तरेण वर्णयति। प्रकृत्या सह मनुष्यस्य सम्बन्धः अतीव आध्यात्मिकः शाश्वतः च इति अपि सः स्वरचनानां माध्यमेन प्रकटितवान्।

नानालङ्कारप्रयोगद्वारा प्रकृतेः विविधतत्त्वानां चित्रणद्वारा सः वृक्षाणां पशूनां पक्षिणां च यत् वर्णनं विदधाति तत् अद्वितीयम् अस्ति। बाणभट्ट स्वस्य कृतिषु पात्राणां समुचितं संयोजनं दर्शयति। यथा 'रक्तवर्णस्य' कृते भिन्न-भिन्न-कालेषु भिन्नानां पर्यायवाचिशब्दानां विशेषणानां वा प्रयोगं करोति। यथा - पद्मरागपाटलः, प्रतापलाक्षरहितः,गजरोधिरविद्रुमः, पाटलः, तथा च शुक्लवर्णस्य वर्णनार्थं न केवलं श्वेतः धवलः चेति शब्दद्वयं प्रयुङ्क्ते। अपि तु हंसचित्तं, जरथमृणालः, दण्डधवलः, मुक्ताफलधवलः, अमृतफेनः च इत्यादीनां शब्दानां प्रयोगं विदधाति। बाणस्य शब्दसम्भारस्य प्रचुरत्वं यथार्थतया आश्चर्यजनकम् अस्ति। तस्य शब्दावलीविषये गहनं ज्ञानम् आसीत् इति भाति। सः स्वग्रन्थेषु सामान्यशब्दानां प्रयोगं करोति तथा च अप्रचलितानां दुर्लभशब्दानां प्रयोगं करोति। तस्य काव्यं कोशानां निधिः इव सन्ति। संस्कृतभाषायां बहुप्रवीणः बाणः अनेकान् शब्दान् समानार्थस्य बोधनाय प्रयुक्तवान्। यथा - 'निनाद' (अर्थात् ध्वनिः) इत्यस्य शब्दस्य प्रायः सर्वान् समार्थकान् शब्दान् प्रयुङ्क्ते असौ। यथा - ध्वनिः, रणितः, नादः, रसितः, घर्घरः, झङ्कारः, झण्झणः, कोलाहलः,रवः,केङ्कारः, शब्दः, निःस्वनः, विरुतः, कलकलः, हुङ्कृतः, क्वनितः, गर्जित, कूजितः, टङ्कारः, स्वनः, ह्लादः, चीत्कृतः, आक्रन्दितः। तथा च भगवतः शिवस्य वर्णनार्थं ये केचन शब्दाः प्रयुक्ताः ते यथा - हरः, ईशानः, पशुपतिः, शम्भुः, शेखरः, शितिकण्ठः, महाकालः, महेश्वरः, पिनाकी, नीलकण्ठः, स्थाणुः, विरुपाक्षः, धुर्जटिः, प्रमथनाथः, त्रिलोचनः, त्रिपुरारी, गौरीनाथः, शङ्करः, त्रिनयनः, कामजितः, शुलपाणिः इत्यादयः।

संक्षेपेण बाणभट्टः सर्वेश्वरः आसीत्। सः स्वस्य कृतिषु जगतः प्रायः सर्वं वर्णयति। अतः तस्य विषये सम्यक् उक्तम्--- 'बाणोच्छिष्टं जगत्सर्वम्' इति।

दण्डिनः शैलीगतवैशिष्ट्यम्

दण्डिनः पदलालित्यम् अत्यधिकं प्रसिद्धं वर्तते। पदानां लालित्यं, समासरहितपदावली, अनुप्रासयुक्तनादसौन्दर्यं च दशकुमारचरिते समुपलभ्यते। आचार्यदण्डी परिष्कृतगद्यशैल्याः जन्मदाता आसीत्। गद्यस्य स्वरूपं किं स्यात्, गद्ये कीदृशानां भावभाषारसालङ्काराणां समावेशः करणीयः इत्यस्य आदर्शः दशकुमारचरितग्रन्थे तेन सम्यक् प्रदर्श्यते। दण्डी वैदर्भीरीत्याः कविः अस्ति। दण्डिनः भाषायां प्रसादमाधुर्यादिगुणानां समावेशः परिलक्ष्यते। दण्डिनः ग्रन्थे भावानाम् अभिव्यञ्जनम् एतादृशं प्रबलं वर्तते यत् तैः कठिनादपि कठिनानां राजनीतितत्त्वानां वर्णनं सरलभाषया प्रस्तोतुं शक्यते। भावानुकुलं पदावलीसंचयनं तस्य प्रमुखविशेषत्वं वर्तते। शृंगारकरुणादिवर्णनेषु भाषायाः प्रसादमाधुर्यछटा दर्शनीया वर्तते। नखशिखवर्णनं प्रकृतिवर्णनं चेत्यादिषु समासयुक्तसालङ्कारपदावलीनां संयोजनं परिलक्ष्यते। 'मधुराविजय' इति महाकाव्यकारगङ्गादेव्या दण्डिनः कृतिः सरस्वतीदेव्याः मणिदर्पणम् इति अभिधीयते।

आचार्यदण्डिनो वाचामचान्तामृतसम्पदाम्।

विकासो वेधसः पत्न्या विलासमणिदर्पणम्।

केषाञ्चन पण्डितानां मतानुसारं कवित्वपरिपिकः केवलं दण्डिनि एव दृश्यते। कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः।

कल्पनाशीलदण्डिनः काव्यशैली वैदर्भीरीतिम् अनुःसरति। अर्थस्य स्पष्टत्वं, रसस्य सुन्दराभिव्यक्तिः, कल्पनायाः सजीवता, शब्दस्य लालित्यं च इत्येते दण्डिनः शैल्याः विशेषगुणाः सन्ति। अस्य रचनायां माधुर्यगुणः विशेषरूपेण प्राप्यते। तथा ओजगुणप्रभावोऽपि दर्शनीयो वर्तते यथा —

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।

असौ अल्पदीर्घसमस्तप्रकाराणां वाक्यानां प्रयोगं विदधाति। असौ राजा, राजकुमारः, ब्राह्मणः, भिक्षुकः, राजकुमारी, पाखण्डः चेत्यादीनि समाजस्य समस्तपात्राणि स्वरचितग्रन्थे स्थानं प्रददाति।

९.३.४ गद्यसाहित्यस्य भेदाः

वैदिककालत एव गद्यस्य निदर्शनं समुपलभ्यते। वैदिकात् आरभ्य लौकिकसाहित्यपर्यन्तं गद्यस्य विभाजनं निम्नप्रकारेण कर्तुं शक्यते।

१. वैदिकगद्यम् — गद्यस्य प्रथमप्रयोगः यजुर्वेदसंहितायाम् उपलभ्यते। यजुर्वेदे गद्यस्य एव प्रयोगः मिलति। अत एव उच्यते यत् — अनियताक्षरावसानं यजुः। अर्थात् यत्र अक्षराणां अवसानं नियतं न भवति, सः यजुः। गद्यात्मको यजुः इति अपि प्रसिद्धं वर्तते। वैदिकसंहिताभिः सह ब्राह्मणग्रन्थेषु आरण्यकग्रन्थेषु च गद्यकाव्यस्य अनेकप्रयोगः परिलक्ष्यते। अथर्ववेदे यथा - 'व्रात्य आसीदीयमान एव स प्रजापति स्मरैयत्। स प्रजापतिः सुवर्णमात्मानमपश्यत्, तत् प्रजनयत्। तदेकमभवत्, तल्ललाममभवत्, तन्महदभवत्, तज्ज्येष्ठमभवत्। तद्ब्रह्माभवत्, तत् तपोऽभवत्, तत् सत्यमभवत्, तेन प्रजायत।' (अथर्ववेदः, १५.१) ब्राह्मणग्रन्थेषु अपि गद्यस्य मनोहरनिदर्शनं समुपलभ्यते। तद्यथा— 'यत्र नाऽन्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति तद् भूमा। यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद् विजानाति तदल्पं यो वै भूमा तदमृतमय यदल्पं तन्मर्त्यम्' (छान्दोग्योपनिषद्, ३२५)

२. पौराणिकगद्यम् — वस्तुतः पौराणिकगद्यं लौकिकगद्यबन्धस्य सोपानभूतमस्ति। विष्णुपुराणस्य निदर्शनमेकं निश्चयेन द्रष्टव्यम् — यथैव व्योम्नि वह्निपिण्डोपमं त्वमहमपश्यं तथैवाद्याग्रतो गतमप्यत्र भगवता किंचिन् प्रसादीकृतम्। विशेषमुपलक्षयामीत्युक्ते भगवता सूर्येण निजकण्ठा दुन्मुच्यस्यमन्तकं नाम महामणिवरमवतार्य एकान्ते न्यस्तम्। (विष्णुपुराणम् ४.१३.३४)

३. शास्त्रीयगद्यम् — वैदिकालानन्तरं गद्यसाहित्यस्य विकासे दर्शनप्रस्थानानां महत्त्वं योगदानं वर्तते। अर्थस्य अभिव्यक्तिम् उपलक्ष्य प्रवृत्तेषु एतेषु दर्शनग्रन्थेषु यद्यपि शब्दसौन्दर्यस्य साहित्यिकसौन्दर्यस्य च अभावः परिलक्ष्यते तथा अत्र भावाभिव्यञ्जकतायाः कुत्रापि लाघवता न परिदृश्यते। महर्षिपतञ्जलेः भाष्यग्रन्थे, शबरस्वामिनः शबरभाष्ये, शङ्कराचार्यस्य ब्रह्मसूत्रशांकरभाष्ये, जयन्तभट्टस्य न्यायमञ्जर्यां च गद्यस्य वैलक्षण्यं दृष्टिगतं भवति। शास्त्रीयगद्यस्य निदर्शनेषु ध्वनिकारस्य आनन्दवर्धनस्य ध्वन्यालोकः, अभिनवगुप्तस्य टीका चेत्यादयः प्रसिद्धास्सन्ति।

४. साहित्यिकगद्यम् — साहित्यिकगद्यस्य प्रारम्भः ऐतिहासिकगद्यकाव्यस्य आत्मभूताया आख्यायिकायाः सञ्जातः। वासवदत्ता, सुमनोत्तरा, भैमरथी चेत्यादीनाम् आख्यायिकानाम् अनन्तरं विभिन्नाः कथाः तथा सूक्तयः प्रसिद्धाः जाताः। साहित्यिकगद्यस्य उत्कृष्टम् उदाहरणं वर्तते रुद्रदामनस्य शिलालेखः (गिरनार-अभिलेखः) तथा हरिषेन कृतायां समुद्रगुप्तप्रशस्त्याम् अपि गद्यस्य मनोहरं निदर्शनं प्राप्यते। अस्य साहित्यिकगद्यस्य विकसितं रूपं आचार्यदण्डिनः आचार्यसुबन्धोः, आचार्यबाणस्य उत्कृष्टरचनासु परिलक्ष्यते। गद्यसाहित्यस्य रोचकत्वं कथासाहित्ये समुपलभ्यते। यद्यपि पुराणसाहित्ये अपि आख्यानकथादयः प्राप्यन्ते एव तथापि सुबन्धोः वासवदत्ता इति कथा एव संस्कृतसाहित्ये प्रथमकथा इति ज्ञायते।

९.४ अध्यायस्य असमीयाभाषायां संक्षिप्तविवरणम्

গদ্ ধাতুৰ লগত য়ৎ প্রত্যয় যোগ কৰিলে গদ্য শব্দ নিষ্পন্ন হয়। ভাৱৰ অভিব্যক্তিৰ প্রক্রিয়াই হ'ল গদ্য। গদ্য শব্দৰ কাব্যশাস্ত্রীয় স্বৰূপো পোৱা যায়। যেতিয়া গদ্যত কাব্যশাস্ত্রীয় সিদ্ধান্তৰ সমাৱেশ ঘটে, তাৰ পিছৰ পৰাই গদ্যকাব্যৰ সৃষ্টিও অতি কষ্টকৰ হৈ পৰে। অষ্টম শতাব্দীৰ পিছত গদ্য কাব্যৰ সৃষ্টি মানেই হ'ল অসাধাৰণ পাণ্ডিত্যৰ প্রদর্শন। সেয়েহে কোৱা হয় যে - গদ্য কবীনাং নিকষং বদন্তি । সংস্কৃত ভাষাত গদ্য কাব্যৰ অন্যতম স্থান আছে। সাধাৰণতে গদ্য কাব্যক দুটা ভাগত ভাগ কৰিব পাৰি। প্রথমতে প্রাচীন সংস্কৃত গদ্য সাহিত্য, দ্বিতীয়তে আধুনিক সংস্কৃত গদ্য সাহিত্য। প্রাচীন সংস্কৃত গদ্য সাহিত্যত সুবন্ধুৰ বাসবদত্তা হ'ল প্রথম সৃষ্টি। কবিৰ গদ্যত উপমা উৎপ্রেক্ষা ইত্যাদি অলংকাৰৰ ব্যৱহাৰে কাব্যৰ সৌন্দর্য দুগুণ বৃদ্ধি কৰিছে। তথা শ্লেষ আদি অলংকাৰৰ সংযোজনে কবিৰ গদ্যত চমৎকাৰৰ সৃষ্টি কৰিছে। সুবন্ধুৰ পিছত বাণভট্টৰ কাদম্বৰী হ'ল অদ্বিতীয় ৰচনা। বাণভট্টই কাদম্বৰী গ্রন্থত যেনেধৰণৰ উৎকৃষ্ট উদাহৰণ প্রস্তুত কৰিছে তাৰ কাৰণে আজিও কবি সমাজে তেওঁৰ প্রশংসা কৰে। বর্ণনীয় বিষয় অনুসৰি শব্দৰ প্রয়োগ কৰাই হৈছে বাণভট্টৰ বৈশিষ্ট্য। অর্থৰ নতুনত্ব, স্বভাবোক্তিৰ চাৰুতা, শ্লেষৰ স্পষ্টতা, অক্ষৰৰ বন্ধন কাদম্বৰী গ্রন্থৰ বৈশিষ্ট্য। যেনে -

क্রমেণ চ কৃতং মে বপুষি বসন্ত ইব মধুমাসেন, মধুমাস ইব পল্লবেন, নবপল্লৱ ইৱ কুসুমেন, কুসুম ইৱ মধুকৰেণ, মধুকৰ ইৱ মদেন, মদ ইৱ নবযৌৱনেন পদম্।

তেনেদৰে পৰিসংখ্যা অলংকাৰৰ চাৰুতা বাণভট্টৰ গদ্যৰ অন্য এক বৈশিষ্ট্য। প্ৰাচীন গদ্য সাহিত্যত প্ৰণয় বৰ্ণনা, ৰজাসকলৰ গুণ তথা যশস্যাৰ বৰ্ণনা অধিক পৰিলক্ষিত হয়। কিন্তু আধুনিক গদ্য সাহিত্যত কবিয়ে সামাজিক ৰাজনৈতিক পৰিস্থিতিৰ বৰ্ণনা, স্বতন্ত্ৰতা সংগ্ৰামৰ বৰ্ণনা ইত্যাদিৰ বৰ্ণনা অধিকভাৱে কৰা দেখা যায়। আধুনিক গদ্য সাহিত্যত অনেক বৰ্ণনীয় বিষয়ৰ সমাবেশ ঘটা দেখা যায়। গদ্য সাহিত্যৰ কথা, লঘু কথা, উপন্যাস, যাত্ৰা সাহিত্য, জীৱনবৃত্তৰ বৰ্ণনা ইত্যাদি বিভিন্ন ভাগ দেখিবলৈ পোৱা যায়। আধুনিক গদ্য সাহিত্যত কথা, লঘু কথাৰ প্ৰাধান্য থাকে। একবিংশ শতিকাৰ অন্তিম দশকত সংস্কৃত গদ্য সাহিত্যত লঘুকথা ৰচনাৰ প্ৰয়াস কৰা হয়। সৰ্বপ্ৰথম শিৱৰাজবিজয়কাৰ অম্বিকাদত্ত ব্যাসদেৱে এই প্ৰচেষ্টা হাতত লয়। তেওঁ ৰচনা কৰা ৰত্নাষ্টক নামৰ কথাসংগ্ৰহত হাস্যৰস প্ৰধান আৰু উপদেশমূলক আঠটা কথাৰ সংকলন দেখা পোৱা যায়।

সাহিত্যদৰ্পন শীৰ্ষক গ্ৰন্থখনত আচাৰ্য বিশ্বনাথে কাব্যৰ স্বৰূপ বৰ্ণনাৰ প্ৰেক্ষাপটত কাব্যৰ দুটা ভেদ প্ৰদৰ্শন কৰিছে। দৃশ্য কাব্য আৰু শ্ৰব্য কাব্য দৰে দৃশ্য কাব্যত নাটক, প্ৰহসন আদি ৰূপক আৰু উপৰূপকৰ বিষয়ে বিতংভাৱে আলোচনা কৰা হৈছে। তেওঁ পুনৰ শ্ৰব্য কাব্যৰ দুটা ভেদ দাঙি ধৰিছে। যেনে - গদ্য কাব্য আৰু পদ্য কাব্য। গদ্য কাব্যৰ পৰিভাষা তেওঁ এনেদৰে প্ৰকাশ কৰিছে - বৃত্তগন্ধোজ্ঝিতং গদ্যং। তথা গদ্যৰ চাৰিটা ভেদ প্ৰকাশ কৰিছে। সেয়া হ'ল - মুক্তক, বৃত্তগন্ধি, উৎকলিকাপ্ৰায় আৰু চূৰ্ণক। সাহিত্যদৰ্পণৰ ষষ্ঠ পৰিচ্ছেদত কোৱা আছে—

বৃত্তগন্ধোজ্ঝিতং গদ্যং মুক্তকং বৃত্তগন্ধি চ ।
ভবেদুৎকলিকাপ্ৰায়ং চূৰ্ণকং চ চতুৰ্বিধম্।।

এই ভেদ সমূহ ৰচনাশৈলী, সমাসশৈলী, পদ সন্নিৱেশ আদিৰ আধাৰত কৰা হৈছে।

1] মুক্তক - গদ্যৰ প্ৰথম ভেদ হ'ল মুক্তক। অসমসস্ত পদৰ দ্বাৰা মুক্তক গদ্যৰ ৰচনা কৰা হ'ল। লঘু পদ আৰু লঘু বাক্যৰ দ্বাৰা মণ্ডিত তথা সৰল আৰু সৰস পদাৱলীযুক্ত ৰচনাই হ'ল মুক্তক গদ্য। যেনে - গুৰুৰ্বচসি পৃথুৰসি। অৰ্থাৎ বাণীত যাৰ গুৰুতা থাকে সেয়া পৃথুৰ সমান শক্তিশালী হয়।

2] বৃত্তগন্ধি- বৃত্তস্য গন্ধো যস্মিন্ সঃ বৃত্তগন্ধিঃ। বৃত্ত মানে হৈছে ছন্দ, আৰু গন্ধ শব্দৰ অৰ্থ হল প্ৰতীতি। বৃত্তগন্ধি গদ্যৰ এনেকুৱা এটা ভেদ য'ত বৃত্তাংশ বিভিন্ন স্থলত পোৱা যায়। যেনে 'সমৰকণ্ডুল নিবিড় ভুজদণ্ড কুণ্ডলীকৃতকোদণ্ড শিংজিনীটংকাৰোজ্জাগৰিতৱৈৰীনগৰ' প্ৰস্তুত বৃত্তগন্ধিৰ উদাহৰণত 'কুণ্ডলীকৃতকোদণ্ড' এই অংশ অনুষ্টুপ্ ছন্দৰ এটা চৰণত সংঘটিত হৈছে। দ্বিতীয়তে 'সমৰকণ্ডুল' এই অংশৰ প্ৰাক্ ভাগত দুটাকৈ অক্ষৰ থাকিলে এই অংশটোও অনুষ্টুপ্ ছন্দৰ এটা চৰণক পূৰণ কৰিলেহেঁতেন।

3] উৎকলিকা প্ৰায় - গদ্যৰ তৃতীয় ভেদটো হ'ল উৎকলিকা প্ৰায়। গদ্যৰ এই ভাগটো দীৰ্ঘ সমাসবদ্ধ হয়। যেনে- 'অণিসবিসুমৰণিসিদসৰসবিসৰবিদলিদসমৰপৰিগদপৱৰপৰৱল' ইতি

প্রস্তুত গদ্যাংশত দীর্ঘ সমাসযুক্ত পদ পৰিলক্ষিত হয়। এনেধৰণৰ দীর্ঘ সমাসযুক্ত পদ উৎকলিকাপ্রায়গদ্যত দেখা পোৱা যায়।

4) চূর্ণক - গদ্যৰ চতুর্থ ভেদ হ'ল চূর্ণক। যি গদ্য শৈলীত অল্প সমাসযুক্ত পদৰ প্রয়োগ কৰা হয়, তেনে গদ্যক চূর্ণক বুলি কোৱা হয়। তথা ইয়াত লঘু লঘু পদ প্রয়োগ কৰা হয়। যেনে - 'গুণৰত্ন সাগৰ¯জয়দেৱনাগৰ¯কামিনীমদন¯জনৰঞ্জন।' প্রস্তুত উদাহৰণত স্বল্প সমাস যুক্ত পদৰ প্রয়োগ কৰা হৈছে।

আচার্য্য বিশ্বনাথ কবিৰাজে এই ভেদসমূহৰ লক্ষণ একেটা শ্লোকতে এনেদৰে উপস্থাপন কৰিছে -

আদ্যং সমাসৰহিতং বৃত্তভাগযুতং পৰম্।
অন্যৎ দীর্ঘসমাসাঢ্যং তুর্য্যং চাল্পসমাসকম্।।

আচার্য্য বিশ্বনাথ কবিৰাজে কথা আৰু আখ্যায়িকা নামৰ গদ্যৰ অবান্তৰ দুটা ভেদৰ উল্লেখ কৰিছে। তাৰ ভিতৰত কথাৰ লক্ষণ এনেদৰে প্রকাশ কৰে -

কথায়াং সৰসং বস্তু গদ্যৈৰ্ৱৰ বিনির্মিতম্।
ক্কচিদত্র ভৱেৎ আর্য্যা ক্কচিদ্ বক্রৰাপৱক্রকে
আদৌ পদ্যৈর্নমস্কাৰঃ খলাদেৱৃত্তকীর্তনম্।

অর্থাৎ গদ্যকাব্যৰ এটা ভেদ হ'ল কথা। কথাৰ ইতিবৃত্ত ৰসযুক্ত হয় । কথাত ক'ৰবাত আর্য্যা ছন্দ, ক'ৰবাত বক্রৰ ছন্দ আৰু আন ক'ৰবাত অপবক্রৰ ছন্দ থাকে। কথাৰ প্রাৰম্ভ নমস্কাৰাত্মক মংগলাচৰণৰ দ্বাৰা কৰা হয়। কথাত দুর্জন লোকৰ নিন্দা তথা সৎ লোকৰ প্রশংসা কৰা হয় ।

তথা আখ্যায়িকাৰ লক্ষণ বিশ্বনাথ কবিৰাজে এনেদৰে উপস্থাপন কৰিছে -

আখ্যায়িকা কথাবৎস্যাৎ কৱের্ৱংশানুকীর্তনম্।
অস্যামন্যাং কবীনাং চ বৃত্তং পদ্যং ক্কচিৎ ক্কচিৎ ।
কথাংশানাং ব্যৱচ্ছেদ আশ্বাস ইতি ৱধ্যতে।
আর্য্যাৱক্রাপৱক্রাণাং ছন্দসা যেন কেনচিৎ ।।
অন্যাপদেশেন আশ্বাসমুখে ভাব্যর্থসূচনম্।

এনেদৰে আখ্যায়িকাও গদ্যৰ আন এক ভেদ বুলি উল্লেখ কৰিছে । এই ভাগটোত প্রায় কথাৰ বৈশিষ্ট্যসমূহেই দেখা পোৱা যায় । ঐতিহাসিক বিষয়ক আধাৰ কৰি নির্মাণ কৰা আখ্যায়িকা নামৰ গদ্যত কবিয়ে নিজৰ বংশৰ গুণানুকীর্তন কৰে। অন্যান্য কবিসকলৰ চর্চাও কৰা দেখা যায়। আখ্যায়িকাত কথাংশৰ বিভাজন আশ্বাস নামেৰে কৰা হয়। আর্য্যা, বক্রৰ তথা অপবক্রৰ ছন্দৰ যিকোনো এটা ছন্দৰে বর্ণনীয় বিষয়ৰ উপস্থাপন কৰা হয়। আখ্যায়িকাৰ উদাহৰণ হৈছে - হর্ষচৰিতম্। গদ্যৰ কথা আৰু আখ্যায়িকা নামৰ ভেদ দুটা আচার্য্য দণ্ডিৰ কাব্যাদর্শতো পোৱা যায় ।



९.५ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- अस्य पाठस्य अध्ययनेन वयं गद्यस्य स्वरूपं ज्ञातवन्तः।
- अस्य पाठस्य अध्ययनेन वयं गद्यस्य भेदोपभेदान् सोदाहरणं ज्ञातवन्तः।
- अस्य पाठस्य अध्ययनेन वयं गद्यस्य उत्पत्तिं विकासं च कथमिति ज्ञातवन्तः।
- अस्य पाठस्य अध्ययनेन वयं कवेः दण्डिनः जीवनकालविषयं ज्ञातवन्तः।
- अस्य पाठस्य अध्ययनेन वयं दण्डिनः शैलीं गद्यवैशिष्ट्यं च ज्ञातवन्तः।



९.६ ज्ञानाधिक्यम्

१) काव्यादर्शः, मिश्रः रामचन्द्रः, चौखम्बा विद्याभवन, वाराणसी।
२) साहित्यदर्पणः, सिंहः सत्यव्रतः, चौखम्बा विद्याभवन, वाराणसी।
३) दशकुमारचरितम्, रेग्मी शेषराजशर्मा, चौखम्बा कृष्णदास अकादमी, वाराणसी २०१६।
४) दशकुमारचरितम्, त्रिपाठी कृष्णामणि, चौखम्बा सुरभारती प्रकाशन,वाराणसी, २०१४।
५) संस्कृतसाहित्यस्येतिहासः, दाहालः लोकमणिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१६।
६) সংস্কৃত সাহিত্যৰ ইতিবৃত্ত, শর্মা থানেশ্বৰ, চন্দ্র প্রকাশ, পাণবজাৰ গুৱাহাটী, 2015।



९.७ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : गद्यम्।
प्रश्नः २ उत्तरम् : हर्षचरितम्।
प्रश्नः ३ उत्तरम् : अष्टोच्छ्वासाः।
प्रश्नः ४ उत्तरम् : गद्यस्य।
प्रश्नः ५ उत्तरम् : वासवदत्ता।
प्रश्नः ६ उत्तरम् : बाणभट्टेन।
प्रश्नः ७ उत्तरम् : अम्बिकादत्तव्यासस्य।



९.८ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: गद्यशब्दः कथं निष्पन्नो भवति ?

प्रश्नः २: विश्वनाथाचार्येण काव्यस्य कति भेदं प्रदर्शयति ?

प्रश्नः ३: गद्यस्य लक्षणं विश्वनाथकविराजेन किं प्रदत्तम् ?

प्रश्नः ४: विश्वनाथमतानुसारं गद्यस्य कति भेदाः सन्ति ?

प्रश्नः ५: मुक्तकगद्यस्य एकं वैशिष्ट्यं लिखत।

प्रश्नः ६: वृत्तगन्धिगद्यस्य एकं वैशिष्ट्यं लिखत।

प्रश्नः ७: उत्कलिकाप्रायगद्यस्य एकं वैशिष्ट्यं लिखत।

प्रश्नः ८: चूर्णकगद्यस्य एकं वैशिष्ट्यं लिखत।

प्रश्नः ९: विश्वनाथेन विभक्तौ गद्यस्य अवान्तरभेदौ कौ स्तः ?

प्रश्नः १०: कथायाः लक्षणं विलिख्य व्याख्यायत।

प्रश्नः ११: आख्यायिकायाः स्वरूपं विलिख्य व्याख्यायत।

प्रश्नः १२: हर्षचरितं केन विरचितम् ?

प्रश्नः १३: तिलकमञ्जरी केन विरचिता ?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

१: दण्डी

२: दशकुमारचरितम्

३: शिवराजविजयम्

४: कादम्बरी

५: सुबन्धोः वासवदत्ता

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः१: प्रमुखानां गद्यकाव्यानां नामानि विलिख्य तेषां परिचयपुरस्सरं संक्षिप्तवर्णनं कुरुत।

प्रश्नः२: सुबन्धोः वासवदत्तायाः शैलिगतवैशिष्ट्यं विलिखत।

प्रश्नः३: बाणभट्टस्य शैलिगतं वैशिष्ट्यं विलिखत।

प्रश्नः४: दण्डिनः शैलीगतं वैशिष्ट्यं विलिखत।

प्रश्नः५: कथा-आख्यायिकयोः पार्थक्यं विश्लेषयत।

*** ***** ***

अध्यायः १० : आख्यानसाहित्यम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

१०.१ उद्देश्यम्

१०.२ परिचयः

१०.२.१ आख्यानसाहित्यस्य लक्षणम्

१०.२.२ आख्यानसाहित्यस्य विभाजनम्

१०.२.३ आख्यानसाहित्यस्य उत्सः

१०.२.४ आख्यानसाहित्यस्य वैशिष्ट्यम्

१०.२.५ आख्यानसाहित्यस्य प्रकाराः

१०.३ अध्यायस्य असमीयाभाषायां सारांशः

१०.४ अध्यायात् किमवगतम्

१०.५ ज्ञानाधिक्यम्

१०.६ अग्रगत्याः निरूपणम्

१०.७ अभ्यासप्रश्नाः

१०.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- आख्यानसाहित्यस्य परिचयं प्राप्तुं शक्नुवन्ति।
- आख्यानसाहित्यस्य विभाजनसम्बन्धे ज्ञातुं शक्नुवन्ति।
- भारतीयज्ञानपरम्परायाः प्रमुख–अङ्गरूपेण आख्यानस्य महत्त्वं ज्ञातुं शक्नुवन्ति।
- आख्यानस्य वैदिकलौकिस्वरूपभेदानाम् अवधारणं प्राप्तुं शक्नुवन्ति।
- उपदेशात्मकसाहित्यान्तर्गतानां ग्रन्थानां परिचयं प्राप्तुं शक्नुवन्ति।

१०.२ परिचयः

वैदिकसाहित्यस्य परिशीलनेन ज्ञातुं शक्यते यत् प्राचीनकालादेव मनुष्यः स्वस्य भावानां चेष्टानां च वृत्तात्मकरूपेण अभिव्यक्तुं प्रयासरतो वर्तते। वेदिकसाहित्ये चस्ङ् धातोः आख्यात् अथवा अख्यत् तथा चख्यथुः इत्यादिक्रियारूपाणां स्वार्थे प्रयोगः दृष्टिगतं भवति। आख्यानशब्देन सह एव उपाख्यान इति शब्द अपि बहु प्रचलितो वर्तते। उपाख्यानशब्द उप तथा आङ् उपसर्गपूर्वकं ख्याधातोः ल्युट्–प्रत्यये कृते निष्पन्नो भवति। यद्यपि आख्यान–उपाख्यानशब्दौ समानार्थकौ वर्तेते, तथापि पुराणेषु भिन्नार्थेषु द्वयोः शब्दयोः प्रयोगः परिलक्ष्यते। तद्यथा –

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहिता चक्रे पुराणार्थनिशारदाः।

उपर्युक्तश्लोकस्य व्याख्यां विधाय टीकाकारः श्रीधरस्वामी द्वयोः शब्दयोः पार्थक्यं प्रदर्शयति एवम् –

स्वयं दृष्टार्थकथनं प्राहुराख्यानं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते।।

अस्य श्लोकस्य मतानुसारं स्वयं दृष्टार्थस्य कथनम् एव आख्यानम् उच्यते। तथा श्रुतार्थस्य कथनम् उपाख्यानम् उच्यते। आचार्यबलदेव-उपाध्यायः कौटिल्यमतं समुद्धृत्य 'वैदिक साहित्य एवं संस्कृति' इत्याख्ये स्वग्रन्थे उल्लिखति यत् कौटिल्य इतिहासान्तर्गतानां पुराण-इतिवृत्त-आख्यायिकानां ग्रहणं करोति। इत्थम् आख्यानशब्दविषये विभिन्नाचार्याणां मतानुसारं विविधता परिलक्ष्यते। तेषां मतानुसारम् आख्यानशब्दस्य कथनम्, पूर्ववृत्तोक्तिः, वृत्तान्तः इत्यादयः अर्थाः गृह्यन्ते। परन्तु सम्प्रति अयं शब्दः पूर्ववृत्तान्तकथारूपे अथवा पौराणिककाल्पनिककथारूपे अर्थे रूढो भवति। अतः पूर्ववृत्तान्त एव आख्यानमिति वक्तुं शक्यते। हिन्दीसाहित्ये आख्यानशब्दस्य कृते मिथ्क इतिशब्दस्य प्रयोगः विधीयते। वस्तुतः वैदिक-आख्यानानां कृते पौराणिक-आख्यानानां कृते च मिथ्कशब्दस्य प्रयोगः हिन्दीसाहित्ये अधिकः प्रचलितो भवति। पाश्चात्यविद्वांसः माइथ'लोजी इति शब्दं व्यवहरन्ति। मिथ इति मूलतः ग्रीक्-भाषायाः शब्द अस्ति यस्य अर्थ अस्ति वाण्याः विषयः।

१०.२.१ आख्यानसाहित्यस्य लक्षणम्

आख्यानशब्दः आङ्पूर्वकं ख्या इति धातोः ल्युट् प्रत्यये परे सञ्जायते। तारानाथकृतस्य 'वाचस्पत्यम्' नाम्नः कोशग्रन्थस्य प्रारम्भभागे अस्य व्युत्पत्ति आख्यायते अनेनेति एतत् आख्यानम् इति उल्लिख्यते। साहित्यदर्पणग्रन्थे विश्वनाथाचार्यः आख्यानं पूर्ववृत्तोक्ति इति उल्लिखति।

वेदेषु विभिन्नानाम् आख्यानानां वर्णनं विधाय अपि आख्यानशब्दस्य प्रयोगो न विधीयते तथैव आख्यायिका इति पदस्यापि प्रयोगो न परिदृश्यते। ऋग्वेदस्य १.१६७.६ मन्त्रे गाथा इति शब्दस्य प्रयोगः परिलक्ष्यते परन्तु अत्र गाथाशब्दस्य कथाप्रसङ्गे न अपि तु स्तुतिप्रसङ्गे प्रयोगो विधीयते। सर्वप्रथमं ऐतरेयब्राह्मणम् (३.२५), शतपथब्राह्मणञ्च (१३.४.३.२) इति द्वयोः ब्राह्मणग्रन्थयोः पुनः ऐतरेय-आरण्यकं (२.३.४) तथा तैतिरीय-आरण्यकञ्च (१.६.३) इति आरण्यकयोः वर्णनं तथा वैदिकसंवादसूक्तेषु समुपलब्धवर्णनम् आख्यानपदेन अभिधीयते।

वैदिकवाङ्मयादनन्तरं लोकिकसाहित्यस्य अन्तर्गते आदिकाव्ये वाल्मीकिरामायणे तथा व्यासप्रणीते महाभारते कथातत्त्वप्रधाना ऐतिहासिकघटना तथा इतिवृत्तात्मकवर्णनं आख्यानसंज्ञया अभिधीयते। रामायणे सम्पूर्णरामकथायाः, अन्तर्कथानां तथा वृत्तानां कृते आख्यानपदप्रयोगो भवति। तथैव महाभारतस्य नलोपाख्यानं रामोपाख्यानं च प्रख्यातं वर्तते। तथैव उद्योगपर्वणि इन्द्रविजयनाम्नः प्रसिद्धम् आख्यानं वर्तते। तथा

आरण्यकपर्वणि यक्ष-युधिष्ठिर-संवादः अपि आख्यानपदवाच्यः। वायुपुराणानुसारं पुराणसंहिताया रचनं नैकाख्यानोपाख्यानगाथानां संग्रहेण विधीयते। तद्यथा वायुपुराणे—

आख्यानैश्चाप्युपाख्यानैर्गाथाभि कुलकर्मभिः।
पुराणसंहिता चक्रे पुराणार्थविशारदः।। वायुपुराणम् अध्यायः ६०

जैनाचार्यः हेमचन्द्रः काव्यानुशासने आख्यानस्य संज्ञाम् इत्थं निरूपयति -

आख्यानकसंज्ञां तल्लभते यदाभिनयेन पठन् गायन्।
ग्रन्थिकः एकः कथयति गोवन्दवद् अवहिते सदसि।।

अर्थात् एक एव कथाकार अभिनयमाध्यमेन पठनं गायनं कृत्वा एकत्रिभूतं श्रोतारं यत् श्रावयति तदेव आख्यानमुच्यते।

वाल्मीकिरामायणे सम्पूर्णरामकथा आख्यानसंज्ञया उच्यते। तद्यथा -

आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितम्। (बालकाण्डम् ४.२६)
एवमेतत् पुरावृत्तम् आख्यानं भद्रमस्तुवः (युद्धकाण्डम् १३१.१२२)

कतिपयाः साहित्यशास्त्रकारा अस्मिन् सन्दर्भे स्वाभिमतानि प्रतिपादयन्ति। आचार्यभामहः स्वग्रन्थे काव्यालङ्कारे कथायाः आख्यायिकायाः गाथायाश्च भिन्नं लक्षणं निरूपयति। कथायाः स्वरूपं तेन इत्थं प्रतिपादितम् -

न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वास वत्यपि।
संस्कृतासंस्कृता चेष्टा कथाडपभ्रांशभाक्तथा।। १.२८

आचार्यविश्वनाथकविराजः कथा तथा आख्यायिका इति गद्यस्य भेदद्वयं प्रदर्श्य आख्यानं कथाख्यायिकयोः अन्तर्गतमिति स्वीकरोति। यथा -आख्यानादयश्च कथाख्यायिकायोरेवान्तर्भावान्न पृथगुकताः। (साहित्यदर्पणः, ६.३३५)

आचार्यः दण्डी अपि तदेव स्वीकरोति। यथोक्तं तेन काव्यादर्शे - अत्रैवान्तर्भविष्यन्ति शेषश्चाख्याधजातयः। (काव्यादर्शः, १.२३,२८)

साहित्यदर्पणग्रन्थे प्राचीनानाम् आख्यानानाम् उदाहरणं न प्रदत्तं परन्तु कथायाः प्रतिनिधिरूपेण 'कादम्बरी' तथा आख्यायिकायाः प्रतिनिधिरूपेण 'हर्षचरितम्' इति ग्रन्थद्वयं समुद्धृतो वर्तते। कादम्बरीग्रन्थे आख्यानग्रन्थम् आख्यायिकात् भिन्नमिति प्रतिपादयति। तथा कंसवधादे उदाहरणं दत्वा आख्यानम् ऐतिहासिकवृत्तान्त इति स्वीकरोति। यथा -आख्यानक आख्यायिका इतिहास पुराणाकर्णनेन। (कादम्बरी ७)

मनुस्मृतौ आख्यानशब्दस्य प्रयोगः प्राचीनकथानां कृते अभवत्। यथा - आख्यानीतिहासांश्च पुराणानि खिलानि च। (मनुस्मृतिः ३.२३२)। इत्थमेव मातङ्गलीलाग्रन्थे पुरूरवोर्वश्योः कथा आख्यानरूपे समुद्धृता। यथा - अप्सराः पुरुरवंचकमे, इत्याख्यानविद् आचक्षते।

१०.२.२ आख्यानसाहित्यस्य विभाजनम्

आख्यानसाहित्यमस्ति देशस्य जातेर्वा संवाहकः। आसमन्तात् ख्यायते असौ इति आख्यानम्। अर्थात् लोके सर्वतः यत् कथ्यते तदेव आख्यानमिति उच्यते। शाखान्तरवत् आख्यानसाहित्यमपि विकसितं समृद्धं च परिलक्ष्यते। आख्यानसाहित्यं द्विविधं वर्तते। तद्यथा - नीतिकथा लोककथा चेति। यत् सदुपदेशेन सत्कार्ये जनानां प्रवृत्तिं करोति , असत्कार्ये च निवृत्तिं करोति तदेव नीतिकथामूलकं काव्यम्। नीतिकथायाः उद्देश्यमस्ति रोचकाख्यानमाध्यमेन पुरुषार्थसाधनोपायकथनम्। लोककथाया उद्देश्यमस्ति मनोरञ्जनम्। आख्यानसाहित्यस्य प्राचीनत्वविषये किमपि स्पष्टं वक्तुं नैव शक्यते। परन्तु एतत्तु निश्चितमस्ति यत् आख्यानसाहित्यं काव्याद् प्राचीनतरमस्ति। ऋग्वेदादौ अपि नीतिकथायाः निदर्शनं परिलक्ष्यते। ऋग्वेदस्य दशममण्डलस्य १०८ तमे सूक्ते सरमायाः पणिनां च संवादः समुपलभ्यते।

१०.२.३ आख्यानसाहित्यस्य उत्सः

जगति प्राचीनतमं साहित्यमस्ति वैदिकसाहित्यम्। वेदादिषु अपि प्राचीनाख्यानानां निदर्शनं समुपलभ्यते। ऋग्वेदस्य यमयमीसंवादसूक्तम्, पुरूरवा-उर्वशीसंवादसूक्तम्, सरमापणिसंवादसूक्तम्, विश्वामित्रनदीसंवादसूक्तम् चेत्यादीनि आख्यानानि प्रसिद्धानि वर्तन्ते। तथैव ब्राह्मणसाहित्ये अपि विभिन्नाः कथाः विभिन्नानि च आख्यानानि समुपलभ्यन्ते। शतपथब्राह्मणे मनुमत्स्यकथा प्रसिद्धलोककथारूपेण अद्यापि प्रचलिता वर्तते। परवर्तिकाले यास्काचार्यस्य निरूक्तं, शौनककृता बृहद्देवता तथा पतञ्जलिमुनेः महाभाष्यम् इत्यादिषु ग्रन्थेषु आख्यानानां प्रभावः परिलक्ष्यते। रामायण-महाभारत-अष्टादशपुराणेषु अपि आख्यानानां प्राचुर्यत्वं दृष्टिगतं भवति। प्राचीनमहाकाव्येषु रामायणमहाभारतादिषु वाल्मीकिव्यासादिभिः रामरावणयोः पाण्डवकौरवाणां च कथा वर्णिता। ताः कथा अद्यापि जनसमाजे दृश्यश्रव्यमाध्यमेन प्रवाहिताः वर्तन्ते। महाभारते कथायाः आधिक्येन चर्चा विधीयन्ते। एतादृग्भिः कथाभिः जनसमाजे सामाजिक-नैतिक-राजनैतिक-अर्थनैतिकदिक्षु उत्कर्षसाधनं भवति।

१०.२.४ आख्यानसाहित्यस्य वैशिष्ट्यम्

अतिप्राचीनकालादेव भारतवर्षे विविधश्रेण्याः कथा आख्यानानि उपाख्यानानि विनिर्मितानि सन्ति। प्राचीना आलङ्कारिकाः लोककथानां तथा नीतिगर्भकथानाम् अथवा उपदेशमूलककथानां मध्ये पार्थक्यं न प्रदर्शयन्ति। परन्तु उभयोः प्रकारयोः तुलनात्मकाध्ययनेन कानिचन पृथकत्वसूचकानि वैशिष्ट्यानि परिलक्ष्यन्ते। उभयो आकृति-प्रकृति-विषयवस्तु-उद्देश्यानि भिन्नानि वर्तन्ते। पाठकानां मनोरञ्जनं लोककथानां परमम्

उद्देश्यं वर्तते। परन्तु उपदेशमूलककथानां परमं उद्देश्यमस्ति सदाचार-नीति-राजनीतिविषयकपाठदानम्। पाठकानां मनोरञ्जनम् उपदेशमूलककथानां गौणोद्देश्यं वर्तते। पुनः लोककथा सरलगद्य-वर्णनात्मकश्लोकादीभिः मिश्रिता वर्तते। परन्तु उपदेशमूलककथाः नीतिसूत्रसम्मतश्लोकसमन्विताः वर्तन्ते। लोककथासु प्रायेण अन्धविश्वासः जनप्रिय-आख्यान-प्रेमकथा-दुःसाहसिक-अभियान-स्वप्नदर्शन-आकाशवाणी-चेत्यादीनां वर्णनं प्राप्यते। तथा उपदेशमूलककथासु मानवीयभावानाम् अभिव्यक्तिः तथा पशुपक्षीणाम् अभिज्ञनीतिविदां चरित्राणाम् अभिनयेषु अवतरणं परिलक्ष्यते।

१०.२.५ आख्यानसाहित्यस्य प्रकाराः

संस्कृतसाहित्ये विरचितानि विभिन्नानि नीतिशास्त्राणि —

१. पञ्चतन्त्रम् —नीतिमूलकशास्त्रेषु अथवा उपदेशमूलकशास्त्रेषु पञ्चतन्त्रम् अत्यधिकं प्रसिद्धं पौराणिकं च वर्तते। वर्तमानकाले अस्य ग्रन्थस्य चत्वारि संस्करणानि उपलभ्यन्ते। प्रथमसंस्करणं सम्प्रति नोपलभ्यते। द्वितीयसंस्करणं गुणाढ्यस्य बृहत्कथायां सन्निविष्टं भवति। बृहत्कथा पैशाचीभाषायां विरचिता वर्तते। इदं संस्करणमपि अधुना विलुप्तं भवति। तृतीयसंस्करणमस्ति तन्त्राख्यायिका। वर्तमानप्रचलितं पञ्चतन्त्रम् अस्यैव आधुनिकसंस्करणं वर्तते। आङ्ग्लपण्डितस्य हार्टेलदेवस्य मतानुसारं पन्चतन्त्रस्य रचनाकालो वर्तते द्वितीयशताब्दी। पञ्चतन्त्रं पञ्चसु तन्त्रेषु विभक्तम् अस्ति। तद्यथा — मित्रभेदः, मित्रसंप्राप्तिः, काकोलूकीयः, लब्धप्रणाशः, अपरीक्षितकारकः च। पञ्चतन्त्रस्य कथामुखे एव उपलभ्यते यत्—

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्।।

कथितमस्ति यत् दाक्षिणात्यस्य महिलारोप्यनाम्नः नगरस्य राजा अमरकीर्तिः तस्य मूर्खपुत्रेभ्यः नीतिज्ञानप्रदानाय विष्णुशर्मा इत्याख्यां पण्डितमेकं गुरुरूपेण नियुक्तवान्। लोकशास्त्रविशारदः विष्णुशर्मा पञ्चतन्त्रं विरचित्य कथामाध्यमेन अल्पदिनेषु एव राजकुमारान् व्यवहारकुशल-नीतिज्ञ-सदाचारसम्पन्नान् विनिर्माति। पञ्चतन्त्रस्य श्लोकाः रामायणमहाभारतादिग्रन्थेभ्यः अन्यनीतिग्रन्थेभ्यः समुद्धृताः वर्तन्ते। पञ्चतन्त्रं न केवलं भारतीयसाहित्ये अपि तु विश्वसाहित्ये विशिष्टं स्थानमेकम् अधिकरोति।

पञ्चतन्त्रग्रन्थान्तर्गतस्य एकस्याः लघुकथाया अत्र समावेशः क्रियते —

ब्राह्मणीनकुलकथा---

कस्मिंश्चिद् अधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्या प्रसूता सती सुतम् अजनयत्। तस्मिन् एव दिने नकुली नकुलं प्रसूय मृता। अथ सा

सुतवत्पला दारकवत्तम् अपि नकुलं स्तन्यदानाभ्यंगमर्दनादिभिः पुपोष, परं तस्मिन् न विश्वसिति। अपत्यस्नेहस्य सर्वस्नेहातिरिक्ततया सा सततम् एवम् आशंकते यत् कदाचिद् एषः नकुलः स्वजातिदोषवशाद् अस्याः दारकस्य विरुद्धम् आचरिष्यति इति। उक्तं च-

कुपुत्रोऽपि भवेत् पुंसां हृदयानन्दकारकः।
दुर्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः॥ पञ्च. ५.१८॥
एवं च भाषते लोकश्चंदनं किल शीतलम्।
पुत्रगात्रस्य संस्पर्शश्चंदनाद् अतिरिच्यते॥ पञ्च. ५.१९॥
सौहृदस्य न वाञ्छंति जनकस्य हितस्य च।
लोकाः प्रपालकस्यापि यथा पुत्रस्य बंधनम्॥ पञ्च. ५.२०॥

अथ सा कदाचिच्छय्यायां पुत्रं शाययित्वा जलकुम्भम् आदाय पतिम् उवाच- ब्राह्मण, जलार्थम् अहं तडागे यास्यामि। त्वया पुत्रोऽयं नकुलाद् रक्षणीयः। अथ तस्यां गतायां, पृष्ठे ब्राह्मणोऽपि भिक्षार्थं क्वचित् निर्गतः। अत्रान्तरे दैववशात् कृष्णसर्पः विलान्निष्क्रान्तः। नकुलोऽपि तं स्वभाववैरिणं मत्वा भ्रातुः रक्षणार्थं सर्पेण सह युद्ध्वा, सर्पं खण्डशः कृतवान्। ततः सो रुधिराप्लावितवदनः सानन्दं स्वव्यापारप्रकाशनार्थं मातुः सम्मुखं गतः। माताऽपि तस्य रुधिरक्लिन्नमुखम् आलोक्य शंकित-चित्ता नूनम् 'अनेन दुरात्मना मे दारको भक्षितः' इति निश्चिंत्य कोपात् तस्योपरि तं जलकुम्भं चिक्षेप। एवं सा नकुलं व्यापाद्य यावत् प्रलपंती गृहम् आगच्छति, तावत् सुतः तथैव सुप्तस् तिष्ठति। पार्श्वे कृष्ण-सर्पः खंडशः कृतमिति अवलोक्य पुत्रवधशोकेनात्मशिरो वक्षःस्थलं च ताडितुम् आरब्धा। अत्रांतरे ब्राह्मणो यदा गृहमागत्य पश्यति तदा पुत्रशोकोऽभितप्ता ब्राह्मणी प्रलपति-भो भो लोभात्मन्! लोभाभिभूतेन त्वया न कृतं मद्वचः। तद् अनुभव साम्प्रतं पुत्र-मृत्यु-दुःख-वृक्ष-फलम्। अथवा साधुम् इदम् उच्यते-

अतिलोभो न कर्तव्यः कर्तव्यस्तु प्रमाणतः।
अतिलोभजदोषेण जम्बुको निधनं गतः॥ पञ्च. ५.२१॥

१. हितोपदेशः — प्राचीनभारतीय-उपदेशमूलकसाहित्ये हितोपदेशः इति ग्रन्थः विशेषं स्थानम् अधिकरोति। गल्पसाहित्यस्य विभाजनं प्रकारद्वयेन विधीयते। तद्यथा — मनुष्यचरित्रमाश्रित्य विरचितः नीतिमूलकः ग्रन्थः यथा गुणाढ्यस्य बृहत्कथा, सोमदेवस्य कथासरित्सागरः च। पुनः पशुपक्षिणोः चरित्रमाश्रित्य विरचितः उपदेशमूलकग्रन्थः। यथा पञ्चतन्त्रम्, हितोपदेशः चेत्यादयः। अतिप्राचीनकालादेव भारतवर्षे विविधश्रेण्याः कथा आख्यानानि उपाख्यानानि विनिर्मातानि सन्ति। प्राचीना आलङ्कारिकाः लोककथानां तथा नीतिगर्भकथानाम् अथवा उपदेशमूलककथानां मध्ये पार्थक्यं न प्रदर्शयन्ति। परन्तु उभयोः प्रकारयोः तुलनात्मकाध्ययनेन कानिचन पृथकत्वसूचकानि वैशिष्ट्यानि परिलक्ष्यन्ते। उभयो

आकृति-प्रकृति-विषयवस्तु-उद्देश्यानि भिन्नानि वर्तन्ते। पाठकानां मनोरञ्जनं लोककथानां परमम् उद्देश्यं वर्तते। परन्तु उपदेशमूलककथानां परमं उद्देश्यमस्ति सदाचार-नीति-राजनीतिविषयकपाठदानम्। पाठकानां मनोरञ्जनम् उपदेशमूलककथानां गौणम् उद्देश्यं वर्तते। पुनः लोककथा सरलगद्य-वर्णनात्मकश्लोकादिभिः मिश्रिता वर्तते। परन्तु उपदेशमूलककथाः नीतिसूत्रसम्मतश्लोकसमन्विताः वर्तन्ते। लोककथासु प्रायेण अन्धविश्वास-जनप्रिय-आख्यान-प्रेमकथा-दुःसाहसिकाभियान-स्वप्नदर्शन-आकाशवाणी-चेत्यादीनां वर्णनं प्राप्यते। तथा उपदेशमूलककथासु मानवीयभावानाम् अभिव्यक्तिः तथा पशुपक्षीणाम् अभिज्ञनीतिविदाम् चरित्राणाम् अभिनयेषु अवतरणं परिलक्ष्यते।

हितोपदेश इति ग्रन्थस्य प्रारम्भे अर्थात् कथामुखे विविधाः नीतिशिक्षामूलकाः श्लोकास्सन्ति। विद्यासम्पर्के उल्लिख्यते यत् विद्या कदापि न नश्यते। सर्वद्रव्येषु विद्या उत्तमा वर्तते। यथोक्तं तत्र-

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।
अहार्यत्वादनर्घत्वाच्च सर्वदा।।

पुनः उच्यते यत् विद्या नरं विनयत्वं प्रददाति। विनयी पुरुषः सज्जनः भवति। यथोच्यते -

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम्।।

सर्वसुखानां प्रधानं साधनमस्ति विद्या। विद्याहीनपुरुषं पशुना सह तुल्यते। यः पुत्रः विद्वान् न भवति तादृशानां पुत्राणां जन्म निरर्थको भवति इति उल्लेखः समुपलभ्यते। गुणीपुत्र एक अपि श्रेयः शतमूर्खपुत्राणाम् अपेक्षया। हितोपदेशे मनुष्याणां षड्विधानां सुखानां वर्णनं विधीयते। तद्यथा - नित्यं धनस्यागमनम् , निरोगः, मधुरभाषिनी स्त्री, आज्ञाकारी पुत्रः, अर्थपूर्णा विद्या च। पञ्चतन्त्रस्य अनन्तरं वङ्गदेशस्य राज्ञः धवलचन्द्रस्य राजसभायाः कविः नारायणपण्डितः हितोपदेश इति ग्रन्थं विनिर्माति। हितोपदेशस्य मूलाधारो वर्तते पञ्चतन्त्रग्रन्थः। हितोपदेशे चत्वारः खण्डा सन्ति। तद्यथा — मित्रलाभः, सुहृदभेदः, विग्रहः सन्धिश्चेति। यथोच्यते तत्रैव —

मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च।
पञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते।।

अत्र सन्निविष्टाः श्लोका उपदेशात्मकाः शिक्षाप्रदाश्च सन्ति। ग्रन्थकारः प्रास्ताविकायां कथाछलेन बालकान् नीतिशिक्षां प्रदातुं वाक्कातुर्यं च पाठयितुं हितोपदेशं विरचयति इति स्वयमेव उद्घोषयति। यथा —

यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्।
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते॥

हितोपदेशस्य मित्रलाभ इति प्रथमभागान्तर्गताया एकस्याः लघुकथाया अत्र समावेशः क्रियते —

प्रथमः कथासंग्रहः [मित्रलाभः]

अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण सः पंडितोऽब्रवीत् - भो राजपुत्राः शृणुत-

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा।। १.१ ॥

तद् भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयिष्यामि। राजपुत्रै उक्तम्-आर्य! कथ्यताम्। विष्णुशर्मा उवाच शृणुत, यूयं संप्रति मित्रलाभः प्रस्तूयते, यस्यायम् आद्यः श्लोकः --

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।
साधयन्त्याशु कार्याणि काककूर्ममृगाऽखुवत् ॥ १.२ ॥

राजपुत्रा ऊचुः-कथम् एतत्? सोऽब्रवीत्-अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशाद् आगत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चंद्रमसि, लघुपतनकनामा वायसः प्रबुद्धः कृतान्तम् इव द्वितीयमटन्तं व्याधम् अपश्यत्। तम् आलोक्य अचिन्तयत्-अद्य प्रात एव अनिष्टदर्शनं जातम्, न जाने किम् अनभिमतं दर्शयिष्यति, इति उक्त्वा तद् अनुसरणक्रमेण व्याकुलः चलितः। यतः-

शोकस्थानसहस्राणि भयस्थानशतानि च।
दिवसे दिवसे मूढमाविशन्ति न पंडितम् ॥ १.३ ॥


अन्यच्च विषयिणामिदमवश्यं कर्त्तव्यम्।
उत्थायोत्थाय बोद्धव्यं किम् अद्य सुकृतं कृतम्।
आयुषः खंडम् आदाय रविः अस्तं गमिष्यति।। १.४ ॥

अथ तेन व्याधेन तंडुलकणान् विकीर्य जालं विस्तीर्णम्। स च तत्र प्रच्छन्नो भूत्वा स्थितः। अस्मिन् एव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तंडुलकणान् अवलोकयामास। ततः कपोतराजः तंडुलकणलुब्धान् कपोतान् प्राह-कुतोऽत्र निर्जने वने तंडुलकणानां सम्भवः? तन्निरूप्यतां तावत्, भद्रम् इदं न पश्यामि। प्रायेणानेन तंडुलकणलोभेनास्माभि अपि तथा भवितव्यम्।

कंकणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संम्मृतो यथा॥१.५॥

गुणाढ्यस्य बृहत्कथा — बृहत्कथायाः रचकस्य गुणाढ्यस्य आविर्भावसम्बन्धे पण्डितानां मध्ये वैमत्यं परिलक्ष्यते। नवमशतिकायाः कम्बोदियालिप्यां प्राप्तानुसारं गुणाढ्यस्य कालः षष्ठशताब्दी इति ज्ञातुं शक्यते। कथासरित्सागरग्रन्थात् ज्ञायते यत्

गुणाढ्यस्य पूर्वनाम आसीत् माल्यवान् इति। सुबन्धु-बाण-दण्डी-हर्ष-त्रिविक्रमभट्ट-धनञ्जय-सोमदेव-गोवर्धनाचार्यप्रभृतयः कवयः नाट्यकाराश्च बृहत्कथायाः कथानकांशात् मूलकथां संगृह्णन्ति। गुणाढ्यस्य बृहत्कथाम् अवलम्ब्य परवर्तीकाले त्रयो ग्रन्थाः विरचिताः जाताः। तेषु बुद्धस्वामिनः बृहत्कथा-श्लोकसंग्रहः प्रधानः वर्तते। ग्रन्थोऽयं नेपालदेशे विरचितः। असमाप्तावस्थायां २८ सर्गाः, ४५३९ श्लोकाः च प्राप्यन्ते। अत्र बृहत्कथायाः सारः पद्ये समुद्धृतः। समुपलब्धेन अंशेन अनुमीयते यदत्र न्यूनतममपि पञ्चविंशतिसहस्रश्लोका आसन्निति। तदनन्तरं क्षेमेन्द्रविरचिता बृहत्कथामञ्जरी अपि प्रसिद्धा वर्तते। बृहत्कथायाः श्लोकसङ्ग्रहापेक्षया अत्र काश्चिन्नवीना अपि कथाः संयोजिताः परिलक्ष्यन्ते। ग्रन्थोऽयं नितान्तसंक्षिप्तत्वेन दुर्बोधो लक्ष्यते। तदनन्तरं सोमदेवेन कथासरित्सागरः विरचितः। तत्र १८ लम्बकाः, १२४ तरङ्गाः, २४००० श्लोकाश्च सन्ति। सोमदेवस्य कथासरित्सागरे दीर्घाः समासाः कठिनानि पदानि च न्यूनानि एव । अतः कथासु सरलता दृश्यते। बृहत्कथामञ्जर्याम् अदृश्यमानाः बह्व्यः बृहत्कथाग्रन्थस्थाः कथाः कथासरित्सागरे दृश्यन्ते। कथासरित्सागरे स्थिताः कथाः काश्चन लघ्व्यः, पुनः काश्चन दीर्घाः। विविधजनसम्बद्धाः विभिन्नदेशसम्बद्धाः च कथाः भवन्ति अत्र। कथानिरूपणे सोमदेवस्य अनुपमं सामर्थ्यम्। कथासरित्सागरः विविधाभिः भाषाभिः अनूदितोऽपि वर्तते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: पञ्चतन्त्रे कति भागाः सन्ति ?

.....

प्रश्नः २: हितोपदेशस्य रचकः कः ?

.....

प्रश्नः ३: हितोपदेशे कति भागाः सन्ति ?

.....

प्रश्नः ४: बृहत्कथा कस्यां भाषायां विरचिता ?

.....

प्रश्नः ५: शुकसप्ततेः रचकः कः ?

.....

प्रश्नः ६: बृहत्कथायाः रचकः कः ?

.....

३. वेतालपञ्चविंशतिः— वेतालपञ्चविंशतिः इति ग्रन्थस्य नाम्ना एव ज्ञायते यत् अत्र पञ्चविंशतिसंख्यकाः कथाः सन्ति। अत्र प्रश्नकर्ता अस्ति वेतालः, उत्तरदाता अस्ति

विक्रमसेनः विक्रमादित्यः वा। अत्र समाविष्टाः कथाः कौतुहलपूर्णा सरसा सरलाश्च वर्तन्ते।

४. शुकसप्ततिः — चिन्तामणिभट्टनाम्न एकेन ब्राह्मणपण्डितेन सप्ततिसंख्यककथानां संकलनं कृत्वा 'शुकसप्ततिः' इति ग्रन्थः विरचितः। ग्रन्थोऽयं शाखाद्वये विभक्तो वर्तते। तासु एका शाखा चिन्तामणि इत्याख्येन ब्राह्मणेन विरचिता, अपरा च शाखा श्वेतम्बर इत्याख्येन जैनविदुषा प्रणीता। कथाग्रन्थोऽयम् अतीव मनोरञ्जको वर्तते। मध्ये मध्ये उपदेशपरैः वर्णनपरैश्च पद्यैः गथितमस्य गद्यं सरलं वर्तते। क्वचित् मध्ये प्राकृतपद्यमपि परिलक्ष्यते।

५. सिंहासनद्वात्रिंशिका — सिंहासनद्वात्रिंशिकाग्रन्थस्य रचकः कश्चित् जैनपण्डित अस्ति। ग्रन्थेऽस्मिन् विक्रमादित्यराज्ञो गुणानुकीर्तनाय द्वात्रिंशत्कथानां संकलनं क्रियते। महाराजविक्रमादित्यस्य एकं सिंहासनम् आसीत् यस्मात् उत्कीर्णाभिः पुत्तलिकाभिः वर्णिताः कथा अत्रोपनिबद्धा। तत्सिंहासनमिन्द्रेण विक्रमादित्याय दत्तमासीत्। विक्रमादित्ये दिवङ्गते सति भोजराजेन भूसाद्भूतं तत्सिंहासनम् अलभ्यत। तत्सिंहासनम् आरोढुम् इच्छन्तं भोजराजं तत्र उत्कीर्णा पुत्तलिकास्ताः स्वसमानसंख्याः कथाः कथायामासुः। अस्य कथाग्रन्थस्य बहूनि रूपाणि प्राप्यन्ते -एकं वर्णनात्मकपद्यप्रचुरं गद्यमयम्, अपरम् औपदेशिकपद्यैः पूर्णं पद्यमयम्, अन्यच्च केवलं पद्यबद्धकथामयम्। आधुनिकभाषासु अनुवाददर्शनेनास्य ग्रन्थस्य लोकप्रियत्वं प्रतीयते। वेतालपञ्चविंशतिकातः पश्चात्कालिक अयं ग्रन्थः। एतस्य कर्त्ता निर्माणकालश्च निश्चेतुमशक्य एव।

६. भोजप्रबन्धः — भोजप्रबन्धः वल्लासेनेन विरचितः। धाराराज्यस्य राज्ञः भोजस्य सरलसरसकथासंग्रह एव भोजप्रबन्धः। अस्मिन् ग्रन्थे भोजराज्ञः राजसभायाः पण्डितः कविकालिदासः भवभूतिः, दण्डी , बाणभट्टः , मयूरः, माघः चेत्यादीनां कवीनां गुणवर्णनं प्राप्यते। बल्लालकविना विरचितो भोजप्रबन्धोऽपि अन्यतमो वर्तते। कोऽसौ बल्लालकवि इति विषये पण्डितानां मध्ये वैमत्यं परिलक्ष्यते। केचित् तं बङ्गराजं बल्लालसेनं मन्यन्ते किन्तु कथनमिदं न युक्तियुक्तं प्रतिभाति। सति तथा आनन्दकविना बल्लालचरिते अस्य उल्लेखः कृतो भवेत्। अपरञ्च, बल्लालसेनप्रणीते अद्भुतसागरेऽपि अस्य उल्लेखो भवेत्। किन्तु नास्ति तथा। केचित् अमुं द्वारसमुद्रस्य राजा तृतीयबल्लाल इति मन्यन्ते, परन्तु तदपि युक्तं न प्रतिभाति, यतो हि भोजप्रबन्धे —

कलकण्ठं यथा शौभा सहकारे भवेगिरः।।
खदिरे वा पलाशे वा कि तथा स्याद्विचारय।।

७. पुरुषपरीक्षा— मैथिलीकविः विद्यापतिः पुरुषपरीक्षा इति ग्रन्थं विरचयति। ग्रन्थोऽयं चतुर्षु परिच्छेदेषु विभक्तो वर्तते। अस्य ग्रन्थस्य भाषा अतीव सरला वर्तते।

वर्णनमपि रसपूर्णं भवति। बौद्धकथासाहित्ये विभिन्ना उपदेशात्मकाः ग्रन्थाः वर्तन्ते।

८. अवदानशतकम्—बौद्धसम्प्रदायानुसारिणि ग्रन्थेऽस्मिन् शतमिता प्राचीनकथाः समुपस्थापिताः सन्ति। ग्रन्थोऽयं वीरगाथानां सङ्कलनम्। ग्रन्थस्यास्य प्रणेता नाद्यापि परिचितः। अत्र हि १०७ सङ्ख्यककथाः सन्ति। ख्रीष्टतृतीयशताब्द्याः पूर्वार्धभागे ग्रन्थस्यास्य चीनभाषायाम् अनुवादो जातः तेन प्रथमा द्वितीया वा ख्रीष्टशताब्दी ग्रन्थस्यास्य रचनाकालो निर्धारयितुं शक्यते। ख्रीष्टशताब्दीपूर्वकालात् ग्रन्थोऽयं विरचितो न जातः, यतो हि अत्र दीनार इति कश्चनशब्दप्रयोगः प्राप्यते। नहि ततो बहुपूर्वकाले दीनारशब्दः प्रचिलित आसीत्। दशकाव्येषु खण्डेषु विभज्यमानस्य अस्य ग्रन्थस्य विनयपिटकाधारिता प्रतीता। अत्र साहित्यिकगौरवं स्वल्पमात्रम्, अधिकं शिक्षादापकत्वमेव लक्ष्यम्। ऐतिहासिककथानामपि निवेशोऽत्र विद्यते, यथा बिम्बसारस्य पत्नी श्रीमति बुद्धशेषास्थि पूजापरायणा तत्पूजानिषेधिकाया अजातशत्रो आज्ञाया उल्लङ्घनेन राजादेशात्रिहतो भूत्वा स्वर्गं गता इति।

९. जातकमाला —जातकमाला विक्रमानन्तरं ४०० मिताब्दमभित आर्यशुराख्येन विदुषो जातकमाला प्रणीताऽस्ति, यत्र हि बोधिसत्त्वसम्बद्धाः षट्त्रिंशत्कथाः सङ्ग्रहिताः सन्ति। अस्यापि ४९१ मित वैक्रमाब्दे चीनीभाषायां रूपान्तरणं सञ्जातम्। ग्रन्थोऽयं गद्यपद्योभयात्मकः काव्यमयश्च। जातकमालाशब्देन बोधिसत्त्वानां पूर्वजन्मकथासंग्रहो बुध्यते। पालीग्रन्था अस्या जातकमालाया आधारभूताः। शैली चात्राश्वघोषकाव्यानुकारिणी। अत्र प्राचीनेतिहासो नास्ति। बौद्धमतस्य सर्वविधाः सिध्दान्ता अत्रोपनिबध्दाः। गद्यानि पद्यानि चात्र चमत्कारीणि।

१०. सूत्रालङ्कारः- जातकानामवदानानाञ्च सङ्ग्रहरूपेण, गद्यपद्योभयात्मकः सूत्रालङ्कारसंज्ञको ग्रन्थः प्रणीतो दृश्यते। अयमेव कल्पनामण्डितमित्यप्युच्यते। अस्य हि प्रणेता कुमारलातो इति मतः।

११. उपमितिभावप्रपञ्चमाला—लोककथारूपेण भावानां पात्रीकरणद्वारकप्रतीककथारूपेण चात्र मनुष्यजीवनं व्याख्यातम्। प्रतीकात्मकसंस्कृतभाषा बौद्धसाहित्ये सर्वप्रथमसृष्टतयाऽस्याः महत् मूल्यं वर्तते। अयं ग्रन्थः सिध्दर्षिणा ९०६ तमे ख्रीष्टाब्दे प्रणीतः। भूमिकान्ते ग्रन्थकृता स्वयं विवृततयाऽत्रत्यं रूपकं सुबोधमजनि। साहित्यिकदृष्ट्या नेदं तथा मनोरञ्जकं वर्तते यथोपदेशदृष्ट्या।

१०.३ अध्यायस्य असमीयाभाषायां सारांशः

আখ্যান সাহিত্য হ'ল এখন দেশৰ বা এটা জাতিৰ সংবাহক। আসমন্তাত্ আখ্যায়তে ইতি আখ্যানম্ - এয়া হ'ল আখ্যান শব্দৰ ব্যুৎপত্তি। অর্থাৎ জগতত যি কথা বা কহিনীৰ প্রচলিত হৈ আহিছে তাকে আখ্যান বুলি কোৱা হয় । অন্যান্য শাখাসমূহৰ দৰে আখ্যান সাহিত্যৰ শাখাসমূহো

বিকশিত আৰু সমৃদ্ধ হৈ আছে। আখ্যান সাহিত্য দুটা ভাগত বিভক্ত কৰা হৈছে। যেনে — নীতিকথা আৰু লোককথা। সৎ উপদেশৰ মাধ্যমেৰে জনসমাজক সৎ কার্যত প্রবৃত্ত কৰোৱা আৰু অসৎ কার্যত নিবৃত্ত কৰোৱা হ'ল নীতিকথাৰ মূল লক্ষ্য। নীতিকথাৰ উদ্দেশ্য হৈছে ৰোচক আখ্যানৰ মাধ্যমেৰে পুৰুষার্থ সাধনৰ উপায় সমূহৰ বিষয়ে অৱগত কৰোৱা। তথা লোককথাৰ উদ্দেশ্য হৈছে পাঠকসকলক মনোৰঞ্জন কৰা।

আখ্যানসমূহৰ প্রাচীনতাৰ বিষয়ে যদিও স্পষ্টকৈ উল্লেখ দেখা পোৱা নাযায় তথাপি এয়া নিশ্চিত যে আখ্যান সাহিত্য কাৱ্যসাহিত্যতকৈ প্রাচীন। যিহেতুকে ঋগ্বেদত তথা অন্য বেদসমূহত কথাৰ নিদর্শন পোৱা যায় ঋগ্বেদৰ দশম মণ্ডলৰ 108 তম সূক্তত সৰমা আৰু পণিসমূহৰ সংবাদ পোৱা যায়।

জগতত আটাইতকৈ প্রাচীন সাহিত্য হ'ল বৈদিক সাহিত্য। ঋগ্বেদ আদি বেদ সমূহতো প্রাচীন আখ্যানসমূহৰ নিদর্শন পোৱা যায়। ঋগ্বেদৰ যম যমী সংবাদসূক্ত, পুৰূৰবা উর্বশী সংবাদ সূক্ত, সৰমা পণি সংবাদ সূক্ত, বিশ্বামিত্র নদী সংবাদ সূক্ত ইত্যাদি সূক্তসমূহত বর্ণিত আখ্যানসমূহ প্রসিদ্ধি প্রাপ্ত। তেনেদৰে ব্রাহ্মণ সাহিত্যসমূহতো বিভিন্ন কথা আখ্যানৰঞ্জ সন্নিৱেশ দেখা পোৱা যায়। শতপথ ব্রাহ্মণত মনুমৎস্য কথা প্রসিদ্ধ লোককথাৰূপত আজিও প্রচলিত হৈ আছে । পৰবর্তী কালত য়াস্ক আচার্য্যৰ নিৰুক্তগ্রন্থ , শৌনকমুনিকৃত বৃহদ্দেৱতা তথা মুনি পতঞ্জলিৰ দ্বাৰা বিৰচিত মহাভাষ্য ইত্যাদি গ্রন্থসমূহত বিভিন্ন আখ্যানৰ প্রভাৱ দেখা পোৱা যায় । ৰামায়ণ মহাভাৰত আৰু অষ্টাদশ পুৰাণতো আখ্যানসমূহৰ প্রাচুর্য্য দেখিবলৈ পোৱা যায় । ৰামায়ণ মহাভাৰত আদি প্রাচীন মহাকাব্যসমূহত ৰাম ৰাৱণৰ, পাণ্ডৱ আৰু কৌৰৱৰ যি কথা বর্ণনা কৰা আছে, সেয়া আজিও বিভিন্ন দৃশ্য শ্রব্য কাব্যৰ মাধ্যমেৰে প্রচলিত হৈ আছে। বিশেষকৈ মহাভাৰতত আখ্যানৰ আধিক্য দেখিবলৈ পোৱা যায়। এই আখ্যান বা কথাসমূহৰ দ্বাৰা জনসমাজত সামাজিক ৰাজনৈতিক সাংস্কৃতিক আৰু নৈতিক ইত্যাদি দিশসমূহৰ উৎকর্ষ সাধন হয়।

অতি প্রাচীন কালৰে পৰা ভাৰতবর্ষত বিভিন্ন শ্রেণীৰ কথা সাহিত্য, আখ্যান, উপাখ্যান নির্মাণ কৰা হৈ আহিছে। প্রাচীন আলংকাৰিকসকলে লোককথা আৰু নীতিকথাৰ অথবা উপদেশমূলক কথাৰ মাজত কোনোধৰণৰ স্পষ্ট পার্থক্য নিৰূপণ কৰা নাই । তথাপি তুলনাত্মক অধ্যয়নৰ দ্বাৰা দুয়োটা প্রকাৰৰ কিছুমান পার্থক্য দৃষ্টিগোচৰ হয়। এই দুই প্রকাৰৰ কথাৰ আকৃতি, প্রকৃতি বিষয়বস্তু, উদ্দেশ্য ইত্যাদি ভিন্ন প্রকাৰৰ হয়। পাঠকসকলৰ কাৰণে মনোৰঞ্জন প্রদান কৰা লোককথাৰ মূল উদ্দেশ্য। তথা উপদেশমূলক কথাৰ প্রধান উদ্দেশ্য হৈছে সদাচাৰ নীতি ৰাজনীতি ইত্যাদি বিষয়বোৰৰ ওপৰত যথার্থ শিক্ষা প্রদান কৰা। পাঠকসকলক মনোৰঞ্জন প্রদান কৰা উপদেশমূলক কথাৰ গৌণ উদ্দেশ্য। তেনেদৰে লোককথাত সহজ সৰল গদ্য তথা বর্ণনাত্মক শ্লোকত সন্নিৱিষ্ট কৰা হয়। কিন্তু উপদেশমূলক কথাত নীতিসূত্রসম্মত শ্লোক সন্নিৱিষ্ট কৰা হয়। লোককথাত প্রায় অন্ধবিশ্বাস, জনপ্রিয় আখ্যান, প্রেমকথা, দুঃসাহসিক অভিযান আকাশবাণী, স্বপ্ন দর্শন ইত্যাদিৰ সংযোজন কৰা হয় তথা উপদেশমূলক কথাত মানৱীয় ভাৱ অনুভাৱৰ অভিব্যক্তি তথা পশু পক্ষীৰ চৰিত্রৰ সংযোজন কৰা দেখা যায় ।

1] পঞ্চতন্ত্রম্ - নীতিমূলক শাস্ত্রসমূহৰ ভিতৰত উপদেশমূলকশাস্ত্রসমূহৰ ভিতৰত পঞ্চতন্ত্র অতি পুৰণি আৰু প্রসিদ্ধ গ্রন্থ । এইখন গ্রন্থৰ চাৰিটা সংস্কৰণ পোৱা যায়। প্রথম সংস্কৰণ বর্তমান অনুপলব্ধ। দ্বিতীয় সংস্কৰণ গুণাঢ্যৰ বৃহৎকথাত সন্নিৱিষ্ট কৰা হৈছে । বৃহৎ কথা পৈশাচী ভাষাত ৰচিত হৈছে । এইটো সংস্কৰণো বর্তমান পোৱা নাযায় । তৃতীয় সংস্কৰণটো হ'ল তন্ত্রাখ্যায়িকা। বর্তমান সময়ত প্রচলিত পঞ্চতন্ত্র এইটো সংস্কৰণৰেই আধুনিক সংস্কৰণ। ইংৰাজী পণ্ডিত হার্টেলৰ মতে পঞ্চতন্ত্র গ্রন্থৰ ৰচনাকাল হ'ল দ্বিতীয় শতাব্দী। পঞ্চতন্ত্র গ্রন্থক পাঁচটা তন্ত্রত বিভক্ত কৰা হৈছে। যেনে - মিত্রভেদ, মিত্রসংপ্রাপ্তি, কাকোলূকীয়, লব্ধপ্রণাশ আৰু অপৰীক্ষিতকাৰক। মহিলাৰোপ্য নগৰৰ ৰজা অমৰ শক্তিৰ চাৰিজন পুত্রক পণ্ডিত বিষ্ণুৰাম শর্মাই দিয়া ৰাজনীতিৰ শিক্ষাই 'পঞ্চতন্ত্র' বুলি কথামুখত উল্লেখ আছে যদিও ই কাল্পনিক। ৰাজনীতিৰ লগতে ইয়াত অর্থশাস্ত্র আৰু নীতিশাস্ত্রৰ উদ্ধৃতিও আছে। পঞ্চতন্ত্রৰ ৰচনা-শৈলী আৰু কাহিনীৰ বয়ন অভিনৱ। আনকি আৰবৰ 'এহেজাৰ এনিশাৰ সাধু', য়ুৰোপৰ 'ডেকামেৰান', 'কেণ্টাৰবাৰী টেলচ' আদিতো ইয়াৰ ৰচনা পদ্ধতি অনুকৰণ কৰা দেখা যায়। অসম প্রকাশন পৰিষদৰ দ্বাৰা প্রকাশিত 'পঞ্চতন্ত্র' অনুবাদ কৰিছে প্রভাত চন্দ্র শর্মাই।

2] হিতোপদেশ- পঞ্চতন্ত্রৰ পিছত বংগদেশৰ ৰজা ধৱলচন্দ্রৰ ৰাজসভাৰ কবি নাৰায়ণপণ্ডিতে হিতোপদেশ নামৰ গ্রন্থ ৰচনা কৰিছে। হিতোপদেশৰ মূল আধাৰ হ'ল পঞ্চতন্ত্র। হিতোপদেশ গ্রন্থখন চাৰিটা খণ্ডত বিভক্ত কৰা হৈছে। যেনে - মিত্রলাভ, সুহৃদভেদ, বিগ্রহ আৰু সন্ধি। এই চাৰিটা ভেদৰ কথা তাত এনেদৰে কোৱা আছে -

মিত্রলাভ: সুহৃদ্ভেদো বিগ্রহ: সন্ধিৰেব চ।
পঞ্চতন্ত্রাত্তথান্যস্মাদ্ গ্রন্থাদাকৃষ্য লিখ্যতে।।

ইয়াত সন্নিৱিষ্ট শ্লোকসমূহ উপদেশমূলক আৰু শিক্ষাপ্রদ হয়। গ্রন্থাকাৰে প্রস্তাৱনাত কথাৰ ছলেৰে বালকসকলক নীতিমূলক শিক্ষা প্রদান কৰাৰ কাৰণে তথা তেওঁলোকক বাকপটুতাত সমৃদ্ধ কৰিবলৈ হিতোপদেশ গ্রন্থখন ৰচনা কৰিছিল বুলি নিজেই এনেদৰে উল্লেখ কৰিছে -

যন্নবে ভাজনে লগ্ন: সংস্কাৰো নান্যথা ভবেৎ।
কথাচ্ছলেন বালানাং নীতিস্তজিহ কথ্যতে।।

3] গুণাঢ্যৰ বৃহৎকথা - বৃহৎকথাৰ ৰচক গুণাঢ্যৰ আবির্ভাৱ সম্পর্কে পণ্ডিতসকলৰ মাজত মতভেদ দেখিবলৈ পোৱা যায়। নৱম শতিকাৰ কম্বোদিয়া লিপিত প্রাপ্ত অনুসৰি গুণাঢ্যৰ কাল ষষ্ঠ শতাব্দী বুলি অনুমান কৰিব পৰা যায়। কথাসৰিৎসাগৰ নামৰ গ্রন্থৰ পৰা জানিৱ পৰা যায় যে গুণাঢ্যৰ প্রাচীন নাম হ'ল মাল্যবান। সুবন্ধু , বাণভট্ট, দণ্ডী , হর্ষ , ত্রিবিক্রমভট্ট, ধনঞ্জয়, সোমদেৱ, গোবর্ধন আচার্যকে আদি অৰি বহুতো কবি আৰু নাট্যকাৰে বৃহৎ কথাৰ কথানক অংশৰ পৰা মূলকথাসমূহ সংগ্রহ কৰিছিল। গুণাঢ্যৰ বৃহৎ কথাক অৱলম্বন কৰি পৰৱর্তী কালত তিনিখন গ্রন্থ ৰচনা কৰা হৈছিল। তাৰ ভিতৰত বুদ্ধস্বামীৰ বৃহৎ কথা-

শ্লোকসংগ্রহ অন্যতম আছিল। এই গ্রন্থখন নেপাল দেশত ৰচনা কৰা হৈছিল । এই গ্রন্থখনত অসমাপ্ত অবস্থাত 28 টা সর্গ, 4539 শ্লোক পোৱা যায়। দ্বিতীয়তে ক্ষেমেন্দ্রৰ দ্বাৰা বিৰচিত বৃহৎ কথামঞ্জৰী প্রসিদ্ধ গ্রন্থ হয়। তাৰ পিছত সোমদেৱৰ দ্বাৰা বিৰচিত কথা সৰিৎসাগৰ আন এক অন্যতম গ্রন্থৰ উল্লেখ পোৱা যায়। ইয়াত 18 টা লম্বক, 124 টা তৰংগ তথা 24000 শ্লোক আছে।



१०.४ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- निखिलसंस्कृतसाहित्ये प्रसिद्धस्य आख्यानसाहित्यस्य परिचयं वयं प्राप्नुमः।
- आख्यानसाहित्यस्य उत्सः कः तत् वयं जानीमः।
- आख्यानसाहित्यस्य प्रकाराणां विवरणं वयं प्राप्नुमः।
- आख्यानसाहित्यस्य विविधानि लक्षणानि वयं जानीमः।



१०.५ ज्ञानाधिक्यम्

१) Krishnamachariar, M, 'History of Classical Sanskrit Literature', New Delhi : MLBD.

२) শর্মা থানেশ্বৰ, ‘সংস্কৃত সাহিত্যৰ ইতিবৃত্ত’, গুৱাহাটী ঃ চন্দ্রপ্রকাশ ।

३) গোস্বামী, হৰমোহনদেৱ, ‘সংস্কৃত সাহিত্যৰ বুৰঞ্জী’, গুৱাহাটী ঃ পাণবজাৰ, বুকলেণ্ড।

४) ভাগৱতী, কামাখ্যাচৰণ, ‘সংস্কৃত সাহিত্যৰ জিলিঙনি’, গুৱাহাটী ঃ গ্রন্থপীঠ, পাণবজাৰ।



१०.६ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : पञ्चभागाः सन्ति।

प्रश्नः २ उत्तरम् : राज्ञः धवलसेनस्य रजसभाकविः नारायणपण्डितः।

प्रश्नः ३ उत्तरम् : चत्वारो भागाः सन्ति।

प्रश्नः ४ उत्तरम् : पैशाचीभाषायाम्।

प्रश्नः ५ उत्तरम् : चिन्तामणिः नामकः ब्राह्मणः।

प्रश्नः ६ उत्तरम् : गुणाढ्यः।



१०.७ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: आख्यानशब्दः कथं निष्पन्नो भवति ?

प्रश्नः २: आख्यानस्य लक्षणं किम् ?

प्रश्नः ३: वैदिकसाहित्ये कयोः ब्राह्मणयोः सर्वप्रथमम् आख्यानस्य उल्लेखः प्राप्यते ?

प्रश्नः ४: कस्य मतानुसारम् आख्यानं कथाख्यायिकयोः अन्तर्गतं वर्तते ?

प्रश्नः ५: आख्यानसाहित्यस्य कति भेदाः सन्ति ? के ते भेदाः ?

प्रश्नः ६: लोककथा नीतिकथा चेति अनयोः पार्थक्यं प्रदर्शयत।

प्रश्नः ७: पञ्चतन्त्रं केन विरचितम् ?

प्रश्नः ८: पञ्चतन्त्रे कति तन्त्राणि सन्ति ?

प्रश्नः ९: विष्णुशर्मा कस्य राज्ञः पुत्रान् अध्यापितवान् ?

प्रश्नः १०: हितोपदेशस्य रचकः कः ?

प्रश्नः ११: हितोपदेशे कति खण्डाः सन्ति ?

प्रश्नः १२: नारायणपण्डितः कस्य राज्ञः राजसभायाः कवि आसीत् ?

प्रश्नः १३: बृहत्कथा केन विरचिता ?

प्रश्नः १४: गुणाढ्यस्य कालः कः ?

प्रश्नः १५: बृहत्कथाश्लोकसंग्रहे कति सर्गाः, कति श्लोकाः च वर्तन्ते ?

प्रश्नः १६: बृहत्कथाश्लोकसंग्रहः केन विरचितः ?

प्रश्नः १७: सोमदेवेन विरचितः ग्रन्थः कः ?

प्रश्नः १८: कथासरित्सागरे कति लम्बकाः सन्ति ?

प्रश्नः १९: कथासरित्सागरे कति श्लोकाः वर्तन्ते ?

प्रश्नः २०: गुणाढ्यस्य प्राचीनं नाम किम् आसीत् ?

प्रश्नः २१: वेतालपञ्चविंशतिः केन विरचिता ?

प्रश्नः २२: शुकसप्ततिः ग्रन्थः केन विरचितः ?

प्रश्नः १३: शुकसप्ततिग्रन्थे कति शाखाः वर्तन्ते ?

प्रश्नः २४: सिंहासनद्वात्रिंशिकाग्रन्थे कतिसंख्यकानां कथानां संकलनं वर्तते ?

प्रश्नः २५: भोजः कस्य राज्यस्य राजा आसीत् ?

प्रश्नः २६: भोजप्रबन्धः केन विरचितः ?

प्रश्नः २७: पुरुषपरीक्षाग्रन्थस्य रचकः कः ?

प्रश्नः २८: अवदानशतके कति कथाः सन्ति ?

प्रश्नः २९: जातकमालायाः रचकः कः ?

प्रश्नः ३०: सुत्रालंकारस्य प्रणेता कः ?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

प्रश्नः १: जातकमाला

प्रश्नः २: वेतालपञ्चविंशतिः

प्रश्नः ३: शुकसप्ततिः

प्रश्नः ४: पञ्चतन्त्रम्

प्रश्नः ५: हितोपदेशः

प्रश्नः ६: गुणाढ्यः

प्रश्नः ७: विष्णुशर्मा

प्रश्नः ८: नारायणपण्डितः

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १: निखिलसंस्कृतसाहित्ये प्रसिद्धस्य आख्यानसाहित्यस्य परिचयं लिखत।

प्रश्नः २: आख्यानसाहित्यस्य उत्सः कः ? विश्लेषयत।

प्रश्नः ३: आख्यानसाहित्यस्य विविधप्रकाराणां संक्षिप्तविवरणं लिखत।

प्रश्नः ४: आख्यानसाहित्यस्य लक्षणं किम् ? विश्लेषयत।

*** ***** ***

अध्यायः ११ : शतककाव्यम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

११.१ उद्देश्यम्

११.२ परिचयः

११.३ शतककाव्यस्य लक्षणम्

- ११.३.१ शतककाव्यरचनाया उद्देश्यम्
- ११.३.२ शतककाव्यस्य उत्सः
- ११.३.३ नामकरणपद्धतिः
- ११.३.४ शतककाव्यस्य वैशिष्ट्यम्

११.४ शतककाव्यस्य भागः

११.५ भिन्नशतककाव्यानि

११.६ अध्यायस्य असमीयाभाषायां सारांशः

११.७ अध्यायात् किमवगतम्

११.८ ज्ञानाधिक्यम्

११.९ अग्रगत्याः निरूपणम्

११.१० अभ्यासप्रश्नाः

११.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- शतककाव्यस्य परिचयं ज्ञास्यन्ति।
- शतककाव्यस्य लक्षणं ज्ञास्यन्ति।
- शतककाव्यरचनाया उद्देश्यविषये ज्ञानं भविष्यन्ति।
- शतककाव्यस्य उत्सस्य तथा भागस्य ज्ञानं भविष्यन्ति।
- संस्कृतसाहित्यस्य भिन्नशतककाव्यैः सह परिचयं भविष्यन्ति।

११.२ परिचयः

संस्कृतसाहित्यम् अतिविशालं समृद्धञ्च विद्यते। शतककाव्यस्य स्थानं संस्कृतसाहित्ये अन्यतममस्ति। अत्र 'शतक' इति शब्दस्यार्थः शतम् (१००) इति। नामानुसारं शतककाव्ये शतसंख्यकाः श्लोकाः विद्यन्ते। श्लोकानां मध्ये गभीरार्थप्रकाशं भवति। शतककाव्यं गीतिकाव्यमिति वक्तुं शक्यते। शतककाव्ये अल्पपरिसरैव अधिकसारगर्भः तथा नीतियुक्तविषयाणां संकलनं वर्तन्ते। शतककाव्यं पद्यात्मकं भवति। आवेगानुभूतिपूर्णम्, संवेदनशीलम्, माधुर्यमयकाव्यं शतककाव्यमिति वक्तुं शक्यते। बाह्योपकरणात् मुक्तम्, स्वयं रसयुक्तं काव्यं मुक्तककाव्यमिति उच्यते। मुक्तकस्य

लक्षणम् आनन्दवर्धनेन एवमुक्तमस्ति- 'मुक्तकेषु हि प्रबन्धेषु इव रसवन्धाभिनिवेशिनः कवयो दृश्यन्ते'। शतककाव्ये श्लोकमाध्यमेन व्यवहारिकजीवनोपयोगी धर्म-अर्थ-काम-नीति-शृंगार-वैराग्यादि-सर्वेषां विषयाणां वर्णनं समुपलभ्यन्ते। एवम् उत्कण्ठापूर्णम् आवेगप्रवणञ्च काव्यमेव शतककाव्यमिति उच्यते। अस्मिन् अध्याये शतककाव्यविषयकम् आलोचनं भविष्यति। यथा- शतककाव्यस्य परिचयः, लक्षणम्, उत्सः, वैशिष्ट्यमित्यादयः।



ज्ञातव्यम्

आनन्दवर्धनः प्रसिद्धालंकारिकोऽस्ति। येन ध्वन्यालोकः नामकं प्रसिद्धग्रन्थं विरचितम्।

११.३ शतककाव्यस्य लक्षणम्

शतककाव्यं लघुकाव्यमिति उच्यते। शतककाव्यस्य लक्षणं स्पष्टरूपेण नोपलभ्यते। परन्तु अस्य 'उत्कण्ठाविरचितं पदं ज्ञेयं' इति लक्षणं निरूपितम्। वर्णीयविषयानुसारं शतककाव्यं मूलतः त्रिप्रकारकं भवति - शृङ्गारमूलकशतककाव्यम्,नीतिमूलकशतककाव्यम्, वैराग्यमूलकशतककाव्यञ्च। अत्र नीतिमूलकशतककाव्ये नीतियुक्तविषयाणां संकलनं विद्यन्ते। शृङ्गारमूलकशतककाव्यं शृङ्गारात्मकभावनापूर्णं भवति। पुनः वैराग्यमूलकशतककाव्ये जीवनस्य क्षणिकता, विषयभोगं प्रति आसक्तिशून्यता इत्यादिनां विषयाणां समाहारः परिदृश्यन्ते।




ज्ञातव्यम्

मुक्तककाव्यम्, शतककाव्यम्, खण्डकाव्यम्, स्तोत्रकाव्यम् इत्यादि लघुकाव्यस्यान्तर्गतो भवति।

११.३.१ शतककाव्यरचनाया उद्देश्यम्

संस्कृतसाहित्ये काव्यस्य प्रकारद्वयं प्राप्यते-दृश्यकाव्यम्, श्रव्यकाव्यञ्च। अत्र श्रव्यकाव्यं पुनः त्रिधा विभज्यते- गद्यपद्यमिश्रञ्च। शतककाव्यं पद्यकाव्यस्य अन्तर्गतमस्ति। शतककाव्यं गीतिधर्मी काव्यमस्ति। पद्यमाध्यमेन गुढभावस्य प्रकाशं कृत्वा पाठकं रसाभिभूतं करणमेव शतककाव्यरचनायाः मुख्योद्देश्यमस्ति। शतककाव्ये मधुरपद्यविन्यासः परिदृश्यते। मधुरपद्यविन्यासेन गीतमाध्यमेन विषयाणामुपस्थापनमपि शतककाव्यस्य उद्देश्यं वर्तते। लघ्वाकारेणैव मर्मयुक्तरचनां छन्दोबद्धरूपप्रदानमेव शतककाव्यस्य उद्देश्यं वर्तते।



११.३.२ शतककाव्यस्य उत्सः

शतककाव्यस्य प्रथमांकुरणं सर्वप्रथमे ऋग्वेदस्यान्तर्गते उषस्-सूक्ते सूर्यसूक्ते च परिदृश्यते। ऋग्वेदस्य अक्षसूक्ते(१०.३४), भिक्षुसूक्ते(१०.११७)तथा संज्ञानसूक्ते (१०.१९१) शतककाव्यस्य ध्वनिः श्रुयते। तथैव उपनिषद्साहित्येऽपि नीतिसमृद्धं तत्त्वं परिदृश्यते। कल्पसूत्रस्यान्तर्गतेषु धर्मसूत्रेषु, तदनन्तरयुगस्य स्मृतिग्रन्थेषु, पुरुषार्थचतुष्टयसाधनार्थं विहितानां धर्मनीति-समाजनीति-राजनीत्यादीनां, वैराग्यादिनां विषयाणां समाहाराः दृश्यन्ते। रामायण- महाभारत-पुराणादिष्वपि नीतिगर्भयुक्तस्य शतककाव्यस्य सम्भारोऽन्तर्निहितो वर्तते।

११.३.३ नामकरणपद्धतिः

संस्कृतसाहित्ये शतककाव्यनामकरणस्य बहव्य पद्धतयः विकसिताः सन्ति, यथा -

१. देवदेवतानां स्तुत्याधारेण नामकरणम् - दुर्गासप्तशती, बाणभट्टस्य चण्डिशतकम्, मयूरस्य सूर्यशतकम् आदि।
२. संस्कृते केषुचित् शतकेषु सामाजिकविषयान् लक्ष्यं कृत्वा नामकरणं कृतम्। यथा-विश्वेश्वरपाण्डेयस्य होलिका शतकम्, वरदकृष्णमाचार्यस्य विध्वस्तकमित्यादयः।
३. अधिकांश-मुक्तककाव्यानां मुख्यविषयः शृङ्गारैव, अतैव तेषु केषुचित् स्त्रियाः सौन्दर्याधारेण नामकरणं कृतम्। यथा- वरदकृष्णमाचार्यस्य कचशतकम्, विद्यासुन्दरकृतं रोमावलीशतकमित्यादयः।
४. केचन शतकलेखकाः छन्दासाम् आधारेणापि शतककाव्यानां नामकरणं कृतवन्तः, यथा विश्वेश्वरपाण्डेयस्य आर्यशतकम्, गोवर्धनाचार्यस्य आर्यसप्तशती।
५. केचन शतकलेखका उपर्युक्तं नामकरणपरम्परां त्यक्त्वा स्वनाम्ना एव काव्यस्य निर्माणं कृतवन्तः, यथा अमरुशतकम्, मयुरशतकम्, भल्लटशतकञ्च।

११.३.४ शतककाव्यस्य वैशिष्ट्यम्

शतककाव्यस्य वैशिष्ट्यानि यथा -

१. शतककाव्यस्य भाषा संस्कृतम्।
२. शतककाव्ये शतसंख्यकानां श्लोकानां समाहाराः सन्ति।
३. शतककाव्यं गीतिकाव्यमपि वक्तुं शक्यते।
४. शतककाव्यं पद्यात्मकं वर्तते।
५. शतककाव्ये माधुर्यमयरसविन्यासः परिदृश्यते।
६. शतककाव्यस्य श्लोकानां मध्ये व्यवहारिकजीवनोपयोगीनां धर्म-अर्थ-काम-नीति-शृंगार-वैराग्यादि सर्वेषां विषयाणां वर्णनं परिदृश्यन्ते।
७. शतककाव्यं लघुकाव्यमित्युच्यते।
८. शतककाव्यं मूलतः त्रिप्रकारकं भवति -शृंगारमूलकम्, नीतिमूलकम्, वैराग्यमूलञ्च।

११.४ शतककाव्यस्य भागः

शतककाव्यं सामान्यतया त्रिषु वर्गेषु विभक्तमस्ति -

१) शृङ्गारमूलकम्
२) नैतिकमूलकम्
३) वैराग्यमूलकञ्च

एतेषु शतकेषु विविधसंयोजनानि सन्ति। तेषु लोभ- मोह- साहसिक- अभिमानैः सह संयोजितजीवनस्य क्षणिकता, स्त्रिया आकर्षकचरित्रस्य रूपस्य वा प्रलोभनं प्रति सावधानता, आसक्तिहीनता, वैराग्यस्य महत्त्वं, सत्संगस्य लाभः,असत्संगस्य क्षतिः, शम-दमादीनां लाभः, विद्वांसः महत्त्वम्, ज्ञानस्य महत्त्वमित्यादयः शतककाव्यस्य विषयाः वर्णिताः विद्यन्ते। एतेषु काव्येषु अलङ्कारस्य छन्दसः च विविधता अपि विराजते।

११.५ भिन्नशतककाव्यानि

संस्कृतसाहित्ये विरचितानि भिन्नशतककाव्यानि उपलभ्यन्ते। यथा-अमरुशतकम्, नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकम्, सूर्यशतकम्, चण्डीशतकम्, आर्यान्योक्तिशतकम्, भल्लटशतकम्, सम्बोधनशतकम्, प्रबोधशतकम्, श्रीशतकम्, विद्युन्मालाशतकम्, पराम्बाशतकम्, शतिशतकम्,आर्यशतकम्, कचशतकम्, कविसहस्रनामशतकम्, ऋषिसहस्रनामशतकम्, शिवभारतशतकम्, प्रभातमंगलशतकम्, देववाणीहुंकारशतकम्, अनुभूतिशतकम्, यात्रात्मकशतकम्, विमानयात्राशतकम्, बालीविलासशतकम्, हिमाचलशतकम्, वैशालीशतकम्, नव्यशतकम्, विस्मयशतकम्, अयोध्याशतकमित्यादि। एतेषां मध्ये कतिपयानां शतककाव्यानां संक्षिप्तपरिचयः अत्रोपस्थाप्यन्ते-

१. अमरुशतकम् -

अमरुशतकनामकं शतककाव्यम् अमरु अथवा अमरुक नाम्ना कविना विरचितमिति प्रसिद्धमस्ति। अमरु सप्तमशताब्द्याः कविरासीत्। अमरुशतकस्य श्लोका अति मनोहराः सन्ति। अस्य भाव-भाषा, तालः,अलंकारश्च सुव्यवस्थितः। अमरुशतककाव्यस्य छन्दः शार्दूलविक्रीडितं तथा प्रधानरसः शृंगाररसः। अमरुशतकस्य चतुर्णां प्रादेशिकसंस्काराणानाम् ९६ तः ११५ पर्यन्तं श्लोकसंख्याः दृश्यन्ते। 'अमरुशतकग्रन्थः' सप्तमशतिकाया उत्तरार्धे अरचयत् इति आनन्दवर्धनेन उक्तम्।

२. नीतिशतकम् -

नीतिशतकं भर्तृहरेः शतककाव्यमस्ति। नीतिशतके कवे उदात्तगुणग्रहणे रुचिं दर्शयति। यस्य अभ्यासः सम्पूर्णमानवसमाजस्य कृते लाभप्रदोऽस्ति। नीतिशतकस्य श्लोका अतिशयरूपेण लोकप्रियाः सन्ति। अस्य शतकस्य शतश्लोकाः, दशविभागेषु विभक्ताः सन्ति। मंगलाचरणानन्तरं क्रमतः-

१. मुखपद्धतिः (२-१०)
२. विद्वत्पद्धतिः (११-२०)
३. मानशौर्यपद्धतिः (२१-३०)
४. अर्थपद्धतिः (३१-४०)
५. दुर्जनपद्धतिः (४१-५०)
६. सज्जनपद्धतिः (५१-६०)
७. परोपकारपद्धतिः (६१-७०)
८. धैर्यपद्धतिः (७१-८०)
९. दैवपद्धतिः (८१-९०)
१०. कर्मपद्धतिः (९१-१००)



ज्ञातव्यम्

'शतकत्रयं' भर्तृहरिः रचितवान्। शतकत्रयं यथा - शृङ्गारशतकम्, नीतिशतकम्, वैराग्यशतकञ्च। भर्तृहरिः शृङ्गार-नीति-वैराग्यशतकत्रयस्यादौ क्रमानुसारं कामदेव -ब्रह्म तथा शिवस्य स्तुतिं कृतवान् ।

३. शृङ्गारशतकम्-

शृङ्गारशतकं भर्तृहरेः शतककाव्यमस्ति। विषयानुसारं शृङ्गारशतकं पञ्चभागेषु विभक्ताः सन्ति। यथा -

१. स्त्रीप्रशंसा (१-२०),
२. सम्भोगवर्णनम् (२१-४०),

३. कामिनीनिन्दा (४१-६०),

४. सुविरक्तदुर्विरक्तपद्धतिः (६१-८०),

५. ऋतुवर्णनम् (८१-१००)।

अत्र शतसंख्यकानां श्लोकानां माध्यमेन कविः स्त्रीस्वभावः, कामासक्तपुरुषस्य स्वरूपं, तेषां परिणतीत्यादि दर्शयन्ति।

४. वैराग्यशतकम् -

वैराग्यशतकं भर्तृहरेः तृतीयशतकमस्ति। अत्र शतश्लोकाः सन्ति। विषयानुसारं शतश्लोकाः दशभागेषु विभक्ताः सन्ति -

१. तृष्णादूषणम् (१-१०),

२. विषयपरित्यागविरम्बना (११-२०),

३. याञ्चादैन्यदूषणम् (२१-३०),

४. भोगास्थैर्यः वर्णनम् (३१-४०),

५. कालमहिमानुवर्णनम् (४१-५०),

६. यतिनृपति-संवादवर्णनम् (५१-६०),

७. मनःसम्बोधननियमनम् (६१-७०),

८. नित्यानित्यवस्तुविचारः (७१-८०),

९. शिवार्चनम् (८१-९१),

१०. अवधूतचर्या (९१-१००)।

अस्य प्रत्येकः श्लोक अनुभूतिप्रवणोऽस्ति। अत्र विषयवस्तूं दृष्ट्वा प्रतीतो भवति यत् - भर्तृहरि एक अद्वैतवादी कविरासीत्। अत अद्वैतस्य अवधारणां प्रदर्शयितुं वैराग्यस्य प्रशंसापरकं वैराग्यशतकं लिखितवान्।

५. शान्तिशतकम् -

अनन्तरस्य बहवः कवयः भतृहरेः शतकेभ्यः प्रेरिताः सन् शतकानि रचयन्ति स्म। एतेषु सिन्हानस्य 'शान्तिशतकम्' इति ग्रन्थ अन्यतमो वर्तते। शान्तिशतकग्रन्थे वैराग्यशतकस्य बहुश्लोकाः परिदृश्यन्ते। तथापि अस्य ग्रन्थस्य प्रसिद्धता वर्तते।

६. भल्लटशतकम् -

काश्मीरिकविः भल्लटेन भल्लटशतकं रचितम्। अस्मिन् शतके श्लोकानां संख्या शतात् न्यूनाः सन्ति। आनन्दवर्धनेन ध्वन्यालोके भल्लटशतकस्य बहुश्लोकाः उद्धृताः। भल्लटस्य श्लोकानां मध्ये न्याय- नीति- आदर्शादि, विविधविचाराणां समाहारः दृश्यन्ते।

भल्लटशतकं शृङ्गारमूलकशतककाव्यमस्ति। शतककाव्येषु शृङ्गाराश्रितं काव्यम् अधिकं वर्तन्ते।

७. सूर्यशतकम् -

सूर्यशतकं मयूरभट्टनाम्ना कविना विरचितम्। मयुरभट्टः तथा बाणभट्टः श्रीहर्षस्य

राजसभायाः कविरास्ताम्। स्त्रग्धराछन्दसि रचितम् अयमेव प्रथमं काव्यमस्ति।

८. चण्डीशतकम् -

बाणभट्टः मयुरभट्टस्य समकालीनासीत्। तेन चण्डीशतकं रचितम्। इदं काव्यं दुर्गादेव्याः स्तुतिप्रधानासीत्। चण्डीशतकग्रन्थे अनुप्रास-उत्प्रेक्षादि अलङ्काराः प्रयुक्ताः सन्ति।



ज्ञातव्यम्

संस्कृतसाहित्ये मुक्तकश्लोकेषु निबद्धानि बहुनि शतककाव्यानि प्राप्यन्ते। 'मुक्तक'श्लोकाः स्वयं पूर्णेकचतुर्भुजाः श्लोकाः सन्ति। मुक्तकश्लोकमाध्यमेन शतककाव्येषु बाह्याभ्यन्तरप्रकृतिं सुन्दररूपेण चित्रयन्ति। धार्मिकभावेन लिखितेषु शतकेषु मयुरभट्टेन विरचितं सूर्यशतकम्, बाणभट्टस्य चण्डीशतकञ्च प्रमुखमस्ति।

११.६ अध्यायस्य असमीयाभाषायां सारांशः

শতককাব্যৰ লক্ষণ -

শতককাব্যক লঘুকাব্য বুলি কোৱা হয়। শতককাব্যৰ লক্ষণ স্পষ্টৰূপত পোৱা নাযায়। কিন্তু ইয়াৰ **'উৎকণ্ঠাবিৰচিতং পদং গেয়ং'** বুলি লক্ষণ নিৰূপিত হৈছে। বর্ণীয় বিষয় অনুসৰি শতককাব্য প্রধানকৈ তিনিপ্রকাৰৰ — শৃংগাৰমূলক শতককাব্য, নীতিমূলক শতককাব্য, বৈৰাগ্যমূলক শতককাব্য। এই শৃংগাৰমূলক শতককাব্যসমূহ শৃংগৰাত্মক ভাৱনাপূর্ণ হয়। নীতিমূলক শতককাব্যত নৈতিকতাপূর্ণ বিষয়ৰ সমাহাৰ দেখা য়ায। পুনৰ বৈৰাগ্যমূলক শতককাব্যত জীৱনৰ ক্ষণিকতা, বিষয় ভোগৰ প্রতি আসক্তি শূন্যতা ইত্যাদি বিষয়বোৰৰ সমাহাৰ দেখিবলৈ পোৱা যায়।

শতককাব্য ৰচনাৰ উদ্দেশ্য —

সংস্কৃত সাহিত্যত কাব্য দুই প্রকাৰৰ পোৱা যায়— দৃশ্যকাব্য আৰু শ্রব্যকাব্য। শ্রব্যকাব্য পুনৰ তিনিভাগত বিভক্ত। গদ্য, পদ্য, আৰু মিশ্র। শতককাব্য পদ্যকাব্যৰ অন্তর্গত। শতককাব্য গীতিধর্মী কাব্য। পদ্যৰ মাধ্যমেৰে কঠিনভাৱ প্রকাশ কৰি পাঠকক ৰসযুক্ত কৰাই শতককাব্য ৰচনাৰ মুখ্য উদ্দেশ্য। শতককাব্যত মধুৰ পদ্য বিন্যাস দেখা যায়। মধুৰ পদ্য বিন্যাসেৰে, গীত মাধ্যমৰ দ্বাৰা বিষয়বোৰৰ উপস্থাপন কৰাই শতককাব্যৰ উদ্দেশ্য। লঘূ আকাৰেৰে মর্ম যুক্ত ৰচনাত ছন্দোবদ্ধ ৰূপ প্রদানেই শতককাব্যৰ উদ্দেশ্য।

শতককাব্যৰ উৎস -

শতককাব্যৰ প্রথম অংকুৰণ ঋগ্বেদৰ অন্তর্গত অক্ষসুক্ত (10.34), ভিক্ষুসুক্ত (10.117] তথা সংজ্ঞানসুক্তত (10.191]) দেখা যায়। তেনেদৰে উপনিষদ সাহিত্যও নীতিসমৃদ্ধ, ইয়াতো শতককাব্যৰ অংকুৰণ পোৱা য়ায। কল্পসুত্রৰ অন্তর্গত ধর্মসুত্রত, তাৰ পিছৰ যুগৰ স্মৃতিসমূহত, চতুষ্টয় পুৰুষার্থ সাধনাৰ বাবে বিহিত ধর্মনীতি, সমাজনীতি, ৰাজনীতি আদিত বৈৰাগ্য আদিৰ

প্রবন্ধসমূহ দেখা যায়। ৰামায়ণ, মহাভাৰত, পুৰাণ আদিতো নীতিগর্ভ শতকাব্যৰ সম্ভাৰ অন্তর্নিহিত হৈ আছে।

নামকৰণপদ্ধতি -

সংস্কৃত সাহিত্যত শতককাব্যৰ নামকৰণৰ বহুতো পদ্ধতি বিকশিত হৈছে। যেনে-

1] দেৱ-দেৱীৰ স্তুতিৰ আধাৰত নামকৰণ-দূর্গাসপ্তশতী, বাণভট্টকৃত চণ্ডীশতক, ময়ূৰকৃত সূর্যশতক আদি।

2] সংস্কৃতত কিছু শতককাব্যৰ নামকৰণ সামাজিক বিষয়ক লক্ষ্য কৰি ৰচনা কৰা হৈছে, যেনেদৰে- বিশ্বেশ্বৰ পাণ্ডেকৃত হোলিকাশতক, বৰদকৃষ্ণ আচার্যকৃত বিধ্বস্তকম আদি।

3] মুক্তককাব্যৰ অধিকাংশৰেই প্রতিপাদ্য বিষয় হৈছে শৃংগাৰ, এইকাৰণে নাৰীৰ সৌন্দর্যৰ ওপৰত ভিত্তি কৰি কিছুমানৰ নামকৰণ কৰা হৈছে। যেনে -বৰদকৃষ্ণ আচার্যৰ কচশতক, বিদ্যাসুন্দৰকৃত ৰোমাৱলীশতক আদি।

4] কিছুমান শতকৰচনাকাৰে ছন্দৰ ওপৰত ভিত্তি কৰি নামাকৰণ কৰিছে। যেনে— বিশ্বেশ্বৰ পাণ্ডেকৃত আর্যশতক, গোবর্ধন আচার্যকৃত আর্য্যসপ্তশতী।

5] কিছুমান শতকৰচনাকাৰে ওপৰোক্ত নামকৰণ পৰম্পৰা ত্যাগ কৰি নিজৰ নামৰে কাব্য ৰচনা কৰিছিল, যেনে— অমৰুশতক, ময়ূৰশতক, ভল্লটশতক আদি।

শতককাব্যৰ বৈশিষ্ট্য -

শতককাব্যৰ বৈশিষ্ট্যসমূহ তলত উল্লেখ কৰা হৈছে—

1] শতককাব্যৰ ভাষা সংস্কৃত ।

2] শতককাব্যত এশসংখ্যক শ্লোক পোৱা যায়।

3] শতককাব্যক গীতিকাব্য বুলিও কোৱা হয়।

4] শতককাব্য পদ্যাত্মক।

5] শতককাব্যত মাধুর্যময় ৰসৰ বিন্যাস পৰিলক্ষিত হয়।

6] শতককাব্যৰ শ্লোকসমূহৰ মাধ্যমেৰে ব্যৱহাৰিক জীৱনত উপযোগী ধর্ম -অর্থ কাম-নীতি-শৃংগাৰ-বৈৰাগ্য আদি সকলোবোৰ বিষয়ৰ বর্ণনা দেখা যায়।

7] শতককাব্যক লঘুকাব্য বুলিও কোৱা হয়।

8] শতককাব্য মূলতঃ তিনিপ্রকাৰৰ - শৃংগাৰমূলক-নীতিমূলক-বৈৰাগ্যমূলক।

শতককাব্যৰ ভাগ -

শতককাব্যসমূহ সাধাৰণতে তিনিটা ভাগত বিভক্ত কৰা হৈছে —

1] শৃংগাৰমূলক

2] নৈতিকমূলক

3] বৈৰাগ্যমূলক

এই শতককাব্যসমূহত বিভিন্ন বিষয়ৰ সংযোজন আছে। সেইবোৰৰ ভিতৰত যেনে—

লোভ, মোহ, সাহসিকতা, অভিমান ইত্যাদিৰ পৰা হব পৰা জীৱনৰ ক্ষণস্থায়িত্ব, নাৰীৰ মোহনীয় চৰিত্ৰ আৰু ৰূপৰ প্ৰলোভনৰ প্ৰতি সতৰ্কতা, আসক্তিহীনতা, বৈৰাগ্যৰ পৰা সুবিধা, শম-দমাদিৰ পৰা হোৱা লাভ, সৎসঙ্গৰ পৰা হোৱা লাভ, অসৎসঙ্গৰ পৰা হোৱা ক্ষতি, বিদ্যানৰ মহত্ব আদি শতকাব্যৰ বিষয়বস্তু। এই কাব্যসমূহত অলংকাৰ আৰু ছন্দৰ বৈশিষ্ট্যও বিৰাজমান।

অমৰুশতক - অমৰুশতক নামৰ শতককাব্যখন অমৰু বা অমৰুক নামৰ কবিয়ে ৰচনা কৰিছিল। অমৰু সপ্তম শতাব্দীৰ কবি আছিল। অমৰুশতকৰ শ্লোকসমূহ মনোহৰ। ইয়াৰ ভাৱ-ভাষা,তাল, অলংকাৰ সকলোবোৰ সুব্যৱস্থিত। অমৰুশতকৰ ছন্দ শার্দুলবিক্রীড়িত আৰু প্ৰধান ৰস শৃংগাৰ ৰস।

নীতিশতক -নীতিশতকত কবিয়ে উদাত্ত গুণ গ্ৰহণ কৰিবলৈ আগ্ৰহ দেখুৱাইছে। যিবোৰৰ অনুশীলন সমগ্ৰ মানৰ সমাজৰেই মংগলকাৰক। এই শতকখন এশটা শ্লোক আৰু দহটা ভাগত বিভক্ত।মংগলাচৰণৰ পিছতক্ৰমে— 1] মুখপদ্ধতি [2–10], 2])দ্বিতপদ্ধতি ([11–20], 3])মানশৌৰ্যপদ্ধতি [21–30], 4])অৰ্থপদ্ধতি [31–40], 5])দুৰ্জ্জনপদ্ধতি [41–50], 6])সজ্জনপদ্ধতি(51–60], 7])পৰোপকাৰপদ্ধতি(61–70], 8])ধৈৰ্যপদ্ধতি(71–80], 9])দৈৱপদ্ধতি(81–90], 10])কৰ্মপদ্ধতি(91–100] । ভতৃহৰিয়ে কালিদাস, শূদ্রক আদিৰ গ্ৰন্থৰ পৰাও শ্লোকসমূহ সংগ্ৰহ কৰিছে। নীতিশতকৰ শ্লোকসমূহ অতি জনপ্ৰিয়।

শৃংগাৰশতক - বিষয় অনুসৰি শৃংগাৰশতক গ্ৰন্থখন পাঁচটা ভাগত বিভক্ত কৰা হৈছে। যেনে-1])স্ত্ৰীপ্ৰশংসা(1–20], 2])সম্ভোগবৰ্ণন(21–40, 3])কামিনীনিন্দা(41–60], 4] সুবিৰক্ত দুৰ্বিক্ত পদ্ধতি(61–80], 5])ঋতুবৰ্ণন(81–100] । ইয়াত এশটা শ্লোকৰ মাজেৰে কবিজনে নাৰী প্ৰকৃতিৰ উপলব্ধি, কামুক ব্যক্তিৰ স্বৰূপ উদ্‌ঘাটন, পৰিণতি আদি আঙুলিয়াই দেখুৱাইছে।

বৈৰাগ্যশতক -বৈৰাগ্যশতক ভতৃহৰিৰ তৃতীয়খন শতক। বিষয় অনুসৰি এই শতকখন দহটা ভাগত বিভক্ত কৰা হৈছে— 1] তৃষ্ণাদূষণ(1–10], 2])বিষয়পৰিত্যাগবিড়ম্বনা(11–20], 3])থাঞ্চাদৈন্যদূষণম্(21–30], 4])ভোগাস্থৈৰ্যবৰ্ণনা(31–40], 5])কালমহিমানুবৰ্ণনা (41–50], 6])যতিনৃপতিসংবাদবৰ্ণনা(51–60], 7])মন সম্বোধন নিয়মন(61–70], 8])নিত্য অনিত্যবস্তুবিচাৰ(71–80], 9])শিবাৰ্চনম(81–90], 10])অবধূতচৰ্যা(91–100]।

ইয়াৰ প্ৰতিটো শ্লোকেই অনুভুতিপ্ৰৱণশীল। ইয়াৰ বিষয়বস্তুৰ প্ৰতি লক্ষ্য কৰিলে দেখা যায় যে ভতৃ হৰি এজন অদ্বৈতবাদী কবি আছিল। অদ্বৈতধাৰণাক ফলৱৰ্তী কৰিবলৈ তেওঁ বৈৰাগ্যপথৰ প্ৰশংসাপৰক বৈৰাগ্যশতকখন ৰচনা কৰিছিল।


শান্তিশতক - ভতৃহৰিৰ শতকত্ৰয়ৰ দ্বাৰা অনুপ্ৰাণিত হৈ পৰৱৰ্তী অনেক কবিয়ে শতককাব্য ৰচনা কৰিছে । ইয়াৰ ভিতৰত সিন্‌হনৰ 'শান্তিশতক' অন্যতম । তেওঁ ভতৃহৰিৰ বৈৰাগ্যশতককে ধৰি অন্য বহুতশতকৰ ঋণবদ্ধ হ'লেও কাব্যখনি বহুখিনি মৌলিক।

ভল্লটশতক - কাশ্মীৰি কবি ভল্লটে 'ভল্লটশতক' ৰচনা কৰিছিল।এই শতকত শ্লোকৰ সংখ্যা এশৰো কম। আনন্দবৰ্ধনে 'ধ্বন্যালোকত' 'ভল্লটশতকৰ' শ্লোক উদ্ধৃত কৰিছিল। ভল্লটৰ

মুক্তকশ্লোকসমূহত ন্যায়-নীতি, আদর্শ আৰু নানান বিদগ্ধ ভাৱনা প্রকাশিত হৈছিল। ভল্লটৰ ভল্লটশতক গ্রন্থখন শৃংগাৰমূলক শতককাব্য। শতককাব্যৰ ভিতৰত শৃংগাৰাশ্রিত ৰচনাই অধিক।

सूर्यशतक - সূর্যশতক ময়ূৰভট্ট নামৰ কবিয়ে ৰচনা কৰিছিল। ময়ূৰভট্ট আৰু বাণভট্ট শ্রীহর্ষৰ ৰাজসভাৰ কবি আছিল। স্রগ্ধৰা ছন্দত ৰচিত কাব্যবোৰৰ ভিতৰত এইখনেই প্রথমকাব্য।

चण्डीशतक - বাণভট্ট ময়ূৰভট্টৰ সমকালীন কবি আছিল। বাণভট্টই চণ্ডীশতক ৰচনা কৰিছিল। এই কাব্যখন দুর্গাদেৱীৰ স্তুতিপ্রধান কাব্য। চণ্ডীশতকত কবিয়ে দীঘল দীঘল সমাস, অনুপ্রাস, উৎপ্রেক্ষা আদি অলংকাৰৰ ব্যৱহাৰ কৰি ৰচনাশৈলী চমৎকাৰ কৰি তুলিছে।



अग्रगति निरीक्षणम्

प्रश्नः १: शतकशब्दस्य कोऽर्थः ?

.....

प्रश्नः २: शतककाव्यस्य वैशिष्ट्यं किम् ?

.....

प्रश्नः ३: किमर्थं शतककाव्यं मुक्तककाव्यमिति उच्यते ?

.....

प्रश्नः ४: आन्दवर्धनेन मुक्तककाव्यस्य लक्षणं किमुक्तम् ?

.....

प्रश्नः ५: शतककाव्यस्यापरं नाम किम् ?

.....

प्रश्नः ६: शतककाव्यं कति प्रकारकं विद्यते ? किम् किम् ?

.....

प्रश्नः ७: शृंगारमूलकशतककाव्यस्य विषयः कोऽस्ति ?

.....

प्रश्नः ८: वैराग्यमूलकशतककाव्ये कस्य वर्णनं भवति ?

.....

प्रश्नः ९: संस्कृतसाहित्ये काव्यस्य कति प्रकाराः सन्ति ?

.....

प्रश्नः १०: नीतिशतकं केन प्रणीतम् ?

.....

प्रश्नः ११: नीतिशतकं कति विभागेषु विभक्ताः वर्तन्ते ?

.....

प्रश्नः-१२. सूर्यशतकस्य रचयिता कोऽस्ति ?

.....

प्रश्नः-१३. चण्डीशतकस्य रचयिता कोऽस्ति ?

.....



११.७ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- अध्यायात् शतककाव्यस्य भिन्नानां परिभाषाणां ज्ञानम् अभवत्।
- शतककाव्यस्य रचनाया उद्देश्यस्य ज्ञानम् अभवत्।
- संस्कृतसाहित्यस्य विशिष्टशतकग्रन्थकारैः सह परिचितं जातम्।
- शतककाव्यस्य उत्सस्य तथा भागस्य ज्ञानम् अभवत्।
- मुक्तककाव्यस्य विषयेऽपि ज्ञानम् अभवत्।



११.८ ज्ञानाधिक्यम्

१) সংস্কৃত সাহিত্যৰ ইতিবৃত্ত, ড০ থানেশ্বৰ শর্মা, চন্দ্র প্রকাশ, পাণবজাৰ, গুৱাহাটী -1, 2015

२) संस्कृतसाहित्यस्येतिहासः, आचार्यः लोकमणि दाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी -२०१५

३) A history of Sanskrit literature, Keith A.B, Delhi, Oxford UP-1973

४) History of classical Sanskrit literature, Krishnamacharior, Delhi, Matilal Banarsidass Publishers Pvt, Ltd - 2004.



११.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : शतम्।

प्रश्नः २ उत्तरम् : शतककाव्यं पद्यात्मकं वर्तते।

प्रश्नः ३ उत्तरम् : बाह्यीकरणात् मुक्तं, स्वयं रसयुक्तं काव्यमस्ति शतककाव्यम् अतः मुक्तककाव्यमिति उच्यते।

प्रश्नः ४ उत्तरम् : मुक्तकेषु हि प्रबन्धेषु इव रसवन्धाभिनिवेशिनः कवयो दृश्यन्ते।

प्रश्नः ५ उत्तरम् : गीतिकाव्यम् अथवा लघुकाव्यम्।

प्रश्नः ६ उत्तरम् : त्रिप्रकारकाः विद्यन्ते -१). शृंगारमूलकशतककाव्यम्

२). नीतिमूलकशतककाव्यम्

३). वैराग्यमूलकशतककाव्यम्

प्रश्नः ७ उत्तरम् : शृङ्गारात्मकभावनापूर्णः।

प्रश्नः ८ उत्तरम् : जीवनस्य क्षणिकता, विषयभोगं प्रति आसक्तिशून्यता इत्यादि विषयाणां समाहाराः भवन्ति।

प्रश्नः ९ उत्तरम् : प्रकारद्वयमस्ति - दृश्यकाव्यं, श्रव्यकाव्यं च।

प्रश्नः १० उत्तरम् : भर्तृहरिणा।

प्रश्नः ११ उत्तरम् : दशविभागेषु।

प्रश्नः १२ उत्तरम् : मयूरभट्टः।

प्रश्नः १३ उत्तरम् : बाणभट्टः।



११.१० अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: शतककाव्यं किम्?

प्रश्नः २: शतककाव्यस्य उत्सः कः?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

टिप्पणी देया

प्रश्नः १: अमरुशतकम्

प्रश्नः २: नीतिशतकम्

प्रश्नः ३: वैराग्यशतकम्

प्रश्नः ४: शृंगारशतकम्

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १: शतककाव्यस्योपरि एको निबन्धः प्रस्तूयताम्।

प्रश्नः २: शतककाव्यस्य नामकरणपद्धतय उपस्थापयत।

प्रश्नः ३: शतककाव्यस्य वैशिष्ट्यमधिकृत्य एको लेखः प्रस्तूयताम्।

*** ***** ***

अध्यायः १२ : वैज्ञानिकसाहित्यम् (आयुर्वेदः,वास्तुशास्त्रञ्च)

अध्यायस्य संरचना

१२.१ उद्देश्यम्

१२.२ परिचयः

१२.३ आयुर्वेदः चिकित्साशास्त्रं वा

- १२.३.१ आयुर्वेदस्य विभागाः
- १२.३.२ आयुर्वेदस्य वैशिष्ट्यम्
- १२.३.३ आयुर्वेदशास्त्रस्य उत्सः
- १२.३.४ भिन्नानाम् आयुर्वेदशास्त्राणामुल्लेखः

१२.४ वास्तुशास्त्रस्य परिचयः

- १२.४.१ वास्तुशास्त्रस्य उत्सः
- १२.४.२ भिन्नानां वास्तुशास्त्राणामुल्लेखः

१२.५ शब्दार्थसूची

१२.६ अध्यायस्य असमीयाभाषायां सारांशः

१२.७ अध्यायात् किमवगतम्

१२.८ ज्ञानाधिक्यम्

१२.९ अग्रगत्याः निरूपणम्

१२.१० अभ्यासप्रश्नाः

१२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- किं शास्त्रम् आयुर्वेदशास्त्रमिति उच्यते ? आयुर्वेदस्य लक्षणं किमिति ज्ञातुं शक्नुवन्ति।
- आयुर्वेदस्य वैशिष्ट्यविषये ज्ञातुं शक्नुवन्ति।
- आयुर्वेदस्य उत्सविषये ज्ञातुं शक्नुवन्ति।
- विभिन्नैः आयुर्वेदशास्त्रैः सह परिचितो भवितुं शक्नुवन्ति।
- वास्तुशब्दस्य अर्थः ज्ञातुं शक्नुवन्ति।
- किं शास्त्रं वास्तुशास्त्रमिति उच्यते ? वास्तुशास्त्रस्य उत्सविषये च ज्ञातुं शक्नुवन्ति।
- विभिन्नैः वास्तुशास्त्रैः सह परिचितो भवितुं शक्नुवन्ति।

१२.२ परिचयः

अस्य अध्यायस्य अध्ययनेन आयुर्वेदविषये वास्तुविद्याविषये च सविशेषज्ञानं प्राप्स्यति। यस्मिन् साहित्ये विज्ञानम्, शिल्पकला, ज्योतिर्विद्या, गणितविद्या, प्रयुक्तिविद्यादीनां समावेशो

भवति तमेव वैज्ञानिकसाहित्यम् उच्यते। विज्ञानस्य विविधविभागाः यथा – आयुर्वेदः चिकित्साशास्त्रं वा, ज्योतिर्विद्या नक्षत्रविद्या वा, वास्तुशास्त्रं स्थपतिः वा आदयः।

आयुर्वेदशास्त्रं आयोरर्थात् शरीरस्य ज्ञानं ददाति। मनुष्यः शरीरं कथं रोगरहितं सुस्वास्थ्ययुक्तं कर्तुं शक्नोति तस्मिन् विषये ज्ञानं ददाति।

वास्तुविद्यायाः परिचयः वैदिककाले एव प्राप्नोति। वास्तुविद्यां स्थपतिविद्या इत्यप्युच्यते। प्राचीनभारतीयमन्दिर–चैत्य–प्रभृतीनां निर्माणे वास्तुविद्यायाः प्रभावः परिलक्षितो भवति।

१२.३ आयुर्वेदः चिकित्साशास्त्रं वा

येन शास्त्रेण आयोः हितस्य अहितस्य तथा रोगाणां लक्षणविषये पुनः निरामयोपायविषये ज्ञातुं शक्यते, तं शास्त्रमेव पण्डितै आयुर्वेदः इति अभिधीयते। आयुर्वेदशब्दस्य व्युत्पत्तिरस्ति – आयुः अनेन विन्दति अथवा आयुः अनेन वेत्ति इति आयुर्वेदः। अनया व्युत्पत्त्या ज्ञायते यत् यस्याध्ययनेन आयुषो विषये ज्ञानं लभ्यते स आयुर्वेदोच्यते। सुश्रुतसंहितायामपि आयुर्वेदशब्दस्य व्युत्पत्तिः एवं प्रकारेण समुपलभ्यते यत् – आयुः अस्मिन् विद्यते अनेन वा आयुर्विन्दति इत्यायुर्वेदः। चरकसंहितायामपि अस्य लक्षणं प्रोक्तमस्ति यत् –

'हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥' इति।

अर्थात् हितस्य, अहितस्य, सुखकारकस्य, दुःखकारकस्य च आयुष अर्थात् जीवनस्य विषये तथा च आयुषो मानस्य विषये यत्र वर्णनं संप्राप्यते स आयुर्वेदोच्यते।



ज्ञातव्यम्

ऋग्वेदे सर्वप्रथमम् आयुर्वेदस्य वर्णनमुपलभ्यते । पुनः यजुर्वेदे सामवेदे चापि आयुर्वेदस्य वर्णनमस्ति। परन्तु एतेषु त्रिषु वेदेषु समागतानाम् आयुर्वेदविषयाणाम् एकत्र क्रमबद्धं वर्णनम् अथर्ववेदे प्राप्यते।

१२.३.१ आयुर्वेदस्य विभागाः

आयुर्वेदस्याष्टौ अङ्गानि सन्ति। तान्यङ्गानि यथा–

१. कायचिकित्सा, २. कौमारभृत्यम्, ३. भूतविद्या, ४. शालाक्यचिकित्सा, ५. शल्यचिकित्सा, ६. अगदतन्त्रम्, ७. रसायनतन्त्रम्, ८. वाजीकरणतन्त्रञ्च।

एतेषामङ्गानां संक्षिप्तपरिचयो यथा–

१. **कायचिकित्सा** – अस्यां चिकित्सापद्धत्यां सम्पूर्णशरीरस्य चिकित्सा भवति। काय अर्थात् शरीरम्। अतैव शरीरस्य चिकित्सा एव कायचिकित्सा। ओषधिप्रयोगेन चिकित्साकरणस्य अत्र विधिर्वर्त्तते। अस्यां समस्त– रोगाणां निवारणोपायं क्रियते।

प्रधानतः ज्वरः, रक्तपित्तम्, उन्मादः, अपस्मारः, कुष्ठः, प्रमेहः, अतिसारादिरोगाणां चिकित्साऽत्र भवति।

२. **कौमारभृत्यम्**- अस्यापरा नाम बालचिकित्सा। अत्र विशेषतो बालानां चिकित्सा भवति। एवं स्त्रीरोगेण सहितस्य गर्भविज्ञानस्यापि वर्णनमस्मिन् तन्त्रे मिलति।

३. **भूतविद्या** - भूतविद्यायाः अन्या नामास्ति ग्रहचिकित्सा। अस्मिन् ग्रहकारणात् उत्पन्नविकारस्यैवं तस्य चिकित्साविषये वर्णनमस्ति। अत्र देव-असुर-पिशाचादिभ्यो गृहीतानां जनानां शान्तिकर्मणो व्यवस्थाविषयेऽस्ति।

४. **शालाक्यचिकित्सा** - अस्यापरा नामास्ति ऊर्ध्वाङ्गचिकित्सा। अर्थात् अत्र चक्षु- नासिका- कर्ण- जिह्वादीनां चिकित्साविषये उपलभ्यते। सुश्रुतसंहितायां चरकसंहितायां च शिरोरोगस्य, मुखरोगस्य, कर्ण- रोगस्य एवं प्रकारकानामन्यरोगाणामपि वर्णनं वर्त्तते।

५. **शल्यचिकित्सा** - शल्यचिकित्सामाङ्ग्लभाषायाम् 'Surgery' इत्युच्यते। अत्र यन्त्रमाध्यमेन चिकित्साविषये वर्णितमस्ति। अर्थात् शरीरस्य कस्याप्यङ्गस्य शस्त्रमाध्यमेन चिकित्साकरणमेव शल्यचिकित्सा।

६. **अगदतन्त्रम्** - अगदतन्त्रस्यापरा नामास्ति विषचिकित्सा। अस्मिन् सर्वप्रकारकाणां विषाणां चिकित्सापद्धतिविषये वर्णनं वर्त्तते। पुनरत्र विषाणां लक्षणविषयेऽपि उपलभ्यते।

७. **रसायनतन्त्रम्** - अस्य तन्त्रस्य अपराभिधानमस्ति जराचिकित्सा। अत्र उत्तमस्वास्थ्यस्य कृते, दीर्घायुप्राप्त्यर्थमत्रोपायाः वर्णितास्सन्ति।

८. **वाजीकरणतन्त्रम्** -अस्मिन् तन्त्रे शुक्रधातोरुत्पत्तिः, उत्तमस्वास्थ्ययुक्तः सन्तानोत्पत्तिसम्बन्धिज्ञानम् इत्यादीनां वर्णनं वर्त्तते।

१२.३.२ आयुर्वेदस्य वैशिष्ट्यम्

शरीरम्, इन्द्रियम्, मनः, आत्मानं परस्परं संयोगकरणकालम् 'आयुः' इत्युच्यते। 'शरीरेन्द्रियसत्वात्मसंयोगोरायुरुच्यते'(चरकसंहिता १/४१)।

अस्य आयोः वेदस्य च अर्थात् आयुर्वेदस्य आयोः ज्ञानस्य वा प्राप्तकरणं परमपूण्यजनकमिति वेदविदाः वदन्ति। आयुर्वेदशास्त्रस्य वैशिष्ट्यमस्ति आयुर्वेदशास्त्रं स्वस्थजनानां स्वास्थ्यरक्षणं करोति पुनः रोगार्ताणां रोगं निरामयति।

आयुर्वेदानुसारं मनुष्यस्य केवलं कायिकोत्कर्षसाधनेन एव मनुष्यः स्वास्थ्यवान् भवितुं न शक्नोति। अस्यार्थं मानसिकोत्कर्षसाधनस्यापि विशेषप्रयोजनमस्ति।

अतैव मानसिकोत्कर्षताप्राप्त्यर्थम् आयुर्वेदग्रन्थस्य स्थाने स्थाने सत्वाक्यादीनि सदाचारादयः समाविष्टाः सन्ति।

आयुर्वेदस्य मुख्यं वैशिष्ट्यमस्ति यत्- आयुर्वेदः स्वास्थ्यसंरक्षणस्य मूलनीतिं

वहति। अर्थात् केवलं रोगोपशमनमेव न, इतोपरि कथं रोगाक्रान्तो न भूत्वा सुस्वास्थ्यरक्षणं कर्तुं शक्नोति तदेव आयुर्वेदस्य मूलं वैशिष्ट्यं वर्त्तते।



ज्ञातव्यम्

आयुर्वेदे त्रिविधाः दोषाः वर्त्तन्ते। ते दोषाः यथा-वातः, पित्तम्, कफश्चेति।

१२.३.३ आयुर्वेदशास्त्रस्य उत्सः

भारतवर्षे प्राचीनकालादेव अधुना पर्यन्तम् आयुर्वेदस्य व्यापकानुशीलनं प्रचलति। अन्यशास्त्रवत् अस्य आयुर्वेदशास्त्रस्य निपूणाचार्याणां नामानि उपलभ्यन्ते - भरद्वाज-आत्रेय-अग्निवेश- जातुकर्ण-भेल-हारीत-क्षारपाणि-धन्वन्तरिप्रभृतयः। वैदिकसूर्यः रुद्रदेवतादयः च अश्विनीकुमारौ, ब्रह्मा, विष्णुः, नारायणः, शिवः प्रभृतिदेवताः रोगनिरामयस्य आधिकारिकरूपेण अभिनन्दिताः। इतोपरि चिकित्साग्रन्थस्य प्रणेतारूपेणापि देवतानां नामानि प्राप्यन्ते-

१. प्रजापतिब्रह्मणः ब्रह्मसंहिता।
२. अश्विनीकुमारयोः अश्विनीकुमारसंहिता नाडीनिदानं ।
३. शिवप्रणीतः कैलाशकारकः वैद्यराजतन्त्रं च।
४. चक्रपाणिदत्तस्य शैवसिद्धान्त।

विशेषतः अथर्ववेदस्य भैषज्यसूक्तेषु स्थितेषु मन्त्रेषु ओषधिवृक्षाणां प्रयोगेन रोगनिरामयस्य विधानम् आलोचितमस्ति। अस्योद्देश्यमस्ति भारतवर्षे उत्पन्नानां वृक्षाणां विविधांशानां प्रयोगेन तथा गन्धेन, क्रियया- विक्रियया च व्याधिनिरामयः।

पुराणेषु आयुर्वेदप्रणेतानां ग्रन्थानां च नामानि उपलभ्यन्ते। यथा -

१. धन्वन्तरिप्रणीतं 'चिकित्सातत्त्वविज्ञानम्'।
२. दिवोदासप्रणीतं 'चिकित्सादर्शनम्'।



ज्ञातव्यम्


आयुर्वेदस्य अन्तर्गतानि पञ्चतत्त्वानि। तानि तत्त्वानि यथा - पृथिवी, जलम्, अग्निः, वायुः, आकाशं च।

१२.३.४ भिन्नानाम् आयुर्वेदशास्त्राणामुल्लेखः

आयुर्वेदस्य क्षेत्रे अतीव प्राचीनं तथा समृद्धसंकलनमस्ति 'चरकसंहिता'। अयं ग्रन्थः चरकेण संकलितः। तदनन्तरम् आयाति 'सुश्रुतसंहिता'। अयं ग्रन्थः सुश्रुतेन

संकलितः। कायचिकित्सायाः प्राचीनाचार्य आसीत् आत्रेयः। वृद्धवाग्भटस्य ग्रन्थोऽस्ति अष्टांगहृदयम्, एवं वाग्भटस्य ग्रन्थोऽस्तिर अष्टांगसंग्रहः। भैषजतत्त्वस्योपरि मध्ययुगे ग्रन्थद्वयं विरचितमभवत्। चक्रपाणिदत्तस्य 'द्रव्यगुणसंग्रहः' राजवल्लभस्य च 'द्रव्यगुणः'।

पशुचिकित्सा- प्राचीनकाले पशुचिकित्सायाः अपि चर्चा अभवत्। पशुचिकित्सायाः तिस्रः शाखाः आसन्- हस्तीचिकित्सा, अश्वचिकित्सा, गवादिपशुचिकित्सा च। पशुचिकित्सायाः ग्रन्थाः यथा- नीलकण्ठस्य नारायणस्य च मातङ्गलीला, नारायणदीक्षितस्य गजग्रहणप्रकारः। अश्वशास्त्रम्, अश्वतन्त्रम्, अश्वचिकित्सा, अश्वायुर्वेदः तुरगपरीक्षादयः च।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: आयुर्वेदशास्त्रस्य निदर्शनं कस्मिन् वेदे प्राप्यते?

.....

प्रश्नः २: आयुर्वेदशास्त्रस्य प्रधानाङ्गं कति संख्यकम्?

.....

प्रश्नः ३: चरकेन संकलितम् आयुर्वेदशास्त्रं केन रचितम्?

.....

प्रश्नः ४: 'अष्टाङ्गहृदयम्' कस्य रचना?

.....

प्रश्नः ५: अश्वसम्बन्धीयग्रन्थद्वयस्य नाम लिखतु।

.....

प्रश्नः ६: आयुर्वेदशास्त्रस्य केचनाचार्याणां नामानि लिखतु।

.....

प्रश्नः ७: 'ब्रह्मसंहिता' केन प्रणीता?

.....

प्रश्नः ८: 'चिकित्सातत्त्वविज्ञानम्' केन प्रणीतम्?

.....

प्रश्नः ९: कायचिकित्सायाः प्राचीनाचार्यः कः?

.....

प्रश्नः १०: 'गजग्रहणप्रकारः' केन विरचितः?

.....

प्रश्नः ११: आयुर्वेदे दोषाः कतिविधाः? के च ते दोषाः?

.....

१२.४ वास्तुशास्त्रस्य परिचयः

संस्कृतसाहित्यस्य वैज्ञानिकसाहित्यानां मध्ये वास्तुविद्या अन्यतमा। वास्तुविद्याम् आङ्गलभाषायां 'Architecture' इत्युच्यते। यस्मिन् शास्त्रे गृहनिर्माणविषयकाः नियमाः उल्लिखिताः भवन्ति तं शास्त्रं वास्तुशास्त्रमित्युच्यते।

प्राचीनयुगे मध्ययुगे च हिन्दु-बौद्ध-जैन-इछलामधर्माणां राजन्यवर्गस्य कलाविदाः स्थापत्यकलायां भास्कर्यशिल्पे च उत्कृष्टशिल्पकर्मणः भाण्डारं निर्माणं कुर्वन्ति स्म। शिल्पशास्त्रस्य प्रधानालोच्यविषयाः सन्ति - चित्रकला (Painting) ,मूर्त्तिशिल्पः (Iconography), भास्कर्यः (Sculpture), स्थापत्यं (Architecture)च।

शिल्पशास्त्रं वास्तुविद्या वा अस्ति भिन्नप्रकारकानां गृहनिर्माणपद्धतिः तथा तेषां गृहानां सुफलविषये कुफलविषये आलोचितं शास्त्रम्। प्राचीनकालादेव भारतवर्षे वास्तुविद्या उत्कर्षं साधयति। विधिसम्मतरूपेण यस्य गृहस्य निर्माणं भवति, तं गृहं मङ्गलदायकमित्युच्यते। 'वास्तु' शब्दस्य अर्थोऽस्ति निवासकरणम्।



ज्ञातव्यम्

प्राचीनभारते स्थापत्यविद्यायाः वास्तुशास्त्रस्य वा चर्चा अभवत्। स्थपतिविद्यायाः प्रधानोत्सोऽस्ति पुराणानि।

१२.४.१ वास्तुशास्त्रस्य उत्सः

संस्कृतसाहित्यस्य पुराणानि भारतीयसाहित्यशिल्पसंस्कृतेः आकरग्रन्थः। भारतीयविद्यायाः विविधशाखायाः ज्ञान-विज्ञानयोः अवदानं पुराणेषु एव प्राप्यते। वास्तुशास्त्रस्यापि प्रधान उत्सोऽस्ति पुराणाम्। ऋग्वेदीयकालादारभ्य ब्राह्मणेषु उपनिषत्सु वास्तुशास्त्राध्ययनविषये उपलभ्यते।

छान्दोग्योपनिषदि उक्तमस्ति यत् सनत्कुमारात् नारदः भिन्नशास्त्राध्ययनसहितं वास्तुशास्त्रस्यापि अध्ययनमकरोत्। बौद्धानां जैनानां च वास्तुशास्त्रस्य उन्नतिक्षेत्रे महदवदानमस्ति।

दक्षिणभारतस्य मन्दिर-स्तूप-विहार-चैत्यादयः प्राचीनभारतस्य विख्यातगृह-निर्मातृणां बुद्धिमत्तायाः तथा नैतिकोत्कर्षसाधनस्य परिचयं प्रददाति।



ज्ञातव्यम्

वास्तुशास्त्रानि प्रधानरूपेण भागत्रये विभक्तं कर्तुं शक्यते -
१. वास्तुशास्त्रम्, २. शिल्पशास्त्रं मूर्त्तिनिर्माणं वा ३. चित्रशास्त्रञ्च।

१२.४.२ भिन्नानां वास्तुशास्त्राणामुल्लेखः

वास्तुशास्त्रस्य प्राचीनाचार्यरूपेण विष्णु-सनत्कुमार-विश्वकर्मा-काश्यप-मयप्रभृतीनां नामानि प्राप्यन्ते। अनुमीयते यत् वास्तुशास्त्रमधिकृत्य पञ्चाशदधिकाः ग्रन्थाः विरचिताः अभवत्। परन्तु सम्प्रतिः सर्वे ग्रन्थाः न प्राप्यन्ते। प्रधानग्रन्थाः यथा -१. वास्तुविद्या, २. मनुष्यालयचन्द्रिका, ३. श्रीज्ञानरत्नकोषः, ४. मयमतम्, ५. अपराजितापृच्छा, ६. प्रासादमञ्जरी, ७. वास्तुमञ्जरी (श्रीनाथरचिता), ८. प्रासादमण्डलम् (मण्डनरचितम्), ९. वास्तुकर्मः वास्तुशास्त्रं वा, १०. काश्यपसंहिता (काश्यपरचिता), ११. शिल्परत्नम् (श्रीकुमाररचितम्)।

वास्तुशास्त्रविषयको अन्यैको ग्रन्थोऽस्ति भोजदेवरचितः 'समराङ्गनसूत्रधारः'। 'युक्तिकल्पतरुः' ईश्वरचन्द्रशास्त्रीमहोदयेन रचितमासीत्। अस्य ग्रन्थस्य २३ संख्यकेऽध्याये वास्तुनिर्माणविषयेऽस्ति। वराहमिहिरस्य बृहत्संहिताग्रन्थस्य ५३ संख्यके ५६ संख्यके च अध्याये वास्तुविद्याविषयेऽस्ति।



अग्रगत्याः निरीक्षणम्

प्रश्नः १२: प्राचीनभारतवर्षे रचितानां केचन वास्तुग्रन्थानां नामानि लिखतु।

.....

प्रश्नः १३: 'वास्तु' शब्दस्य अर्थः कः ?

.....

प्रश्नः १४: 'समराङ्गनसूत्रधारः' ग्रन्थस्य रचकः कः ?

.....

प्रश्नः १५: बृहत्संहिताग्रन्थस्य रचकः कः ?

.....

प्रश्नः १६: वास्तुविद्याम् आङ्ग्लभाषायां किमुच्यते ?

.....

प्रश्नः १७: वास्तुविद्यायाः अपरं नाम किम् ?

.....

प्रश्नः १८: वास्तुशास्त्रस्य प्रधानोत्सः कः ?

.....

प्रश्नः १९: वास्तुशास्त्रस्य केचन प्राचीनाचार्याणां नामानि लिखतु।

.....

प्रश्नः २०: 'युक्तिकल्पतरुः' ग्रन्थस्य कर्ता कः ?

.....

१२.५ शब्दार्थसूची

१. आयुर्वेदः - वेदानां मध्ये अन्तिमो वेदः।

२. ब्रह्मसंहिता - प्रजापतिब्रह्मणा रचितः ग्रन्थः।

३. अश्विनीकुमारद्वय : - स्वर्गस्य वैद्यः, देवतानां वैद्यः।

४. ऋग्वेदः-वेदानां मध्ये प्रथमो वेदः।

५. भरद्वाजः- द्रोणाचार्य-कौरव-पाण्डवानां गुरुः।

६. आत्रेयः-अत्रि-ऋषेः पुत्रः।

७. उपनिषद्-उपनिषदः अपरः नाम वेदान्तः। यः वेदस्यान्तिम अर्थात् ज्ञानकाण्डस्यान्तर्गतोऽस्ति।

८. छान्दोग्योपनिषद् - सामवेदस्यान्तर्गता इयमुपनिषद्। इयम् उपनिषद् छान्दोग्यब्राह्मणस्य अंशः।

१२.६ अध्यायस्य असमीयाभाषायां सारांशः

आयुर্বেদ বা চিকিৎসা শাস্ত্র -

যি শাস্ত্রৰ দ্বাৰা হিত -অহিতৰ বিষয়ে জানিব পাৰি, ৰোগ বোৰৰ লক্ষণৰ বিষয়ে জানিৰ পাৰি, পুনৰ ৰোগ নিৰাময়ৰ উপায়ৰ বিষয়েও জ্ঞান অর্জন কৰিব পাৰি তেনেকুৱা ধৰণৰ শাস্ত্রকে পণ্ডিতসকলে আয়ুর্বেদ বুলি অভিহিত কৰিছে। সুশ্রুত সংহিতাত উল্লেখ কৰা অনুসৰি - হিত, অহিত, সুখকাৰক, দুখকাৰক তথা জীৱনৰ সৈতে সম্বন্ধিত বিদ্যা বিশেষেই হৈছে আয়ুর্বেদ বিদ্যা বা আয়ুর্বেদ শাস্ত্র।

আয়ুর্বেদৰ বিভাগসমূহ-

আয়ুর্বেদৰ আমি আঠটা অংগ দেখিবলৈ পাঁও। সেইবোৰ হৈছে—

ক) কায়চিকিৎসা

খ) কৌমাৰভৃত্যম্

গ) ভূতবিদ্যা

ঘ) শালক্যচিকিৎসা

ঙ) শল্যচিকিৎসা

চ) অগদতন্ত্রম্

ছ) ৰাসায়নতন্ত্রম্

জ) বাজীকৰণতন্ত্রম্

উপৰোক্ত আঠপ্রকাৰৰ অংগৰ বিষয়ে সংক্ষিপ্ত পৰিচয় তলত দাঙি ধৰা হ'ল—

ক) কায় চিকিৎসা - এই চিকিৎসা পদ্ধতিৰ দ্বাৰা সম্পূর্ণ শৰীৰৰ চিকিৎসা কৰা হয়। কায় শব্দৰ অর্থ হৈছে শৰীৰ। সেইবাবে শৰীৰৰ চিকিৎসাৰ লগত জড়িত চিকিৎসাই হৈছে কায় চিকিৎসা। ইয়াত বিভিন্ন ঔষধ প্রয়োগৰ দ্বাৰা চিকিৎসা পদ্ধতিৰ বিবিধ বর্ণনা কৰা আছে।

ইয়াত সমস্ত ৰোগবোৰৰ নিবাৰণৰ উপায় উল্লেখ কৰা আছে ।

খ) **কৌমাৰ ভৃত্যম্** - কৌমাৰ ভৃত্যৰ অন্য নাম হৈছে বাল চিকিৎসা। ইয়াত বিশেষকৈ বাল অর্থাৎ কৌমাৰ অৱস্থাত থকা শিশুবিলাকৰ চিকিৎসা পদ্ধতি বর্ণনা কৰা আছে। পুনৰ স্ত্রী ৰোগসম্বন্ধিত বর্ণনাও ইয়াত পোৱা যায়।

গ) **ভূত বিদ্যা** - ভূত বিদ্যাৰ অন্য নাম হৈছে গ্রহ চিকিৎসা। ইয়াত গ্রহৰ কাৰণত উৎপন্ন হোৱা বিকাৰ বোৰৰ চিকিৎসা পদ্ধতিৰ বিষয়ে বর্ণনা কৰা আছে। ইয়াৰ উপৰি দেৱ, অসুৰ, পিশাচ আদিৰ দ্বাৰা আক্রান্ত লোকসকলৰ শান্তি কর্মৰ ব্যৱস্থাৰো উল্লেখ পোৱা যায়।

ঘ) **শালক্য চিকিৎসা** - শালক্য চিকিৎসাৰ অন্য নাম হৈছে উর্দ্ধাংগ চিকিৎসা। অর্থাৎ ইয়াত চকু, নাক, কাণ, জিভা আদিৰ চিকিৎসাৰ বিষয়ে উল্লেখ কৰা আছে। সুশ্রুত সংহিতা আৰু চৰক সংহিতাতো মুখৰ ৰোগ, কর্ণৰোগ আদি নিবাৰণৰ বিভিন্ন উপায়ৰ বিষয়ে উল্লেখ পোৱা যায়।

ঙ) **শল্য চিকিৎসা** - শল্য চিকিৎসাক ইংৰাজী ভাষাত surgery বুলিও কোৱা হয়। ইয়াত যন্ত্রৰ মাধ্যমেৰে চিকিৎসা কৰা হয়। অর্থাৎ শৰীৰৰ কোনো অংগৰ চিকিৎসা অস্ত্রৰ মাধ্যমেৰে কৰাকে শল্য চিকিৎসা বুলি কোৱা হয়।

চ) **অগদ তন্ত্রম্** - অগদ তন্ত্রম চিকিৎসাৰ অন্য নাম হৈছে বিষ চিকিৎসা। ইয়াত সকলো প্রকাৰৰ বিষৰ চিকিৎসা পদ্ধতিৰ বর্ণনা পোৱা যায়। পুনৰ ইয়াত বিষবিলাকৰ লক্ষণ অনুসৰি নিবাৰণৰ উপায়ো উপলদ্ধ হয় ।

ছ) **ৰাসায়ন তন্ত্রম** - ৰাসায়ন তন্ত্রম চিকিৎসাৰ অন্য নাম হৈছে জৰা চিকিৎসা। ইয়াত উত্তম স্বাস্থ্যৰ বাবে তথা দীর্ঘায়ু প্রাপ্তিৰ বাবে প্রয়োগ হোৱা উপায়ৰ বর্ণনা পোৱা যায়।

জ) **বাজী কৰণম তন্ত্রম্** - এই তন্ত্রত শুক্র ধাতুৰ উৎপত্তি, উত্তম স্বাস্থ্যযুক্ত সন্তানৰ উৎপত্তি ইত্যাদিৰ বিষয়ে বর্ণনা পোৱা যায়।

আয়ুর্বেদ শাস্ত্রৰ বৈশিষ্ট্য -

সকলোবিলাক শাস্ত্রৰ ভিতৰত আয়ুর্বেদ শাস্ত্রৰ বৈশিষ্ট্য অন্যতম। আয়ুর্বেদ শাস্ত্রই স্বাস্থ্যজনক জ্ঞান আমাক প্রদান কৰে। অর্থাৎ স্বাস্থ্য কেনেকৈ আমি সু স্বাস্থ্য কৰি ৰাখিব পাৰো, স্বাস্থ্যৰ ৰক্ষণাবেক্ষণ আমি কেনেকৈ কৰিব পাৰো, ৰোগাক্রান্ত অর্থাৎ ৰোগত পীড়িত লোকসকলৰ ৰোগ কেনেকৈ নিবাৰণ কৰিব পাৰি ইত্যাদি সকলোবিলাক বিষয়ৰ জ্ঞান আয়ুর্বেদ শাস্ত্রই প্রদান কৰে।

আয়ুর্বেদ শাস্ত্রৰ মূল বৈশিষ্ট্য হ'ল - আয়ুর্বেদ শাস্ত্রই স্বাস্থ্য সংৰক্ষণৰ মূল নীতি বহন কৰে। অর্থাৎ কেৱল ৰোগ উপশমেই নহয় ইয়াৰ উপৰিও ৰোগাক্রান্ত নহৈ কেনেকৈ আমি নিজকে সুস্বাস্থ্যবান কৰি ৰাখিব পাৰো তাৰ জ্ঞানো আমাক আয়ুর্বেদেই দিয়ে। সেইবাবে জীৱনৰ প্রতিপদে আয়ুর্বেদ শাস্ত্রৰ মূল্য বা বৈশিষ্ট্য আমি দেখিবলৈ পাঁও।

আয়ুর্বেদ অনুসৰি, মানুহ কেৱল শাৰীৰিক উৎকর্ষ সাধনৰ দ্বাৰাই স্বাস্থ্যৱান হ'ব নোৱাৰে। ইয়াৰ বাবে মানসিক উৎকর্ষ সাধনৰো বিশেষ প্রয়োজন আছে। সেয়েহে মানসিক উৎকর্ষ প্রাপ্তিৰ

বাবে আয়ুর্বেদ গ্ৰন্থৰ ঠায়ে ঠায়ে সৎ বাক্য, সদাচাৰ আদি সমাৰিষ্ট হৈ আছে।

আয়ুর্বেদ শাস্ত্ৰৰ উৎস ঃ

ভাৰতবর্ষত প্ৰাচীন কালৰ পৰা আৰম্ভ কৰি অধুনা পর্যন্ত আয়ুর্বেদৰ ব্যাপক অনুশীলন পৰিলক্ষিত হয়। অন্য শাস্ত্ৰবোৰৰ নিচিনাকৈ আয়ুর্বেদ শাস্ত্ৰৰো নিপুণ আচার্যসকলৰ নামৰ আমি উল্লেখ পাঁও। সেই অনুসৰি ভৰদ্বাজ, আত্রেয়, অগ্নিবেশ, জাতুকর্ণ, ভেল, হাৰীত, ক্ষাৰপাণি, ধনন্তৰি ইত্যাদি প্ৰধান।

আয়ুর্বেদ শাস্ত্ৰত বিশেষকৈ বৈদিক দেৱতা যেনে— সূর্য্য, ৰুদ্ৰ, অশ্বিনী কুমাৰ, ব্ৰহ্মা, বিষ্ণু, নাৰায়ণ, শিৱ প্ৰভৃতি দেৱতাসকল ৰোগ নিৰাময়ৰ আধিকাৰিক ৰূপে অভিনন্দিত হয়।

ইয়াৰ উপৰিও চিকিৎসা গ্ৰন্থৰ প্ৰণেতা ৰূপেও দেৱতাসকলৰ নাম পোৱা যায়—

1] প্ৰজাপ্ৰতি ব্ৰহ্মাৰ দ্বাৰা ৰচিত ব্ৰহ্ম সংহিতা।

2] অশ্বিনী কুমাৰ দ্বয়ৰ দ্বাৰা ৰচিত অশ্বিনী কুমাৰ সংহিতা আৰু নাড়ী নিদান।

3] শিৱ প্ৰণিত কৈলাশ কাৰক আৰু বৈদ্য ৰাজতন্ত্ৰ।

4] চক্ৰপাণি দত্তৰ দ্বাৰা প্ৰণিত শৈৱ সিদ্ধান্ত।

বিশেষকৈ অর্থববেদৰ ভৈষজ্য সূক্তত থকা মন্ত্ৰবিলাকত ঔষধি বৃক্ষবোৰৰ প্ৰয়োগৰ দ্বাৰা ৰোগ নিৰাময়ৰ বিধান আলোচনা হোৱা দেখা যায়। ইয়াৰ উদ্দেশ্য আছিল যে ভাৰতবর্ষত উৎপন্ন হোৱাত বৃক্ষবিলাকৰ বিবিধ শাখা বিলাকৰ প্ৰয়োগৰ দ্বাৰা বিধি নিৰাময়ৰ ব্যৱস্থা কৰা।

বিভিন্ন আয়ুর্বেদশাস্ত্ৰ সমূহৰ উল্লেখ -

আয়ুর্বেদৰ ক্ষেত্ৰত অতি প্ৰাচীন আৰু সমৃদ্ধ সংকলন হৈছে চৰক সংহিতা। এই গ্ৰন্থৰ লেখক হৈছে চৰক তাৰ পৰৱর্তিকালত সুশ্ৰুত সংহিতাত প্ৰসিদ্ধ হয়। এই গ্ৰন্থখন মহাকবি সুশ্ৰুতৰ দ্বাৰা সংকলিত। কায় চিকিৎসাৰ প্ৰাচীন আচার্য্য আছিল আত্রেয়। বৃদ্ধ বাগভট্টদেৱৰ দ্বাৰা ৰচিত আয়ুর্বেদ শাস্ত্ৰমূলক গ্ৰন্থ হৈছে অষ্টাংগহৃদয়। পুনৰ বাগভট্ট দেৱে অষ্টাংগ সংগ্ৰহ নামৰ গ্ৰন্থ এখনো ৰচনা কৰে। ভৈষজ্য তত্বৰ ওপৰত আধাৰ কৰি মধ্যযুগত দুখন গ্ৰন্থ বিৰচিত হয়। সেই দুখন হৈছে— চক্ৰপাণি দত্তদেৱৰ দ্বাৰা ৰচিত দ্ৰব্য গুণ সংগ্ৰহ আৰু ৰাজৱল্লভ দ্বাৰা ৰচিত 'দ্ৰব্য গুণ' গ্ৰন্থ।

পশুচিকিৎসা- প্ৰাচীন কালত পশু চিকিৎসাৰ অতি বহুল চিকিৎসা পৰিলক্ষিত হয়। পশুচিকিৎসাৰ তিনিটা শাখা উপলব্ধ -

1] হস্তী চিকিৎসা।

2] অশ্ব চিকিৎসা।

3] গৰু আদি পশুৰ চিকিৎসা।

প্ৰাচীন পশু চিকিৎসা মূলক গ্ৰন্থকেইখনমানৰ নাম হ'ল - নীলকণ্ঠ দেৱৰ দ্বাৰা ৰচিত মাতংগ লীলা, নাৰায়ণ দীক্ষিত দেৱৰ দ্বাৰা ৰচিত 'গজ গ্ৰহণ' প্ৰকাৰ ইত্যাদি। পুনৰ অশ্ব চিকিৎসাৰ সৈতে সম্বন্ধিত কেইখনমান প্ৰসিদ্ধ গ্ৰন্থ হ'ল— 'অশ্বশাস্ত্ৰম', 'অশ্ব তন্ত্ৰম', 'অশ্ব চিকিৎসা', 'অশ্ব আয়ুর্বেদঃ', 'তুৰগ পৰীক্ষা' আদি।

বাস্তুশাস্ত্রৰ পৰিচয় -

সংস্কৃত সাহিত্যৰ অন্তর্গত বৈজ্ঞানিক সাহিত্যৰ ভিতৰত বাস্তু বিদ্যা অন্যতম। এই শাস্ত্রত গৃহ নির্মাণৰ লগত জড়িত বিষয়বোৰৰ উল্লেখ পোৱা যায়। অর্থাৎ গৃহ বিষয়ক নিয়মৰ যি শাস্ত্রত উল্লেখ পোৱা যায় সেই শাস্ত্রই হৈছে বাস্তু শাস্ত্র।

প্রাচীন তথা মধ্যযুগত হিন্দু, বৌদ্ধ, জৈন, ইছলাম ধর্মীয় ৰজাসকলৰ শাসনৰ কালত কলাবিদসকলে বিভিন্ন স্থাপত্য কলা, ভাস্কর্য্য, শিল্প, তথা উৎকৃষ্ট শিল্প কর্মৰ দ্বাৰা বাস্তু শাস্ত্রৰ ভাণ্ডাৰ চহকী কৰি থৈ গৈছে।

শিল্প শাস্ত্রৰ প্রাধান আলোচ্য বিষয়বস্তু বোৰ হ'ল— চিত্রকলা, মূর্তিকলা, ভাস্কর্য্য, স্থাপত্য ইত্যাদি। শিল্পশাস্ত্র অথবা বাস্তু বিদ্যা হৈছে বিভিন্ন প্রকাৰৰ গৃহ নির্মাণ পদ্ধতি তথা গৃহবোৰৰ সুফল কুফলৰ বিষয়ে আলোচনা কৰা শাস্ত্র। প্রাচীন কালৰ পৰাই ভাৰতবর্ষত বাস্তু বিদ্যাৰ উৎকর্ষ সাধন হোৱা দেখা যায়। বিধি সম্মত ৰূপত যি গৃহ নির্মাণ কৰা হয় সেই গৃহ মংগলদায়ক বুলি কোৱা হয়।

বাস্তু শাস্ত্রৰ উৎস —

সংস্কৃত সাহিত্যৰ অন্তর্গত পুৰাণবোৰ ভাৰতীয় সাহিত্য শিল্প সংস্কৃতিৰ আকাৰ গ্রন্থ। ভাৰতীয় সকলো বিদ্যাৰ, বিবিধ শাখাৰ, জ্ঞান তথা বিজ্ঞানৰ অৱদান স্বৰূপ হৈছে পুৰাণ। বাস্তু শাস্ত্রৰো প্রধান উৎস হৈছে পুৰাণ। ঋকবেদীয় কালৰ পৰা আৰম্ভ কৰি ব্রাহ্মণ উপনিষদীক কালতো বাস্তু শাস্ত্রৰ অধ্যয়নৰ বিষয়ে উল্লেখ পোৱা যায়।

ছান্দোগ্য উপনিষদত উল্লেখ আছে যে সনতকুমাৰৰ পৰা নাৰদে বিভিন্ন শাস্ত্রৰ অধ্যয়নৰ সৈতে বাস্তু শাস্ত্রৰো অধ্যয়ন কৰিছিল। বৌদ্ধসকলৰ আৰু জৈন সকলৰ বাস্তু শাস্ত্রৰ উন্নতিৰ ক্ষেত্রত মহৎ অৱদান পৰিলক্ষিত হয়। দক্ষিণ ভাৰতৰ মন্দিৰ, বিহাৰ ভৱন স্তম্ভ ইত্যাদিত প্রাচীন ভাৰতৰ বিখ্যাত গৃহ নির্মাতাৰ বুদ্ধি মত্তাৰ তথা নৈতিক উৎকর্ষ সাধনৰ পৰিচয় পোৱা যায়।

বিভিন্ন বাস্তুশাস্ত্রবোৰৰ উল্লেখ -

বাস্তু শাস্ত্রৰ প্রধান আচার্য্য ৰূপে বিষ্ণু, সনদ কুমাৰ, বিশ্বকর্মা, কাশ্যপ, ময় প্রভৃতি আচার্য্যসকলৰ নাম সুবিখ্যাত। প্রাচীন কালৰ প্রসিদ্ধ বাস্তুশাস্ত্রবোৰৰ ভিতৰত প্রায় 50 খনৰো অধিক বাস্তুশাস্ত্রমূলক গ্রন্থ ৰচিত হোৱা বুলি অনুমান কৰা হয়। কিন্তু বর্তমান সময়ত সকলো বিলাক গ্রন্থ উপলব্ধ নহয়। সেহবোৰৰ ভিতৰত প্রধান গ্রন্থবোৰ হ'ল —

1] বাস্তুবিদ্যা
2] মনুষ্যালয়চন্দ্রিকা
3] শ্রীজ্ঞানৰত্নকোষ
4] ময়মতম
5] অপৰাজিতাপৃচ্ছা
6] প্রাসাদমঞ্জৰী
7] বাস্তুমঞ্জৰী

8] প্রাসাদমণ্ডলম

9] বাস্তুকর্ম

10] কাশ্যপসংহিতা

11] শিল্পৰত্নম

পুনৰ বাস্তুশাস্ত্র বিষয়ক অন্য এখন প্রসিদ্ধ গ্রন্থ হ'ল - ভুজ দেৱৰ দ্বাৰা ৰচিত 'শমৰাংগণ সূত্রধাৰ'। ঈশ্বৰচন্দ্র শাস্ত্রী মহোদয়ৰ দ্বাৰা ৰচিত 'যুক্তি কল্পতৰু' গ্রন্থও বাস্তুশাস্ত্রমূলক প্রসিদ্ধ গ্রন্থ। এইখন গ্রন্থৰ 23 নং অধ্যায়ত বাস্তু নির্মাণৰ বিষয়ে উল্লেখ পোৱা যায়। বৰাহমিহিৰৰ দ্বাৰা ৰচিত বৃহৎসংহিতাৰ গ্রন্থৰ 53 সংখ্যক তথা 56 নং সংখ্যক অধ্যায়ত বাস্তুবিদ্যামূলক বিষয়ৰ উল্লেখ পোৱা যায়।



१२.७ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- अध्यायात् आयुर्वेदशब्दस्य अर्थः,आयुर्वेदस्य स्रोतः, लक्षणञ्च ज्ञातवन्तः।
- आयुर्वेदस्य भिन्नानां विभागानां ज्ञानं लब्धवन्तः।
- आयुर्वेदीयग्रन्थानां तथा च लेखकानां ज्ञानं लब्धवन्तः।
- वास्तुशास्त्रस्य उद्भवविषयकं ज्ञानम् अपि लब्धवन्तः।
- वास्तुशास्त्रीयग्रन्थानां तथा च लेखकानां ज्ञानं लब्धवन्तः।



१२.८ ज्ञानाधिक्यम्

१) संस्कृत साहित्यৰ ইতিবৃত্ত, থানেশ্বৰ শর্মা, গুৱাহাটী চন্দ্রপ্রকাশ ।

२) संस्कृत साहित्यৰ বুৰঞ্জী, হৰমোহনদেৰ গোস্বামী, গুৱাহাটী ঃ বুকলেণ্ড।

३) संस्कृतसाहित्येतिहासः; आचार्य लोकमणि दाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी- २०१६।

४) वेदों में विज्ञान,चतुर्थ संस्करण- २०२२; डॉ कपिलदेव द्विवेदी, विश्वभारती अनुसंधान परिषद, ज्ञानपुर।

५) A History of Classical Sanskrit Literature, Krishnamachariar, new Delhi: MLBDI.



१२.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : आयुर्वेदशास्त्रस्य निदर्शनम् अथर्ववेदे प्राप्यते।

प्रश्नः २ उत्तरम् : आयुर्वेदशास्त्रस्य अष्टौ प्रधानाङ्गानि सन्ति।

प्रश्नः ३ उत्तरम् : चरकेन संकलितम् आयुर्वेदशास्त्रम् अग्निवेशेन रचितम्।

प्रश्नः ४ उत्तरम् : 'अष्टाङ्गहृदयम्' वृद्धवाग्भटस्य रचना।

प्रश्नः ५ उत्तरम् : अश्वसम्बन्धीयग्रन्थद्वयोः नाम यथा - अश्वशास्त्रम्, अश्वतन्त्रं च।

प्रश्नः ६ उत्तरम् : आयुर्वेदशास्त्रस्य केचनाचार्याणां नामानि यथा - भरद्वाज-आत्रेय-अग्निवेश-जातुकर्ण-भेल-हारीतादयः।

प्रश्नः ७ उत्तरम् : ब्रह्मसंहिता प्रजापतिब्रह्मणा प्रणीता।

प्रश्नः ८ उत्तरम् : 'चिकित्सातत्त्वविज्ञानम्' धन्वन्तरिणा प्रणीतम्।

प्रश्नः ९ उत्तरम् : कायचिकित्सायाः प्रधानाचार्यः आत्रेयः।

प्रश्नः १० उत्तरम् : गजग्रहणप्रकारः नारायणदीक्षितेन विरचितः।

प्रश्नः ११ उत्तरम् : आयुर्वेदे दोषाः त्रिविधाः। ते दोषाः यथा- वातः, पित्तम्, कफश्चेति।

प्रश्नः १२ उत्तरम् : प्राचीनभारतवर्षे रचितानां केचन वास्तुशास्त्रग्रन्थानां नामानि यथा- वास्तुविद्या, मनुष्यालयचन्द्रिका, मयमतम्, अपराजितापृच्छा, प्रासादमञ्जरी आदयः।

प्रश्नः १३ उत्तरम् : 'वास्तु' शब्दस्यार्थः निवासकरणम्।

प्रश्नः १४ उत्तरम् : 'समराङ्गनसूत्रधारः' ग्रन्थस्य रचकः भोजदेवः।

प्रश्नः १५ उत्तरम् : बृहत्संहिताग्रन्थस्य रचकः वराहमिहिरः।

प्रश्नः १६ उत्तरम् : वास्तुविद्याम् आङ्गलभाषायाम् 'Architecture' इत्युच्यते।

प्रश्नः १७ उत्तरम् : वास्तुविद्यायाः अपरं नाम स्थपतिविद्या।

प्रश्नः १८ उत्तरम् : वास्तुशास्त्रस्य प्रधानोत्सः पुराणानि।

प्रश्नः १९ उत्तरम् : वास्तुशास्त्रस्य केचन प्राचीनाचार्याणां नामानि यथा - विष्णु-सनत्कुमार-विश्वकर्मा-काश्यप-मयादयः।

प्रश्नः २० उत्तरम् : 'युक्तिकल्पतरुः' ग्रन्थस्य कर्ता ईश्वरचन्द्रशास्त्री।



१२.१० अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: आयुर्वेदः नाम किम्?

प्रश्नः २: आयुर्वेदस्य कति विभागाः सन्ति ?

प्रश्नः ३: वास्तुशास्त्रं नाम किम् ?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

टिप्पणी देया

१. कायचिकित्सा

२. शल्यचिकित्सा

३. पशुचिकित्सा

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

१. आयुर्वेदमधिकृत्य एको लेखो विलिख्यताम्।

२. वास्तुशास्त्रमधिकृत्य प्रबन्धरेको विरच्यताम्।

*** ***** ***

अध्यायः १३ : वैज्ञानिकसाहित्यम् (गणितविद्या, ज्योतिर्विद्या च)

अध्यायस्य संरचना

१३.१ उद्देश्यम्

१३.२ परिचयः

१३.३ खगोलशास्त्रस्य परिचयः/ ज्योतिर्विद्यायाः परिचयः

- १३.३.१ खगोलशास्त्रचर्चायाः/ज्योतिर्विद्याचर्चायाः उद्देश्यानि विभागाश्च
- १३.३.२ खगोलशास्त्रस्य स्रोतः/ज्योतिर्विद्यायाः उत्सः
- १३.३.३ विविधानां खगोलशास्त्राणामुलेखः/विविधज्योतिर्विद्यागतशास्त्राणाम् उल्लेखः

१३.४ शब्दावली/शब्दार्थतालिकाः

१३.५ गणितविद्या/गणितशास्त्रस्य परिचयः

- १३.५.१ गणितविद्यायाः स्रोतः
- १३.५.२ विविधगणितशास्त्राणामुल्लेखः

१३.६ अध्यायस्य असमीयाभाषायां सारांशः

१३.७ अध्यायात् किमवगतम्

१३.८ ज्ञानाधिक्यम्

१३.९ अग्रगत्याः निरूपणम्

१३.१० अभ्यासप्रश्नाः

१३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- खगोलशास्त्रस्य परिचयं प्राप्नुवन्ति।
- ज्योतिर्विद्यायाः परिचयं प्राप्स्यन्ति।
- खगोलशास्त्रस्य ज्योतिर्विद्यायाः वा स्रोतस्य विभागानां च विषये ज्ञातुं शक्ष्यन्ति।
- विभिन्नखगोलीयशास्त्रविषये ज्ञानं प्राप्स्यन्ति।
- गणितविद्यायाः परिचयं ज्ञातुं शक्ष्यन्ति।
- गणितशास्त्रस्य स्रोतांशानां विषये ज्ञातुं शक्ष्यन्ति।
- विभिन्नगणितीयविषयाणां/गणितशास्त्रविषये ज्ञातुं शक्ष्यन्ति।

१३.२ परिचयः

पूर्वाध्याये भवद्भिः वैज्ञानिकसाहित्ये आयुर्वेदस्य वास्तुविद्यायाः च संक्षिप्तं ज्ञानं प्राप्तम्। अस्य अध्यायस्य अध्ययनेन भवन्तः खगोलशास्त्रस्य गणितविद्यायाः च विस्तृतं ज्ञानं प्राप्नुवन्ति। खगोलशास्त्रस्य/ ज्योतिर्विद्यायाः गणितशास्त्रस्य च प्राचीनकालादेव चर्चा प्राप्यते। ज्योतिषां सूर्यादिग्रहणबोधकं शास्त्रम्। अर्थात् सूर्यादिग्रह-काल-वर्णनात्मकं शास्त्रमेव खगोलशास्त्रं/ ज्योतिर्विद्या वा कथ्यते। खगोलशास्त्रे ज्योतिर्विद्यायां वा प्रधानतः ग्रह-नक्षत्र-धूमकेतु-प्रभृतीनां खगोलीयवस्तूनाम् प्रकृति-संचरण-परिभ्रमण-काल-ग्रहण-स्थान-प्रभृति नभोमण्डलस्य विविधविषयकालोचनात्वात् तत् ज्योतिर्विद्या खगोलशास्त्रं वेति निगद्यते।

इदानीं भवन्तः खगोलशास्त्रस्य परिचयं, खगोलशास्त्रस्य उद्देश्यं विभागान् , खगोलशास्त्रस्य उत्सस्थलानि स्रोतांसि वा, विविधानां खगोलशास्त्राणां नामानि च ज्ञास्यन्ति। तदतिरिच्य गणितशास्त्रस्य परिचयं, तस्य स्रोतः, विविधगणितविषयकशास्त्राणां नामानि च भवन्तः ज्ञास्यन्ति।

१३.३ खगोलशास्त्रस्य ज्योतिर्विद्यायाः वा परिचयः

प्राचीनभारते टेलिस्कोपस्य वाननिरीक्षण्याः दूरदर्शनस्य वा आविष्कारात् प्रागेव खगोलशास्त्रस्य चर्चा आसीत्। वैदिकक्रियाकाण्डस्य यथायथकालनिर्धारणाय ज्योतिर्विद्यायाः ज्ञानम् आवश्यकम्। राशि-नक्षत्र-अमावस्या-पूर्णिमा-संक्रांति-संवत्सरादीनां ज्ञानाभावे वैदिकयज्ञानुष्ठानकरणम् असम्भवम्। ज्योतिर्विद्यायाः खगोलशास्त्रस्य वा (Astronomy) वैदिकयज्ञानुष्ठानैः सह निकटसम्बन्ध अस्ति। अतः वैदिकयज्ञार्थं विशेषतया तिथि-नक्षत्र-संक्रान्ति-संवत्सराणां ज्ञानम् अपरिहार्यम्। यथा - 'गवामयनम्' नाम यज्ञ एकवर्षे एव समाप्तो भवति। अभिप्लवषडह इत्यादीनि यज्ञानुष्ठानानि षड्दिनेषु सम्पादितव्यानि। अतः संवत्सर-दिन-मास-पक्षाणां ज्ञानेन विना एतेषां यज्ञानाम् अनुष्ठानं कर्तुं न शक्यते।

तदतिरिक्तं केचन वैदिकसंस्काराः ऋतुविशेषे सम्पाद्यन्ते, यथा तैत्तिरीयब्राह्मणे उच्यते , वसन्तऋतौ क्षत्रियैः, शरद्ऋतौ वैश्यैः अग्निस्थापनम् आधानं वा करणीयं भवतीति।

१३.३.१ खगोलशास्त्रस्य/ज्योतिर्विद्यायाः उद्देश्यानि विभागाश्च

अधुना भवन्तः खगोलशास्त्रस्य/ज्योतिर्विद्यायाः चर्चाया उद्देश्यानां विभागानाञ्च विषये ज्ञातुं शक्ष्यन्ति।

ज्योतिर्विद्यायां खगोलशास्त्रे वा भारतस्य गौरवपूर्णं योगदानं विशेषतया स्मरणीयम् अस्ति। खगोलशास्त्रं/ज्योतिर्विद्या द्विधा विभक्तम् -

१. (Astronomy) - ज्योतिर्विद्या/खगोलविज्ञानम् (गणितज्योतिषम्)

२. Astrology - (ज्योतिषशास्त्रम्) - फलितज्योतिषम् इति कथ्यते। खगोलशास्त्रे/ज्योतिर्विज्ञाने 'ज्योतिषम्' इति पदस्य व्यापकार्थे प्रयोगो भवति।

खगोलशास्त्रस्य मुख्यविषयो भवति - ग्रह-नक्षत्रप्रभृति खगोलीयवस्तूनाम् ज्योतिषपदार्थसम्बद्धतथ्यानाम् अनुसन्धानम्। वैदिकयागयज्ञस्य विविधानुष्ठाने ग्रहनक्षत्राणाम् अवस्थानम्, अहोरात्रविभागः, अमावस्या-पूर्णिमादितिथीनां पर्यालोचनाप्रभृतिप्रसङ्गादेव वेदाङ्गज्योतिष उद्भवो भवति। वेदानां षट् व्यवहारिकाङ्गेषु ज्योतिषशास्त्रम् अन्यतमम् अस्ति। वेदाङ्गज्योतिषे सूर्यचन्द्रयोः गतिः, उत्तरायणदक्षिणायनविभागः, पूर्णिमा-अमावस्या-निरूपणम्, ऋतुविभागः, मास-पक्ष-दिन-तिथि-निर्णयः, सौर-चन्द्रग्रहण-निर्णयः, इत्यादिविषय आलोचितोऽस्ति।

अतः याग-यज्ञस्तथा वैदिकविविधानुष्ठानस्य नियम-पद्धतिप्रयोगोद्देश्येन ज्योतिर्विद्यायाः चर्चा क्रियते।

१३.३.२ खगोलशास्त्रस्य स्त्रोतः/ज्योतिर्विद्यायाः उत्सः

इदानीं भवन्तः खगोलशास्त्रस्य/ज्योतिर्विद्याया उद्देश्यं विभागान् च ज्ञात्वा खगोलशास्त्रस्य स्त्रोतांसि/ज्योतिर्विद्याया उत्सस्थलानि ज्ञास्यन्ति।

वैदिकयुगे ऋग्वेदस्य यजुर्वेदस्य च अन्तर्गतवेदाङ्गज्योतिषः नामधेयो ग्रन्थो भवति प्राचीनतमं संस्करणम्। 'आथर्वनज्योतिषः' इति अथर्ववेदस्य पृथग् ज्योतिषग्रन्थस्य उल्लेखः प्राप्यते। यद्यपि एतेषां ग्रन्थानाम् अनन्तरं बहुशताब्दीपर्यन्तं कश्चिदपि ग्रन्थो नोपलब्धः तथापि तत्कालीनाचार्याणां नामानि उपलभ्यन्ते। तेषु - नारदः, पराशरः, वृद्धः, गर्गः, पौष्करसादी इत्यादय उल्लेखनीयाः। परवर्तिग्रन्थेषु एतेषाम् आचार्याणां रचनांशः उद्धियते।

१३.३.३ नानाखगोलग्रन्थानाम् उल्लेखः/विविधज्योतिर्विद्याशास्त्राणामुल्लेखः

खगोलशास्त्रस्य/ज्योतिर्विद्यायाः स्त्रोतांसि ज्ञात्वा इदानीं भवन्तः खगोलशास्त्रस्य पुस्तकानां विषये ज्ञास्यन्ति।

वैदिककालानन्तरम् अर्थात् परवर्तिकाले ग्रहनक्षत्राणां अवस्थानानां प्रभावानां च अध्ययने खगोलशास्त्रेण/ज्योतिर्विद्यया बहुधा प्रसिद्धि अर्जिता आसीत्। भारतस्य प्रमुखाः खगोलशास्त्रज्ञाः/ज्योतिर्विज्ञानिनः तथा च तेषां खगोलशास्त्रस्य पुस्तकानि यथा-

१) आर्यभट्टः प्रथमः (४७६ ई.) - क) आर्यभट्टीयसिद्धान्तः
ख) आर्याष्टशतकम्
ग) दशगीतिकासूत्रम्

२) वराहमिहिरः (५०५ ई.)- क) पञ्चसिद्धान्तिका
ख) बृहत्संहिता

३) ब्रह्मगुप्तः (५९८ ई.)- क) ब्रह्मस्फुटसिद्धान्तः
ख) खण्डखाद्यकः

४) भास्करः प्रथमः (६०० ई.)- क) आर्यभट्टीयः
ख) महाभास्करीयः
ग) लघुभास्करीयः
५) बटेश्वरः (८८० ई.)- क) बटेश्वरसिद्धान्तः
६) मञ्जुलः (९३२ ई.)- क) लघुमानसम्
७) आर्यभट्टः द्वितीयः (९५० ई.) - क) महासिद्धान्तः
८) भास्करः द्वितीयः (१११४ ई.)- क)सिद्धान्तशिरोमणिः
ख) कर्णकुतुहलम्
९) परमेश्वरः (१४०० ई.)- क) दिग्गणितम् (अंकगणितम्)
ख) सूर्यसिद्धान्तविवरणम्
ग) भट्टदीपिका
१०) नीलकण्ठसोमयाजी (१४४४ ई.)- क) तन्त्रसंग्रहः
ख) आर्यभट्टीयभाष्यम्

उपर्युक्तखगोलशास्त्रविषयकग्रन्थानां ग्रन्थकारानां च विषये संक्षिप्तचर्चा अधः विधीयते - -

१) प्रथमः आर्यभट्टः - प्राचीनभारतीयखगोलशास्त्रस्य/ज्योतिर्विद्यायाः (Scientific Astronomy) वास्तविकः संस्थापक आर्यभट्टः प्रथम आसीत्। अल्बेरुणीवर्यस्य वर्णनानुसारम् असौ कुसुमपुरस्य निवासी अस्ति। असौ खगोलशास्त्रज्ञसङ्घे 'वृद्धार्यभट्टः' 'सर्वसिद्धान्तगुरुः' चेति नामाभ्यां प्रसिद्धः। आर्यभट्टः सर्वप्रथमं 'भूभ्रमणवादः' इति सिद्धान्तस्य अर्थात् अहोरात्रस्य - चक्रस्य/आवर्तनस्य कारणत्वेन पृथिव्याः चुम्बकीयगतिसिद्धान्तं(आह्निकगतिसिद्धान्तं) प्रस्तावितवान्। असौ पाश्चात्य-खगोलशास्त्रज्ञकोपर्निकससदृशान् निष्कर्षान् स्थापयित्वा विश्वप्रसिद्धः अभवत्। आर्यभट्टप्रथमस्य नाम्ना ग्रन्थत्रयं लभ्यते -

१) आर्यभट्टीयः सिद्धान्तः
२) आर्याष्टशतकम् (त्रिषु परिच्छेदेषु समाप्तम्)
यथा- क) गणितम् (Mathematics and Geometry)
ख) कालक्रिया / कालमापनम् (Measurement of time)
ग) गोलः (Astronomy)
३) दशगीतिकासूत्रम्

आर्यभट्टः प्रथमं प्राचीनवैदिकज्योतिषशास्त्रस्य प्रचलितपद्धतिं संस्कृत्य स्वस्य शुद्धनिष्कर्षान् स्थापितवान्। स एव प्रथमं कलियुगस्य आरम्भकालं निर्धारयति। ज्योतिर्विज्ञाने आर्यभटप्रथमस्य उल्लेखनीयेषु योगदानेषु सन्ति - सूर्यस्य अन्यग्रहाणां च परिभ्रमणम् आवर्तनं वा, तेषां कक्षः/परिवृत्तम्, ग्रहगतेः व्याख्या, त्रिकोणमितिः, मानं,

मूल्यानि, योगफलं, संख्यायाः वर्गाः, घनयोगाः च इत्यादीनां निर्णयप्रभृतयः सन्ति। आर्यभट्टः प्रथमं संस्कृतवर्णमालायाम् अक्षराणां विशिष्टमूल्यानि (निर्द्दिष्टमानविन्यासं) स्थापयित्वा संख्यागणनाया अभिनवविधिम् आविष्कृत्य स्वग्रन्थेषु प्रयुक्तवान्। तस्य ग्रन्थस्य भाष्यकाराः/टीकाकाराः भवन्ति – लाटदेवः, प्रथमः भास्करः, लल्लः चेति।

२) ब्रह्ममिहिरः – खगोलशास्त्रस्य/ज्योतिर्विद्यायाः अपरः प्रमुखः आचार्योऽस्ति वराहमिहिरः। तस्य जन्म ईशवीयषष्ठशताब्द्यां ५०५ तमे वर्षे काम्पिल्ये अर्थात् वर्तमनस्य जालन्धरमण्डलस्य काम्पीति स्थाने अभवत्। वराहमिहिरः राज्ञो विक्रमादित्यस्य राजसभायाः नवरत्नेषु अन्यतम आसीत्। तस्य पञ्चसिद्धान्तिका इति रचनातः वयं प्राचीनतरपञ्चपूर्वसिद्धान्तानां विषये ज्ञातुं शक्ष्यामः।

१) पौलिशसिद्धान्तः

२) रोमकसिद्धान्तः

३) वशिष्ठसिद्धान्तः

३) पितामहसिद्धान्तः

५) सूर्यसिद्धान्तः

तदतिरिक्तं वराहमिहिरः बृहत्संहिता इति ज्योतिषग्रन्थं, बृहज्जातकं, लघुजातकं चेति फलितज्योतिषविषयकग्रन्थं रचितवान्।

पौलिश्-रोमकश्च इति सिद्धान्तद्वयं ग्रीक-बेबिलोनयो एकमुत्समधिकृत्य प्रस्तुतम्।

वशिष्ठसिद्धान्ते तारानक्षत्राणां अवस्थानविषये स्थितिविषये वा चर्चा कृता अस्ति। अस्य श्लोकाः अनुष्टुप्छन्दसा रचिताः सन्ति।

पितामहसिद्धान्तः ब्रह्मसिद्धान्तो वा ऋषिलगधेन रचितः यस्य वेदङ्गज्योतिषेण सह समानतास्ति।

'सूर्यसिद्धान्त' इति खण्डे सूर्यचन्द्रयो आवर्तनविषये परिभ्रमनविषये चर्चिता अस्ति। तत्र युगवर्षमासदिनादिविषयकवर्णना अस्ति।

पञ्चसिद्धान्तिका इति ग्रन्थस्य सूर्यसिद्धान्तः सर्वतो महत्त्वपूर्णः। मल्लिकार्जुनसुरिणा तेलुगुभाषायां संस्कृतभाषायां च अस्य भाष्यं लिखितवान्।

३) ब्रह्मगुप्तः– प्राचीनभारते आर्यभट्टप्रथम-ब्रह्ममिहिरयोः परं तृतीयः प्रमुखः खगोलशास्त्रज्ञः ज्योतिर्विज्ञानी आसीत् ब्रह्मगुप्तः। तस्य जन्म इदानीन्तनस्य पञ्जाबप्रदेशस्य मुलतानमण्डलान्तर्गते भिन्दमलनामके ग्रामे ५९१ तमे ईशवीये वर्षे अभवत्। ६२८ तमे वर्षे मात्रं २० वर्षवयसि असौ ब्रह्मस्फुटसिद्धान्तः, खण्डखाद्यकः चेति ग्रन्थद्वयं रचितवान्। तस्य ग्रन्थात् सः ज्योतिर्विज्ञानम् व्यतिरिच्य गणितशास्त्रस्यापि अभ्यासम् अनुशीलनं च कृतवान् इति ज्ञायते। अमरराजेन ब्रह्मस्फुटसिद्धान्तस्य टीका लिखिता।

४) भास्करः प्रथमः – भास्करः प्रथमोऽस्ति विश्वविश्रुतः खगोलशास्त्रज्ञः/

ज्योतिर्विज्ञानी गणितज्ञः च। स आर्यभट्टस्य मार्गदर्शक आसीत्। तस्य जन्म ६०० तमे ईशवीये वर्षे गुजरातराज्यस्य बलभीनगरे अभवत्। सर्वप्रथमं भास्करः त्रीणि पुस्तकानि रचितवान्। 'महाभास्करीयः', 'लघुभास्करीयः' तथा 'आर्यभट्टभास्करीयः' च। प्रथमः ग्रन्थः आर्यभट्टस्य ग्रन्थाधारितेऽस्ति। अत्र आर्यभट्टस्य कर्मनिबन्धस्योपरि विस्तरेण व्याख्यायते। आर्यभट्टीयस्य खण्डद्वयं विद्यते –

क) दशगीतिकासूत्रव्याख्या,

ख) आर्यभटतन्त्रभाष्यम्।

५) आर्यभट्टद्वितीयः – आर्यभट्टद्वितीय एकः प्रसिद्धः खगोलशास्त्रज्ञः/ज्योतिर्विज्ञानी आसीत्। तेन रचितः ग्रन्थोऽस्ति महासिद्धान्तः। अस्य प्रथमेषु १२ अध्यायेषु खगोलशास्त्रविषयिकी गणितशास्त्रविषयिकी च आलोचनाः सन्ति। अत्र ग्रहनक्षत्रचन्द्रसूर्याणां वर्णनं भवति। अन्तिमयोः द्वयो अध्याययोः ज्यामिति-भूगोल-बीजगणितानां च वर्णना अस्ति।

६) भोजः– धाराराज्यस्य राजा भोजः विद्वज्जनबल्लभः राजमर्तण्डः चेति ज्योतिर्विद्याविषयकग्रन्थौ रचितवान्।

७) भास्करः द्वितीयः (१११४) – भास्कराचार्यद्वितीय आर्यभट्ट-वराहमिहिर-ब्रह्मगुप्तैः पूर्वमेव समृद्धिकृतस्य गणितशास्त्रस्य खगोलशास्त्रस्य च कोषम् इतोऽपि अधिकं समृद्धितवान्। तस्य जन्म १११४ तमे ईशवीये वर्षे महाराष्ट्रे अभवत्। तस्य पितुः नाम महेश्वर आसीत्। सः शाण्डिल्यगोत्रीय आसीत्। ११५० तमे ईशवीये वर्षे ३६ वर्षवयसि सिद्धान्तशिरोमणि इति ग्रन्थं सः लिखितवान् आसीत्। ग्रन्थोऽयं खण्डचतुष्टये विभक्तेऽस्ति –

१) लीलावती वा पाटीगणितम्

२) बीजगणितम्

३) ग्रहगणितम्

४) गोलाध्यायः

सिद्धान्तशिरोमणिग्रन्थे पूर्ववर्तिखगोलशास्त्रज्ञानाम् ज्योतिर्विदां मतानां समालोचना प्राप्यते। प्राचीनाचार्याणां मतस्य खण्डनं कृत्वा भास्कराचार्यद्वितीयः स्वमतानि स्थापितवान्। असौ खगोलशास्त्रज्ञः(ज्योतिर्विद्याविद्) गणितज्ञ अपि च एक सुकवि आसीत्। तेन श्लोकानां वर्णनार्थम् अनुप्रास-यमक-श्लेषाणाञ्च व्यवहारः कृतः। अस्य (श्लोका) पद्यभागः सरलः रसयुक्तः चास्ति। गणितविभागे गणितस्य विविधानि सूत्राणि व्याख्यातानि सन्ति।

तेन ग्रहनक्षत्राणां वर्णनं तेषां परिभ्रमणादिकं 'ग्रहगणितम्' 'गोलाध्याय' चेति खण्डेषु वर्णना कृता अस्ति।

'लीलावती' इति भास्कराचार्यस्य पुत्र्याः नाम। तस्या एव नाम्ना (अंकगणितं)

पाटीगणितं रचितवान् भास्कराचार्यः।

१८८३ तमे ईशवीये वर्षे यदा भास्कराचार्यद्वितीयः ६९ वर्षीयः अभवत् तदा तेन कर्णकुतुहलम् इति अन्यत् खगोलीयग्रन्थः लिखितः। अत्र ग्रहाणाम् आलोचना विद्यते। सिद्धान्तशिरोमणिग्रन्थस्योपरि त्रयः प्रसिद्धाः टीकाग्रन्थाः रचिता अभवन् – वासनाभाष्यं, वासनावार्तिकं, मरीचितिका चेति।

उपर्युक्तग्रन्थकाराणां कृतीनाम् अतिरिक्तं परवर्तिग्रन्थकाराणां ग्रन्थाः भवन्ति –

८. लालः अथवा लल्लाचार्यः – लल्ल अथवा लाल अस्ति एकः ज्योतिर्विद् खगोलशास्त्रज्ञो वा। तस्य प्रसिद्धः ग्रन्थो भवति – शिष्यधीतन्त्रम्। अस्य द्वौ भागौ स्तः। प्रथमे भागे नक्षत्राणांम् अवस्थितिः, तथा द्वितीये भागे आकाशमण्डलस्य वर्णनमस्ति। स आर्यभट्टम् अनुसरति स्म। सः ब्रह्मगुप्तस्य ग्रन्थस्योपरि 'खण्डखाद्यकम्' इति टीकां लिखितवान्। तदुपरि 'ज्योतिषरत्नाकरः' इति ज्योतिषशास्त्रविषयकं पुस्तकमपि लिखितवान्।

९. गोविन्दस्वामी – गोविन्दस्वामी एकः ज्योतिर्विद् ज्योतिषी अस्ति। सः भास्करप्रथमस्य 'लघुभास्करीयः' इति ग्रन्थमधिकृत्य टीकां लिखितवान्।

ज्योतिर्विद्याया अपर एकः भाग अस्ति फलितज्योतिषः। प्राचीनकालादेव भारते ज्योतिषशास्त्रस्य चर्चा परिलक्ष्यते। राजतन्त्रे राजन्यवर्गस्य राजवर्गस्य उच्चवर्गस्य च प्रभावशालिनः जनाः ज्योतिषशास्त्रस्य संरक्षकाः पृष्ठपोषकाः आसन्। फलितज्योतिषशास्त्रस्य मुख्यवर्ण्यविषयाः भवन्ति – ग्रहनक्षत्रादीनां ज्योतिषीयवस्तूनां परिभ्रमणावस्थितिभेदे मानवजीवने पृथिव्यां च तेषां प्रभावस्य अनुसन्धानम् अध्ययनं, तदर्थं परिणामगणना च। अन्यशास्त्रवत् फलितज्योतिषशास्त्रस्यापि आचार्याणां नामानि लभ्यन्ते। तेषु प्रमूखाः– विष्णुगुप्तः, देवस्वामी, जीवशर्मा, पृथुः, शक्तिपूर्वः, सिद्धसेनः, यवानाचार्य इत्यादयः सन्ति। वेदाङ्गज्योतिषकाले फलितज्योतिषस्य पृथक् अस्तित्वं नासीत्। गणितस्य ज्योतिषस्य च सङ्गति आसीत्। वराहमिहिरस्य ग्रन्थेष्वेव फलितज्योतिषस्य लिंगज्योतिषस्य अस्तित्वं विस्तरेण लक्षितम् अस्ति ततः कतिचित् दिनानां परमेव राशिचक्रस्य आधारेण ज्योतिषविधिः राशिगणनापद्धतिः च प्रवर्तिताः।

फलितज्योतिषशास्त्रपरकानि अनेकानि पुस्तकानि सम्प्राप्यन्ते। तेषु वराहमिहिरः सर्वश्रेष्ठः आचार्य। तेन रचिताः पञ्च ग्रन्थाः उपलभ्यन्ते – (१) बृहत्संहिता, (२) बृहत्विवाहपटलः, (३) पल्लवविवाहपटलः, (४) बृहज्जातकम्, (५) लघुजातकञ्च।

अन्याः कृतयः सन्ति – (६)यवनजातकम्, (७)उत्पलपरिमलम्, (८) होराशास्त्रम्, (९) भुगुसंहिता, (१०) विद्यामाधवीयम्, (११)सूर्यसिद्धान्तः, (१२) ज्योतिर्विद्याकरणम्। एवं प्राचीनभारते खगोलशास्त्रस्योपरि अनेकानि पुस्तकानि रचितानि आसन्।



ज्ञातव्यम्

वैज्ञानिकसाहित्येषु ज्योतिर्विद्या खगोलशास्त्रं वा अन्यतमं तथा भारतस्य गौरवपूर्णं च योगदानम् अस्ति। वैदिककाले खगोलशास्त्रस्य चर्चा अभवत् किन्तु तस्मिन् विषये कश्चिदपि ग्रन्थो न प्राप्यन्ते स्म। आर्यभट्टप्रथम एव खगोलशास्त्रस्य/ज्योतिर्विद्यायाः संस्थापकः। पाश्चात्यस्य ज्योतिर्विद् कोपर्निकस इव असौ अपि सिद्धान्तं प्रतिष्ठाप्य विश्वप्रसिद्धः जातः।

भास्कराचार्यद्वितीय अपरः प्रसिद्धः खगोलशास्त्रज्ञः गणितज्ञश्च आसीत्। आर्यभट्टप्रथमः वराहमिहिर-ब्रह्मगुप्तयोः समृद्धिकतां ज्योतिर्विद्यां (खगोलशास्त्रं) इतोऽपि समृद्धं कृतवान्।

१३.४ शब्दार्थतालिका

१) अभिप्लवषडहः – षड्दिनेषु क्रियमाणस्य एकस्य यज्ञस्य नाम।

२) गवामयनम् – एकप्रकारकः यज्ञविशेषः। एषः यज्ञ एकवर्षे एव समाप्तः भवति।

३) वेदाङ्गम् – वेदानां षडङ्गानि। शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् चेति।

४) वेदाङ्गज्योतिषम् – खगोलशास्त्रविषयकः गणितशास्त्रविषयकः च ग्रन्थः। ऋषिलगधविरचितः ग्रन्थोऽयम्।

५) लीलावती – भास्कराचार्यस्य पुत्र्याः नाम। ग्रन्थोऽयं पाटीगणित अङ्कगणितविषमको वा। भास्कराचार्यद्वितीयेन रचिता इयं लीलावती।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: खगोलशास्त्रं किम्? (ज्योतिर्विद्या का?)

.....

प्रश्नः २: आर्यभट्टप्रथमेन रचितस्य एकस्य ग्रन्थस्य नाम लिखत।

.....

प्रश्नः ३: आर्यभटद्वितीयेन लिखितस्य पुस्तकस्य नाम किम्? तत्र कति अध्यायाः सन्ति?

.....

प्रश्न ४: वराहमिहिरेण विरचितस्य कस्यचित् एकस्य ग्रन्थस्य नाम उल्लिख्यताम्।

.....

१३.५ गणितविद्यायाः परिचयः

भवन्तः खगोलशास्त्रं ज्योतिर्विद्यां वा पठितवन्तः। इदानीं भवन्तः गणितविद्यायाः विषये ज्ञास्यन्ति। संख्याभिः गणनाभिः वा या पद्धतिः प्रयुज्यते सा एव गणितविद्या। भारतीयगणितस्य मुख्यशाखाद्वयमस्ति- (१) संख्यागणितम् (अर्थात् पाटीगणितं बीजगणितं च), (२)आकृतिगणितम् (अर्थात् ज्यामितिः)।

गणितशब्दे 'गण' इति शब्दस्य अपरार्थोऽस्ति समष्टिः समुच्चयो वा। अतः समुच्चयेन निर्धारणविधिः गणितम् इति उच्यते। प्राचीनभारते अंकगणितस्य ज्यामितिशास्त्रस्य च विशेषतया उत्कर्षः परिलक्षितः। वैदिकयाग-यज्ञं कर्तुं नानाप्रयोजनार्थं वेदीनिर्माणं क्रियते स्म। तस्मादेव ज्यामितिसंकल्पना उत्पन्ना। अग्नेः कृते त्रिप्रकारकवेदिकाः दृश्यन्ते - १) गार्हपत्यवेदी - वृत्ताकारः २) आहवनीयवेदी - (वर्गाकारः) चतुष्कोणम् ३) दक्षिणाग्निवेदी - अर्धवृत्ताकारः।

अस्य कृते ज्यामितीयाङ्कनप्रथायाः प्रयोजनम् अभ्यासश्च अभवत्। अद्यत्वे समग्रे विश्वे यस्यां पद्धत्यां लिख्यते तस्याः पद्धत्याः नाम दशमलवस्थानीयमानकप्रणाली, अथवा सा संक्षेपेण दशमलवप्रणाली इत्यनेन ज्ञायते।

१३.५.१ गणितविद्यायाः उत्सः

गणितविद्यायाः परिचयानन्तरं भवन्त इदानीम् अस्य उत्सविषये ज्ञास्यन्ति। भारते प्राचीनकालादेव गणितचर्चायाः निदर्शनानि प्राप्यन्ते। गणितं विना शिक्षा अपूर्णा इति चिन्तयते स्म। छान्दोग्योपनिषदि उल्लेख अस्ति यत् नारदः सनत्कुमारं सर्वविद्यानाम् अध्यापनेन साकं राशिविद्याया अर्थात् गणितविद्याया अध्ययनं कर्तुमुक्तवान् आसीत्। अनेन प्रतीयते यत् प्राचीनभारते गणितस्य अभ्यास अनुशीलनं च आसीत्। न केवलं तस्य अनुशीलनाभ्यास अभवत्, अपितु सर्वेषु शास्त्रेषु गणितस्य उच्चतमं स्थानम् आसीत्। वेदाङ्गज्योतिषग्रन्थे उक्तमस्ति यत् 'मयूरस्य शिखा (पक्षः) अग्रे सम्मुखभागे तिष्ठति, सर्पस्य मणि अग्रे सम्मुखभागे तिष्ठति, तथैव वेदाङ्गशास्त्रेषु शीर्षस्थाने गणितस्य अवस्थानम् भवति' इति।

श्रौतसूत्रेषु वैदिकयज्ञव्यवस्थायाः परिचयः प्राप्यते। भारतीयगणितचर्चा मुख्यतया चरणत्रये विभक्ता अस्ति। यथा -

(क) प्राग् आर्ययुगः

(ख) वैदिकस्तथा शुल्बयुगः

(ग) ईशवीयोत्तरयुगः

वैदिकसभ्यता यज्ञस्याधारेण सुप्रतिष्ठिता अस्ति। याग-यज्ञस्य कृते यज्ञवेदीनिर्माणम् अत्यावश्यकम्। यस्मिन् ग्रन्थे यज्ञवेदीनिर्माणस्य यज्ञीयतत्वानां सिद्धान्तानां च आलोचना विद्यते तं ग्रन्थं शुल्बसूत्रम् इति कथ्यते। एतेषु शुल्बसूत्रेषु ज्यामितिविषये

चर्चा भवति।

शून्यस्य आविष्कारेण, दशमलवस्थानीयमानकपद्धत्या उपयोगेन संख्यालेखनस्य विधिरयं प्राचीनभारतीयमनिषीणां प्रसिद्धा उपलब्धिः वर्तते। फ्रान्सदेशीयः गणितज्ञः दार्शनिकः पियेव छाइम द्य लाप्लाछे (Pieb Sime de Laplace १७४९-१८२७ ईशवीये) इत्यनेन अस्याः पद्धतेः विषये टिप्पणी कृता - 'भारतवर्षम् अस्मभ्यम् सर्वाः संख्याः दशचिह्नेषु व्यञ्जयितुं प्रकाशयितुं समर्थां पद्धतिं दत्तवान्।' इति।

प्राचीनभारतीयसाहित्यस्य वेदपुराणरामायणेषु स्थानीयमानकव्यवस्थायां लिखितानां संख्यानां प्रयोगः दृश्यते। यथा - शुक्लयजुर्वेदस्य सप्तदशे (१७) अध्याये द्वितीये मन्त्रे एकं, दश, शतं, सहस्रं, अयुतं, नियुतं, कोटिः, प्रयुतं, अर्बुदं, न्यर्बुदं, समुद्रं, मध्यः, अन्त्यः, परार्ध इत्यादयः बृहत्संख्या उल्लिखिताः सन्ति। विष्णुपुराणे मैत्रेयपराशरयोः सम्भाषणे संख्यायाः विषये समुल्लेखः दृश्यते। तत्र पराशरः परार्धस्य उल्लेखं करोति।

आदिकविवाल्मीकिनापि रामायणे दशमलवस्थानीयव्यवस्थायाः प्रयोगः परिलक्ष्यते।

यदा भारतीयमनिषयः बृहद्- बृहद्- संख्यां कल्पयन्ति स्म तदा विश्वे कुत्रापि संख्याया अवधारणा नासीत्। निःसंदेहं दशमलवस्थानीयमानकव्यवस्था प्राचीनभारतस्य अमरः वैभव अस्ति।

प्राचीनभारते उच्चस्तरस्य गणितस्य चर्चा आसीत्, तस्य स्पष्टम् उदाहरणमस्ति वाक्शालीपाण्डुलिप्या आविष्कारः। अस्मिन् शिलालेखे (अस्यां लिप्यां) गणितस्य अत्यन्तं प्रशंसा कृता अस्ति, कथ्यते च सर्वशास्त्रेषु गणितस्य उच्चतमं स्थानं वर्तते इति। गणितेतिहासकारा ईशवीयपञ्चमशताब्दीतः द्वादशशताब्दीं यावत् कालखण्डं भारते गणितचर्चायाः स्वर्णयुग इति आख्यायितवन्तः। अस्मिन् काले भारते अनेके प्रतिभाशालिनः गणितज्ञाः प्रादुर्भूताः। तेषां यशः न केवलं भारते एव सीमित आसीत्, अपितु विदेशेष्वपि स्वीकृत आसीत्। आर्यभट्टः, वराहमिहिरः, ब्रह्मगुप्तः, श्रीधराचार्यः, महावीराचार्यः, भास्कराचार्यः चेति अनेके निष्णाताः गणितज्ञाः सन्ति येषां गणितप्रतिभाः संस्कृतसाहित्ये स्वीयनाम उज्ज्वलितवन्तः, आत्मानं प्रतिष्ठापितवन्तः।

१३.५.२ विविधगणितशास्त्राणां समुल्लेखः

गणितविद्यायाः स्रोतांसि ज्ञात्वा इदानीं भवन्तः गणितविद्यायाः विविधग्रन्थानां विषये ज्ञास्यन्ति।

१) वेदाङ्ग-ज्योतिषः (ऋषिलगधः)

वेदाङ्गज्योतिषो भवति खगोलशास्त्रविषयकः गणितविद्याविषयकः च प्रथमः ग्रन्थः। वैदिककालस्य अन्तिमचरणे (उत्तरार्धे) वेदाङ्ग-ज्योतिषः रचितोऽभवत्।

लगधाचार्येण १२०० तः १४०० शताब्द्याः मध्यवर्तिकाले ग्रन्थोऽयं रचितः।

वेदाङ्गज्योतिषम् ऋग्वेदं यजुर्वेदं अथर्ववेदं च स्वीकरोति। ऋग्वेदज्योतिषभागे ३६ श्लोकाः, यजुर्वेदज्योतिषभागे ४४ श्लोकाः, अथर्ववेदज्योतिषभागे १६२ श्लोकाः सन्ति। एतेषु त्रिषु भागेषु परिणामदृष्ट्या अथर्वज्योतिषभागः महत्त्वपूर्णः इति मन्यते।

वैदिकर्षयः 'दशपूर्णमासयज्ञं' 'चातुर्मासयज्ञं' च पूर्णिमामाश्रित्य कृतवन्त आसन्। अस्मिन् ग्रन्थे 'युगाः', 'सौरवर्षाणि', 'चान्द्रवर्षाणि', 'अयनः', 'विषुवः' चेत्यादीनाम् उल्लेखाः सन्ति। तदतिरिच्य सर्वतो दीर्घतमदिनानां ह्रस्वतमदिनानां च उल्लेखोऽपि अस्ति।

२) आर्यभट्टप्रथमः (४७६ ई.)

ईशवीयपञ्चमशताब्द्याः प्रधानः गणितज्ञः ज्योतिर्विज्ञानी च आर्यभट्टप्रथमः आसीत्। असौ आर्यसिद्धान्तः 'आर्यभट्टसिद्धान्तः' वेति ग्रन्थं लिखितवान्। ग्रन्थोऽयं चतुर्धा विभक्तम् अस्ति –

१) दशगीतिकापादः

२) गोलाध्यायः

३) गणितपादः

४) कालक्रियापादः

गीतिकापादे त्रयोदश श्लोकाः सन्ति। दशगीटिकायाम् आर्यभट्टेण वर्णसंख्या प्रयुज्यते। अनेन आर्यभट्टेण तदीये आर्यभट्टीये ग्रन्थे आलोचिताः विषयाः भवन्ति – वर्गः, वर्गमूलं, घनः, घनमूलम्, इत्यादयः।

३) वराहमिहिरः (अनुमित ५०५ ई.तः ५८७ ई.) – वराहमिहिर अवन्तीनिवासी आसीत्। तस्य पिता आदित्यदासः आसीत्। सोऽपि खगोलशास्त्रज्ञ आसीत्। वराहमिहिर अगाधज्ञानाधीकारी महाज्ञानी चासीत्, विविधविषयेषु निष्णात आसीत्। 'पञ्चसिद्धान्तिका' इति वराहमिहिरस्य युगजयीकीर्त्तिः। अस्मिन् ग्रन्थे सः पञ्चप्रधानज्योतिषिकग्रन्थानां पौलिश–रोमक–वशिष्ठ– सूर्य– पैतामहादीनाम् चर्चां करोति। वराहमिहिरस्य अपरोल्लेखनीयग्रन्थद्वयं भवति – बृहत्संहिता, बृहज्जातकं च।

४) ब्रह्मगुप्तः – ब्रह्मगुप्तः सप्तमशताब्द्या अतितेजस्वी गणितज्ञः। तस्य जन्म ५९८ तमे ईशवीये वर्षे अभवत्। अरबसभ्यतासंस्कृतिषु च ब्रह्मगुप्तस्य असामान्यम् उत्कृष्टं योगदानम् आसीत्।

तदानीन्तनकाले विश्वगणितेतिहासे ब्रह्मगुप्तसमः मौलिकप्रतिभायुक्तः गणितज्ञः नासीत् इति उच्यते चेदपि अतिशयोक्तिः न भवति।

'ब्रह्मस्फुटसिद्धान्तः' ब्रह्मगुप्तस्य जीवनस्य युगजयीकीर्त्तिः। सः त्रिंशत्वर्षवयसि गणितज्ञानाम् ज्योतिर्विदां (खगोलशास्त्रज्ञानाम्) आनन्दाय ब्रह्मस्फुटसिद्धान्तं लिखितवान्। तस्य अपरः ग्रन्थः खण्डखाद्यकम्। ब्रह्मगुप्तः ज्यामितिः, बीजगणितम्, ज्योतिर्विज्ञानं च चर्चितवान् आसीत्। तस्य उभयपुस्तकस्य अरबीभाषायाम् अनुवादः जातोऽस्ति।

५) श्रीधरः - श्रीधर एकः गणितज्ञः। श्रीधरः ईशवीय ७५० तः ९१० ईशवीयस्य मध्यवर्तिकालिकः गणितज्ञ इति गणितस्य इतिहासकाराः मन्यन्ते। सः 'पाटीगणितसारः' 'त्रिशतिका' इति ग्रन्थद्वयञ्च रचितवान्। 'पाटीगणितसारः' इति ३०० श्लोकानां समष्टिः।

६) महावीराचार्यः - नवमशताब्द्याः जैनगणितज्ञ आसीत् महावीराचार्यः। ८५० तमे ईशवीये वर्षे असौ गणितसारसंग्रहं लिखितवान्। प्राचीनभारतीयगणितज्ञाः गणितमतिरिच्य ज्योतिर्विज्ञानस्यापि (खगोलशास्त्रस्यापि) अध्ययनं चर्चां च कृतवन्तः। आचार्यमहावीर एव अपवादः। यः केवलं मूलभूतगणितस्य अध्ययनार्थं दिवारात्रौ आत्मानं समर्पितः व्यस्तः पुरुष आसीत्।

७) भास्करद्वितीयः - भास्करद्वितीयस्य अनिर्वचनीयनिर्मितिरस्ति 'सिद्धान्तशिरोमणि'। ग्रन्थोऽयं संस्कृतभाषानिबद्धः अस्ति। ग्रन्थोऽयं खण्डचतुष्टये विभक्तम् - लीलावती, बीजगणितम्, गोलाध्यायः, तथा ग्रहगणितञ्च। 'लीलावती' इति ग्रन्थे मुख्यतया गणितविषये चर्चा वर्तते। भास्कराचार्यस्य मते गणितं द्विविधं भवति- व्यक्तं, अव्यक्तञ्च। पाटीगणितं व्यक्ताव्यक्तोभयविधं गणितं भवति।

इतोऽपि श्रीनिवासस्य 'गणितचुडामणिः', नारायणपण्डितस्य 'गणितकौमुदी' चेत्यादीनामुल्लेखः संस्कृतसाहित्ये समुपलभ्यते।

भास्कराचार्यस्य परवर्तिकाले भारते मौलिकप्रतिभासम्पन्नानां गणितज्ञानाम् आविर्भावः नाभवन् एवं नास्ति, किन्तु आर्यभट्टः, ब्रह्मगुप्तः, भास्कराचार्य इत्यादय इव प्रतिभाः परवर्तिगणितज्ञानां न दृग्गोचराः भवन्ति।

श्रीनिवासरामानुजन्वर्यः गाणितिकचिन्तनस्य भारतस्य हृत्गौरवम् उद्धरितवान्। निस्सन्देहं रामानुजनः भास्करस्य सुयोग्यः उत्तराधिकारी अस्ति।



ज्ञातव्यम्

प्राचीनभारते खगोलशास्त्रस्य ज्योतिर्विद्यायाः वा गणितविद्यायाः च प्रचलनमासीत्, उभयक्षेत्रेषु च अनेकानि पुस्तकानि रचितानि अभवन्। ज्ञातव्यं यत् प्रत्येकः खगोलशास्त्रज्ञ एव गणितज्ञ अपि। प्रत्येकस्मिन् पुस्तके गणितेन सह खगोलशास्त्रस्य उल्लेखोऽस्ति। पृथिवी सूर्यं परितः परिभ्रमति इति आर्यभट्टः प्रथम आविष्कृतवान्।



अग्रगत्याः निरीक्षणम्

प्रश्नः ५: गाणितिकपद्धतिः प्रथमं कुत्र प्रादुर्भूतवती ?

.....

प्रश्नः ६: भारतीयगणितस्य मुख्यशाखाद्वयं किम् ?

.....

प्रश्नः ७: प्राचीनभारतीयगणितज्ञस्य प्रथम आविष्कारः क आसीत् ?

.....

प्रश्नः ८: आर्यभट्टविरचितस्य गणितविषयकप्रथमग्रन्थस्य नाम किम् ?

.....

प्रश्नः ९: महावीराचार्येन रचितगणितग्रन्थस्य नाम किम् ?

.....

प्रश्नः १०: 'सिद्धान्तशिरोमणि' इति ग्रन्थः केन लिखितः ? तस्य कति भागाः सन्ति ? ते च के के ?

.....

१३.६ अध्यायस्य असमीयाभाषायां सारांशः

ছয়বেদাংগৰ ভিতৰত জ্যোতিষ অন্যতম বেদাংগ। প্ৰাচীনভাৰতত জ্যোতিষবিষয়ক গ্ৰন্থৰ পৰ্যায় শব্দ হিচাবে জ্যোতিষবিদ্যা, জ্যোতির্বিজ্ঞান, জ্যোতিঃশাস্ত্ৰ, জ্যোতির্বিদ্যা, জ্যোতিঃসিদ্ধান্ত, খগোলশাস্ত্ৰ, খগোলবিদ্যা, নক্ষত্ৰবিদ্যা আদিৰ ব্যৱহাৰ কৰা হৈছিল। জ্যোতির্বিজ্ঞান হৈছে— জ্যোতিষাং সুৰ্যাদিগ্ৰহণবোধকং শাস্ত্ৰম্। অৰ্থাৎ সুৰ্যাদিগ্ৰহ, কাল বুজোৱা শাস্ত্ৰকেই খগোলশাস্ত্ৰ বা জ্যোতির্বিদ্যা বুলি কোৱা হয়। এই খগোলশাস্ত্ৰ বা জ্যোতিষশাস্ত্ৰত প্ৰধানতঃ গ্ৰহ, নক্ষত্ৰ, কৰণ, যোগ আদি খগোলীয়পদাৰ্থৰ স্বৰূপ, পৰিভ্ৰমণ, কাল, গ্ৰহণ, স্থিতি আদি সৌৰমণ্ডলৰ বিবিধ তত্ত্ববিষয়ে আলোচনা থকাৰ বাবেই ইয়াক জ্যোতির্বিদ্যা বা খগোলশাস্ত্ৰ বোলা হয়। সংস্কৃতত জ্যোতিষশব্দটো পুংলিংগ আৰু নপুসংকলিংগ উভয়তে ৰূপ চলে।

বৈদিক যুগৰ পৰাই ভাৰতত জ্যোতির্বিদ্যাৰ চর্চা আছিল। বৈদিক যাগ-যজ্ঞৰ বাবে যথাযথ কাল নির্ধাৰণৰ বাবে জ্যোতির্বিদ্যা বা খগোলশাস্ত্ৰৰ জ্ঞানৰ আৱশ্যক। বৌদিক ক্ৰিয়াকর্মৰ বাবে ৰাশি, নক্ষত্ৰ, তিথি, সংক্ৰান্তি, সম্বৎসৰ প্ৰভৃতিৰ জ্ঞান অবিহনে বৈদিক যজ্ঞানুষ্ঠান কৰা অসম্ভৱ। কাৰণ বৈদিক যাগ-যজ্ঞৰ কাৰণে বিশেষ তিথি, নক্ষত্ৰ, কৰণ, সংক্ৰান্তি, সংবৎসৰৰ জ্ঞান নিত্যান্তই অপৰিহার্য। তাৰোপৰি কিছুমান বৈদিক ক্ৰিয়া ঋতু বিশেষেহে সম্পাদনা কৰা হয়। যেনে - বসন্ত ঋতুত ক্ষত্ৰিয়ই আৰু শৰৎ ঋতুত বৈশ্যই অগ্নিস্থাপন বিধি কৰিব লাগে।

জ্যোতিষবিদ্যাৰ প্ৰধানতঃ ভাগ দুটা - গণিত জ্যোতিষ আৰু ফলিত জ্যোতিষ। বেদাঙ্গ-জ্যোতিষেই হৈছে প্ৰথম জ্যোতিষবিষয়ক শাস্ত্ৰ। বৈদিক যুগতে ৰচনা কৰা আন খন জ্যোতিষশাস্ত্ৰ হল আৰ্থবন জ্যোতিষ। বেদোত্তৰকালিক ভাৰতৰ প্ৰধান জ্যোতির্বিজ্ঞানীসকল আৰু তেওঁলোকৰ গ্ৰন্থসমূহ হ ল - আৰ্যভট্টপ্ৰথমৰ আৰ্যভট্টীয় সিদ্ধান্ত, আৰ্যাষ্টশতক আৰু দশগীতিকাসূত্ৰ, ববাহমিহিৰৰ পঞ্চসিদ্ধান্তিকা আৰু বৃহৎসংহিতা, ব্ৰহ্মগুপ্তৰ ব্ৰহ্মস্ফুট সিদ্ধান্ত আৰু খণ্ডখাদ্যক, ভাস্কৰাচার্য প্ৰথমৰ আৰ্যভট্টীয়, মহাভাস্কৰীয় আৰু লঘু ভাস্কৰীয়, বটেস্বৰাচার্যৰ বটেস্বৰ সিদ্ধান্ত, মঞ্জুলাচার্যৰ লঘু মানসম্, আৰ্যভট্ট দ্বিতীয়ৰ মহা সিদ্ধান্ত, ভাস্কৰাচার্য দ্বিতীয়ৰ সিদ্ধান্ত শিৰোমণি আৰু কর্ণকুটুহলম্, পৰমেশ্বৰাচার্যৰ দিগ্ গণিতম্, সুর্য সিদ্ধান্ত বিৱৰণম্ আৰু ভট্টদীপিকা, নীলকণ্ঠ সোমযাজীৰ

তন্ত্রসংগ্রহ আৰু আর্যভট্টীয় ভাষ্য অন্যতম।

সংখ্যা বা গণনাৰ দ্বাৰা যি পদ্ধতি প্রয়োগ কৰা হয় তাকেই গণিত বিদ্যা বুলি কোৱা হয়। ভাৰতীয় গণিতক প্রধানতঃ দুটা শাখাত বিভক্ত কৰা হৈছে। সেইবোৰ যথা সংখ্যা গণিত আৰু আকৃতি গণিত বা জ্যামিতি। সংখ্যা গণিতৰ ভিতৰতে পাটিগণিত আৰু বীজগণিত অন্তর্ভুক্ত হৈ আছে। প্রাচীন ভাৰতত পাটিগণিত আৰু জ্যামিতিৰ বিশেষ উৎকর্ষ পৰিলক্ষিত হয়। ভাৰতীয় গণিত চর্চাৰ কালক মূলতঃ তিনিটা ভাগত বিভক্ত কৰিব পাৰি, যেনে - প্রাক্ আর্যযুগ, বৈদিক যুগ আৰু খ্রীষ্টাব্দোত্তৰ যুগ। শূন্যৰ আৱিষ্কাৰ আৰু দশমিক স্থানীয় মান পদ্ধতিৰ সহায়ত সংখ্যা লিখাৰ উপায় হৈছে প্রাচীন ভাৰতীয় মনিষীসকলৰ বিশেষ উপলব্ধি। প্রাচীন ভাৰতীয় সাহিত্য বেদ, পুৰাণ, ৰামায়ণ আদিত স্থানীয় মান পদ্ধতিত লিখা সংখ্যাৰ ব্যৱহাৰ দেখিবলৈ পোৱা যায়। উদাহৰণ স্বৰূপে - এক, দহ, শত, সহস্র, অযুত, লক্ষ, নিযুত, কোটি, অর্বুদ, বৃন্দ, খর্ব, নিখর্ব, শংখ, পদ্ম, সাগৰ, অন্ত্য, মধ্য, পৰার্ধ আদি বৃহৎ সংখ্যাৰ উল্লেখ নিম্ন প্রকাৰে পোৱা যায়।

একং দশ শতং চৈব সহস্রমযুতং তথা।
লক্ষং চ নিযুতং চৈব কোটিৰ্বুর্বদমেব চ।।
বৃন্দং খর্বো নিখর্বশ্চ শংখঃ পদ্মশ্চ সাগৰঃ।
অন্ত্যং মধ্যং পৰার্ধং চদশবৃদ্ধ্যা যথাক্রমম্।। ইতি।

এইদৰে ভাৰতীয় মনীষীয়ে যেতিয়া ডাঙৰ ডাঙৰ সংখ্যাৰ গণনা কৰিব লৈছিল সেই সময়ত পৃথিৱীৰ আন দেশবোৰত সংখ্যাৰ ধাৰণাই নাছিল। বেদাঙ্গ-জ্যোতিষেই হৈছে বিশ্বৰ প্রথম গণিতবিদ্যা আৰু জ্যোতির্বিদ্যা বিষয়ক গ্রন্থ। নিঃসন্দেহে 'দশমিক স্থানীয় মান পদ্ধতি' প্রাচীন ভাৰতৰ অবিনশ্বৰ কীর্তি। গণিতৰ ইতিহাসবিদ্সকলে খ্রীষ্টীয় পঞ্চম শতিকাৰ পৰা দ্বাদশ শতিকাৰ কালছোৱাক ভাৰতৰ গণিত চর্চাৰ সোনালী যুগ আখ্যা দিছে। প্রাচীন ভাৰতীয় গণিতজ্ঞ সকল আৰু তেওঁলোকৰ গ্রন্থ সমূহ হৈছে - আর্য্যভট্ট প্রথমৰ দশগীতিকাপাদ, গোলাধ্যায়, গণিতপাদ আৰু কালক্রিয়াপাদ বৰাহমিহিৰৰ পঞ্চসিদ্ধান্তিকা, বৃহৎসংহিতা আৰু বৃহৎজাতক ব্রহ্মগুপ্তৰ ব্রহ্মস্ফুটসিদ্ধান্ত। শ্রীধৰাচার্যৰ পাটীগণিতসাৰ আৰু ত্রিশতিকা মহাবীৰাচার্যৰ গণিতসাৰসংগ্রহ। ভাস্কৰাচার্য দ্বিতীয়ৰ লীলাৱতী, বীজগণিত, গোলাধ্যায় আৰু গ্রহগণিত অন্যতম।



१३.७ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- वैज्ञानिकसाहित्येषु खगोलशास्त्रं/ज्योतिर्विद्या गणितविद्या च अन्यतमा। गणितशास्त्रान्तर्गतज्यामित्याः उत्पत्तिः शुल्वसूत्रेषु दृश्यते इति ज्ञातवन्तः।

- ज्योतिर्विद्या/खगोलशास्त्रं किम् इति ज्ञातम्। ज्योतिर्विद्यायाः स्रोतांसि, लक्षणानि, विविधज्योतिर्विद्याविषयकाणां ग्रन्थानां च विषये ज्ञातवन्तः।
- 'गणित'शब्दस्य अर्थः विषये तथा। गणितविद्यायाः उत्सस्य विषये ज्ञातवन्तः।
- संख्यानामुद्भवविषये, गणितशास्त्रविषये च ज्ञातवन्तः।
- भास्कराचार्यद्वितीय एकः ज्योतिर्विद् गणितज्ञः च आसीत्। तस्य 'लीलावती' इति पुस्तकं पाटीगणितम् अस्ति। श्लोकानां वर्णनेषु अनुप्रास-यमक-श्लेषाणां वर्णना कृता। असौ एकः सुकविरपि अस्ति इति ज्ञातवन्तः।



१३.८ ज्ञानाधिक्यम्

१) शर्मा, थानेश्वरः, 'संस्कृत साहित्यर इतिवृत्त', गुवाहाटी, चन्द्रप्रकाश।
२) गोस्वामी, हरमोहनदेवः, 'संस्कृत साहित्यर बुरञ्जी', गुवाहाटी, बुकलैण्ड।
३) Krishnamachariar, M, History of Classical Sanskrit Literature, New Delhi, MLBD.



१३.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : यस्मिन् ग्रन्थे ग्रहनक्षत्राणां विविधतथ्यानां समुल्लेखो विद्यते तद् खगोलशास्त्रम्/ ज्योतिर्विद्या वा कथ्यते।

प्रश्नः २ उत्तरम् : आर्यभट्टीयसिद्धान्तः।

प्रश्नः ३ उत्तरम् : महासिद्धान्तः, १२ अध्यायाः।

प्रश्नः ४ उत्तरम् : पञ्चसिद्धान्तिका, अस्य चत्वारः खण्डाः सन्ति।

प्रश्नः ५ उत्तरम् : शुल्वसूत्रेषु।

प्रश्नः ६ उत्तरम् : १) संख्यागणितम् (पाटीगणितम् एवं बीजगणितम्), २)आकृतिगणितम् (ज्यामितिः)

प्रश्नः ७ उत्तरम् : - शून्यस्य।

प्रश्नस्य ८ उत्तरम् : आर्यभट्टसिद्धान्त।

प्रश्नः ९ उत्तरम् : 'गणितसारसंग्रहः'।

प्रश्नः १० उत्तरम् - भास्करद्वितीयः। अस्य चत्वारः भागाः सन्ति- १) लीलावती अथवा पाटीगणितम्, २) बीजगणितम्, ३) ग्रहगणितम्, ४) गोलाध्याय।



१३.१० अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः १: वैज्ञानिकसाहित्यरूपेण खगोलशास्त्रस्य स्रोतांसि लिखत।

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

प्रश्नः १: टिप्पणी देया –

(क) आर्यभट्टप्रथमः,

(ख) वराहमिहिरः,

(ग) ब्रह्मगुप्तः,

(घ) भास्करद्वितीयः।

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १: संस्कृतसाहित्ये गणितचर्चा, स्रोताः, गणितशास्त्राणि च विस्तरेण लिखत।

प्रश्नः २ : खगोलशास्त्रं किम् ? खगोलशास्त्रस्य उद्देश्यस्य चर्चाया अभ्यासस्य च विषये समासेन लिखत।

****

अध्यायः १४ : ऐतिहासिकदृष्ट्या संस्कृतभाषायाः विकासः

अध्यायस्य संरचना

१४.१ उद्देश्यम्

१४.२ परिचयः

१४.३ संस्कृतभाषायाः परिचयः

१४.४ इन्दो-यूरोपीयभाषा तथा संस्कृतम्

१४.५ वैदिकसंस्कृतभाषा

१४.६ लौकिकसंस्कृतभाषा

१४.७ संस्कृतभाषायाः वर्तमानावस्था

१४.८ अध्यायस्य असमीयाभाषायां सारांशः

१४.९ अध्यायात् किमवगतम्

१४.१० ज्ञानाधिक्यम्

१४.११ अग्रगत्याः निरूपणम्

१४.१२ अभ्यासप्रश्नाः

१४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- संस्कृतभाषायाः साधारणानि वैशिष्ट्यानि ज्ञातुं शक्नुवन्ति।
- संस्कृत-इन्दोयुरोपीयभाषयोः मध्ये सम्बधविषये ज्ञातुं शक्नुवन्ति।
- वैदिकसंस्कृतभाषा काऽस्ति तद्विषये ज्ञातुं शक्नुवन्ति।
- लौकिकसंस्कृतभाषायाः विषयं ज्ञातुं शक्नुवन्ति।
- आधुनिकयुगे संस्कृतभाषाया अवस्थाविषये ज्ञातुं शक्नुवन्ति।

१४.२ परिचयः

'संस्कृतम्' इति पदेन 'परिष्कृतं', 'परिशीलितं', 'परिमार्जितं' च अर्थानि बोध्यन्ते। परन्तु पण्डिताः आर्यावर्ते प्रचलिता प्राचीनतमा भाषा एवं संस्कृतम् इति अभिधीयते। पृथिव्याः सुप्राचीनभाषाविशेषेषु अन्यतमा इयं संस्कृतभाषा। आर्याणां प्राचीनतमो ग्रन्थः 'ऋग्वेदः' अस्यां भाषायाम् एव रचितः स्म। ऋग्वेदेन यात्रारम्भं कृत्वा इयं संस्कृतभाषा बहून् स्तरान् अतिक्रम्य वर्तमानस्यावस्थां प्राप्नोति। इमां भाषां ज्ञातुं अस्या इतिहासस्य अध्ययनम् अतीव प्रयोजनीयम्। एतद् उपरि इयं संस्कृतभाषा भारतीय-आर्यभाषायाः विशालक्षेत्रे महत्तपूर्णं स्थानम् अधिकरोति। भारतवर्षस्य स्वर्णोज्यलस्य अतीतस्य ज्ञानार्जनाय संस्कृतम् अध्येयम्। संस्कृतभाषाया उत्पत्तिः कुत्र कथं वा अभवत् तद्विषये पण्डितानां मध्ये मतभेदं दृश्यते। तथापि भिन्नेषु समयेषु भिन्नेन

विवर्तनेन बहूनाम् विपत्तीनाम् सन्मुखीनं भवति अपि इयं भाषा वर्तमानयुगेऽपि स्वमहिम्ना विराजते। अत एव वर्तमानकाले व्यवहृतां संस्कृतभाषां ज्ञातुं अस्याः भाषायाः प्राचीनेतिहासस्य ज्ञानस्य प्रयोजनमस्ति। अस्मिन् अध्याये भवान् ऐतिहासिकक्षेत्रे संस्कृतभाषायाः क्रमविकाश-विषयकानि तथ्यानि प्राप्नोति। तथा च भिन्नेषु समयेषु भिन्नेषु स्तरेषु प्रचलितायाः संस्कृत-भाषायाः किंचित् वैशिष्ट्यानि अवगच्छन्ति।

१४.३ संस्कृतभाषायाः परिचयः

भारतवर्षस्य सुप्राचीना भाषा संस्कृतभाषा। अस्याः परिधिः सुविशालः। हिन्दुधर्मस्य प्राचीनतमो ग्रन्थः ऋग्वेद अस्यां भाषायाम् एव रचितः स्म। अतः संस्कृतम् आर्याणां प्राचीनतमा भाषा इति गृह्यते। 'संस्कृतं नाम दैवी वाक्' इति दण्डिना तस्य काव्यादर्शनामके ग्रन्थे उल्लेखितः। 'संस्कृतं देवानां भाषा' इति अस्यार्थः। दण्डेः मतानुसारं ब्रह्मादिदेवाः अस्यां भाषायां कथोपकथनं कुर्वन्ति स्म। परवर्तीकाले पाणिनिप्रभृतयः पण्डिताः तैः रचितेषु ग्रन्थेषु इमां भाषां परिशीलितम् अकरोत्। अयं अभिमतं संस्कृतभाषायाः प्राचीनत्वं प्रमाणयति।

रामायणस्य सुन्दरकाण्डे हनुमान् सीतया सह यदा कथोपकथनं करोति स्म तदा संस्कृतभाषायाः प्रयोगम् अकरोत्। अस्मिन् प्रसङ्गे प्राप्यते - 'वाचं चोदाहरिष्यामि मानुषीमिव संस्कृताम्।' महाकविः कालिदासः विभिन्नेषु प्रसंगेषु तस्य काव्येषु संस्कृतभाषाया उल्लेखं करोति। कुमारसम्भवे महाकाव्ये कालिदासेन संस्कृतं 'संस्कारपूता' भाषा इति उच्यते। रघुवंशे महाकाव्ये तेन संस्कृतभाषां 'भारती' इत्यनेन अभिधीयते। अनेन एतद् बोध्यते यत् संस्कृतभाषा कृतसंस्कारा संस्कारसमृद्धा वा। अत एव संस्कृतभाषां पुरा 'भारती' इत्यनेन बोध्यते। अत एव एतद् ज्ञातुं शक्यते यत् संस्कृतं प्राचीनार्यभाषा वा बहुकालात् भारतवर्षे प्रचलिताऽभवत्।

भाषाविज्ञानस्य दिशा एतद् वक्तुं शक्यते यत् इन्दो-यूरोपीय-इन्दो-इराणीयभाषयोः संस्कृतस्य प्राचीनार्यभाषायाः वा उत्पत्तिरभवत्। किन्तु भारतवर्षे एव इयं भाषा बहुभिः परिवर्तनैः प्रवहति। वैदिककालादेव अस्याः भाषायाः भारतवर्षे प्रचलनं भवति। एषा भाषा वैदिककालाद् आरब्धः वर्तमानकालपर्यन्तं ३५०० वर्षाणि अतिक्रामति। ३५०० वर्षाणि एव अस्याः भाषायाः इतिहासः। भाषातात्त्विकः सत्यरञ्जन-वन्दोपाध्यायः महाभागः संस्कृतभाषायाः इतिहासं ज्ञातुं भाषायाः निम्नोक्तान् स्तरान् अध्येयम् इति उच्यते -

(१) इन्दोरोपीयभाषा,
(२) इन्दो-इराणीयभाषा,
(३) प्रान्तार्यभाषा,
(४) कथ्य-संस्कृतभाषा,
(५) वैदिकसंस्कृतभाषा,
(६) लौकिकसंस्कृतभाषा,
(७) आधुनिक-संस्कृतभाषा,

स्मर्तव्यं यत् भारतीय-आर्यभाषा इत्युक्ते या संस्कृतभाषा अवगम्यते तस्याः प्रारम्भः वैदिकसंस्कृतादेव परिगण्यते। अस्याः भाषायाः माधुर्यता अपरिसीमा। पृथिव्याः सुप्राचीनभाषाविशेषेषु अन्यतमाया अस्याः संस्कृतभाषाया एकं स्वकीयं वैशिष्ट्यं भवति। तद् यथा- प्राचीनकालादेव प्रचलिता इयं भाषा अद्यापि स्वमहिम्ना वर्तते। किन्तु एतद् स्वीकार्यं यत् प्राचीनभारते संस्कृतस्य या मर्यादा सम्मानं वा आसीत्, वर्तमानसमये सा क्षीणतरा भवति। तथापि इयं संस्कृतभाषा स्वकीयेन इतिहासेन समहिम्ना च अद्यापि वर्तते। ये संस्कृतं मृतभाषा इति वदन्ति ते प्रकृतरूपेण अस्याः भाषायाः स्वरूपं न जानन्ति।

भारतवर्षस्य स्वर्णोज्ज्वलस्य इतिहासस्य ज्ञानार्जनाय संस्कृतस्य इतिहासम् अध्येयम्। सुप्राचीनकाले एव रचिते वैदिकसाहित्ये यं इतिहासं ज्ञानं वा प्राप्यते, ते ज्ञातुं संस्कृतभाषायाः ज्ञानम् अतीव आवश्यकीयम्। तदुपरि अस्याः भाषायाः ध्वनितत्त्व-रूपतत्वादयः बहूनाम् ऐतिहासिकघटनानां साक्ष्यं वहन्ति। संस्कृतभाषायाः प्राणशक्तिरेव इमां भाषां अद्यापि जीवितरूपेण रक्षति। ग्रीक्, लेटिन, हिब्रू प्रभृतयः भाषाः वर्तमानयुगे न प्राप्यन्ते। परन्तु संस्कृतभाषा वर्तमाने अपि समग्रे विश्वे प्रचलति। जवाहरलाल-नेहरु-महाभागः तदीये रचनायां संस्कृतभाषां भारतवर्षस्य श्रेष्ठरत्नरूपेण अभिधीयते।

अतः वयम् एतद् ज्ञातुं शक्नुमः यत् अस्मिन् युगे प्रचलिता या संस्कृतभाषा तस्या एकः इतिहासोऽस्ति। अतः संस्कृतभाषायाः क्रमविकाशं ज्ञातुम् अस्याः इतिहासस्य स्तराणि ज्ञायेरन्।

१४.४ इन्दोयूरोपीय-भाषा तथा संस्कृतम्

इन्दोयूरोपीयभाषा एका काल्पनिकभाषा इति मन्यते। अत्र 'इन्दो' इति अनेन पदेन 'इण्डिया' 'भारतवर्ष' तथा इउरोपीय देशाः सूच्यते। प्रकृततः एषा भाषा आसीत् नासीत् वा तद्विषये प्रामाणिकानि तथ्यानि नोपलभ्यन्ते। किन्तु ग्रीक्-लेटिन्-संस्कृत-फार्ची-आदिषु प्राचीनभाषासु ध्वनिगतं रूपगतं च सादृश्यं दृश्यते। अत एतासां भाषाणां प्रधानरूपेण इन्दो-यूरोपीयभाषाया अस्तित्वं कल्पयति। अद्यापि अस्याः भाषायाः कोऽपि साक्ष्यः प्रमाणं वा नोपलभ्यते। समग्रविश्वस्य भाषातत्वविदा अस्याः काल्पनिकभाषाया अस्तित्वं स्वीकृत्या एव स्वकीयं स्वकीयं शोधयुक्तालोचनां प्रस्तौति। केचित् पण्डिताः अस्या इन्दो-यूरोपीयभाषाया अपि एकं प्राचीनं स्तरम् अस्ति इति यद्यपि कल्पयन्ति तथापि तद् स्तरं सर्वैः न स्वीकृतम्। संस्कृत-ग्रीक्-लेटिनादिनां प्राचीनभाषाणां मूलरूपेण सर्वैः इन्दो-यूरोपीयभाषा एव स्वीकृता।

इन्दो-यूरोपीयभाषा भिन्नेषु स्तरेषु भिन्नैः नामभिः ज्ञाता आसीत्। यथा-आर्यभाषा, इन्द्रो-जार्मानिकभाषा, इन्दो-केलतिक्भाषा इत्यादि। किन्तु एतेषु नामसु उपलब्धायाः समस्यायाः हेतुः 'इन्दो-यूरोपीय' इति नाम एव सर्वैः गृहीतम्। एतस्या इन्दो-यूरोपीयभाषायाः भागद्वयं वर्तते - सतम् (Satam) केन्तुम् (Centum) चेति। इदं भागद्वयं मूलतः भाषातत्वस्य आधारे निर्धारितम्। इन्दो-यूरोपीयभाषायाः तालव्यध्वनेः परिवर्तनस्य आधारे एव तौ भागौ स्थीरिकृतौ। 'शत्' शब्दस्य इन्दो-यूरोपीयरूपस्य ध्वनेः परिवर्तनं दृष्ट्या एतां भाषां सतम् केन्तुम् च द्विधा विभक्तम्। यस्यां

भाषायाम् एषः ध्वनिः शिस् ध्वनौ परिवर्तितं भवति, अमूः भाषाः सतमस्य अन्तर्गताः भवन्ति तथा यस्यां भाषायाम् एषः ध्वनिः तालव्य-क-ध्वनये परिवर्तितं भवति, अमूः भाषाः केन्तुमे अन्तर्भुक्ताः भवन्ति। भौगोलिकदिशतः अपि इन्दोयूरोपीयभाषां द्विधा विभक्तम्-पूर्वीय पश्चिमीय च। किन्तु एतौ भागौ सर्वैः पण्डितैः न स्वीकृतौ। इन्दोयूरोपीयभाषायाः सतमशाखायाः प्रधानभाषाः यथा-इन्दोइराणीय-आलवानीय-आर्मेनीयादयः। अपरदिशि केन्तुमशाखायाः प्रधानभाषाः यथा-ग्रीक्-लेटिन्-जामर्मानिक्-केलतिकादयः।

संस्कृतभाषा इन्दो-यूरोपीयभाषायाः 'इन्दो-इराणीय' इति भागस्यान्तर्भुक्ता। इन्दो-इराणीय-भाषाया अध्ययनात् ज्ञायते यत् एषा भाषा एकस्मिन् समये द्वयोः दिशोः गच्छति-एका प्रान्तइराणीयभाषा, अपरा चे प्रन्तभारतीयार्यभाषा। यस्याः भाषायाः प्राचीनफार्चीभाषाया उत्पत्तिर्भवति, तद् प्रान्तइराणीयभाषा तथा यस्मात् प्राचीन-भारतीयार्यभाषायाः संस्कृतस्य वा उत्पत्तिर्भवति, तद् प्रान्तभारतीयार्यभाषा। अत इन्दो-इराणीयभागस्य अन्तर्गताया इन्दो-एरियानभाषायाः प्राचीन-भागम् एव संस्कृतम् इति उच्यते। अत एव संस्कृतभाषां अ'ल्ड इन्दो-एरियान (old Indo Aryan) OIA वा इति उच्यते। संस्कृतभाषायाः ऐतिहासिक-क्षेत्रं ज्ञातुं इन्दो-यूरोपीय तथा इन्दो-इराणीय-भाषाभ्यां सम्बन्धस्य विषयस्य ज्ञानं प्रयोजनीयम्। एतद् अपि स्मर्तव्यं यत् इन्दो-यूरोपीयभाषा काल्पनिका भूत्वाऽपि अत्र प्रकृति-प्रत्ययस्य भित्तौ वाक्यगठनम् अभवत्। इन्दो-यूरोपीयभाषान्तर्गतेषु संस्कृतं ग्रीक्-लेटिनादिषु भाषासु अपि एतद् वैशिष्ट्यं दृश्यते। एतासु भाषासु प्रकृति-प्रत्ययगतार्थस्य वैशिष्ट्यं दृश्यते। पुनः एतासु भाषासु प्रकृतिप्रत्ययगतार्थस्य तथा वाक्यस्य अर्थस्य मध्ये पूर्णं साम्यं दृश्यते। यासु भाषासु शब्दाः वाक्यस्यार्थं गठनं प्रकृति-प्रत्ययगतार्थस्य सहयोगेन करोति, अर्थात् वाक्ये व्यवहृतानां पदानां प्रकृति-प्रत्ययगतार्थेण सह वाक्यस्य सम्पूर्णार्थस्य साम्यं वर्तते, ताः भाषाः समन्वयी (synthetic) भाषा इति कथ्यते।

संस्कृतभाषा समन्वयीभाषासु अन्यतमा। उदाहरणं यथा - 'बालकः विद्यालयं गच्छति'। वाक्येऽस्मिन् 'बालकः' इति पदं कर्ता तथा प्रथमाविभक्ते एकवचने प्रयुक्तो भवति। तदुपरि 'बाल' इति पदे 'क' प्रत्ययययुक्तोऽस्ति तथा सम्पूर्ण 'बालकः' इति पदं कनिष्ठः बालकः इति बोध्यते। द्वितीयतः विद्यायाः आलयः स्थानं वा अर्थे 'विद्यालय' इति पदं प्रयुक्तं भवति तथा अत्र द्वितीयाविभक्ते एकवचने भवति। 'गच्छति' इति तृतीये पदे 'गमनम्' अर्थ गम् धातोः प्रथमपुरुषस्य एकवचनरूपं प्रयुक्तोऽस्ति। इदानीं 'बालकः विद्यालयं गच्छति' इति वाक्ये योऽर्थः प्रकाशयति, तद् पदानां प्रकृति-प्रत्ययुक्तार्थैः सह सम्पूर्णः साम्यता युक्तः। एवं संस्कृतभाषायां प्रत्येकं वाक्यस्य क्षेत्रे एव अयं नियमः प्रयोज्यो भवति। अत एतद् प्राप्यते यत् संस्कृतभाषा सम्पूर्णरूपेण एका समन्वयी भाषा। अपरदिशा यस्यां भाषायां विश्लेषणेन पदान् कर्ता-कर्मरूपं निर्धारणं कृत्वा वाक्यस्य अर्थं निरूपणं करोति, तान् विश्लेषणात्मकभाषा इति कथ्यते। इन्दो-यूरोपीयभाषात उत्पन्नाः आधुनिक-भारतीयभाषाः यथा - असमीया- बांलादयः।

अत अस्या आलोचनायाः वयं जानीमः यत् संस्कृतभाषा इन्दो-इराणीयभाषया सह प्रत्यक्षरूपेण सम्बन्धिता तथा इन्दो-इराणीयभाषया एतस्याः इन्दो-यूरोपीयभाषायाः सन्तानतुल्या

भाषा। किन्तु इन्दो-यूरोपीय-इन्दो-इराणीययोः भाषयोः संस्कृतभाषा उत्पन्ना भुत्वा अपि परवर्तीकाले एतस्यां भाषायां विभिन्नानि स्तराणि प्राप्यन्ते। एतैः स्तरैः संस्कृतभाषा वर्तमानस्य रूपं धारयति। भाषातात्विकदिशः संस्कृतभाषां प्राचीनार्यम् (OLA) इति उच्यते।

इन्दो-यूरोपीयभाषा

↓

इन्दो-इराणीयभाषा

↓

इन्दो - आर्यानभाषा

↓	↓	↓
प्राचीन-इन्दो-आर्यानभाषा	मध्य-इन्दो-आर्यानभाषा	परवर्ती वा नुतनभाषा
(OIA)	(MIA)	इन्दो-आर्यानभाषा
संस्कृतम्	पालि-प्राकृतादयः	(NIA)
		असमीया-बांलादयः



अग्रगत्याः निरीक्षणम्:

प्रश्नः १ : इन्दो-यूरोपीयभाषा इत्युक्ते का बोध्यते?

.....

प्रश्तः २ : इन्दो-यूरोपीय भाषायाः भागद्वयं किम्?

.....

प्रश्नः ३ : संस्कृतभाषा इन्दो-यूरोपीय भाषायाः कस्य विभागस्यान्तर्भुक्ता?

.....

प्रश्नः ४ : भारतीय-आर्यभाषा इत्युक्ते का भाषा बोध्यते?

.....

प्रश्नः ५ : समन्वयी भाषा का?

.....

प्रश्नः ६ : काचित् विश्लेषणात्मकभाषाया उदाहरणानि प्रदेयानि।

.....

प्रश्नः ७ : संस्कृतभाषायाः भाषातात्तिकं नाम किम्?

.....

१४.५ वैदिकसंस्कृतभाषा

वैदिकसाहित्ये व्यवहृता संस्कृतभाषा एव वैदिकसंस्कृतभाषा इति कथ्यते। वैदिकसाहित्यम् इत्युक्ते संहिता-ब्राह्मण-उपनिषद्-आरण्यक वेदाङ्गादिनि बोध्यन्ते। तेषु व्यवहृता या भाषा सा एव

वैदिक-संस्कृतभाषा। संस्कृतसाहित्ये अस्याः वैदिकसंस्कृत-भाषाया एकं गुरुत्वपूर्णं स्थानमस्ति। अस्याः भिन्नानि वैशिष्ट्यानि सन्ति। तानि यथा-

(क) स्वरस्य प्रयोगं वैदिकसाहित्यस्य एकं प्रधानं वैशिष्ट्यमस्ति। अस्मिन् साहित्ये त्रयः स्वराः सन्ति। ते यथा- उदात्तः, अनुदात्तः स्वरितः च। पाणिनिना एतेषां त्रयाणां स्वराणां लक्षणं तदीये व्याकरणे एवं प्रदीयते - उच्चैः उदात्तः, नीचैः अनुदात्तः, समाहारः स्वरितः च। अर्थात् ताल्वादि- वर्णोच्चारण-स्थानस्य उर्द्धभागे उच्चारिताः स्वरवर्णा उदात्तः, निम्नभागे उच्चारिताः स्वरवर्णाः अनुदात्तः तथा च उदात्तानुदात्तयोः धर्ममिश्रितः स्वरवर्णः स्वरितः चेति। एतदुपरि वैदिकसाहिये अनेकानि स्वराणि अपि सन्ति।

(ख) पदपाठस्य प्रयोगं वैदिकसाहित्यस्य अन्यतमं वैशिष्ट्यम्। संहितापाठस्य सन्धियुक्तपदानां सन्धिविच्छेदं कृत्वा यत्र निर्दिष्टपदं व्यवह्रियते तद् एव पदपाठ इत्युच्यते।

(ग) वैदिकसंस्कृते सप्त छन्दांसि सन्ति। ते यथा- गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप्, जगती च। एतानि छन्दांसि अक्षरभित्तिकाः। अर्थात् अक्षरगणनामाध्यमेन वैदिकछन्दांसि निरूपितनि भवन्ति। लौकिकसंस्कृते एतानि छन्दांसि न सन्ति।

(घ) पदान्तस्य व्यञ्जनवर्णस्य लोपः वैदिकसंस्कृते परिलक्षितो भवति। उदाहरणं यथा - वैदिकसंस्कृते 'कर्मन्' शब्दस्य अन्त्यस्य 'न्' इत्यस्य लोपं कृत्वा 'कर्म' इति रूपं भवति।

(ङ) वैदिकसंस्कृते लृङ्-लकारस्य प्रयोगः सीमितो भवति तथा च लेट्लकारस्य प्रयोगः अधिकः परिलक्ष्यते।

(च) वैदिकसंस्कृते तुमुन् प्रत्ययस्य अर्थे से-असे-इत्यादयानां प्रत्यायानां व्यवहाराः परिलक्ष्यन्ते।

(छ) उपसर्गानां प्रयोगमपि वैदिकसंस्कृतस्य एकं अन्यतमं वैशिष्ट्यम्। लौकिकसंस्कृते धातोः पूर्वं उपसर्गस्य प्रयोगो भवति। परन्तु वैदिकसंस्कृते कस्मिञ्चिद् स्थाने उपसर्गस्य प्रयोगः धातोः पश्चाद् वर्तते, कस्मिञ्चिद् स्थाने पदस्य व्यवधाने भवति तथा च कस्मिञ्चिद् स्थाने एकस्यैव उपसर्गस्य एकाधिकः प्रयोगः परिलक्ष्यते।

(ज) वैदिकसंस्कृते कारकक्रिययोः कालविषये भिन्नाः प्रयोगाः परिलक्ष्यन्ते। काचित् वर्तमानकालस्य अर्थे लिट्-लकारस्य प्रयोगः प्राप्यते।



अग्रगत्याः निरीक्षणम्

प्रश्नः ८ : पदपाठः कः ?

.....

प्रश्नः ९ : प्रमुखवैदिकच्छन्दसां नामानि लिखत ?

.....

प्रश्नः १० : उदात्तः, अनुदात्तः स्वरितः च इत्युक्ते किं बोध्यते ?

.....

प्रश्नः ११ : वैदिकसंस्कृते उपसर्गस्य प्रयोगः कथं भवति ?

.....

प्रश्नः १२ : वैदिकसंस्कृते कस्य लकारस्य प्रयोगो नास्ति तथा कस्य लकारस्य प्रयोगः अधिकः ?

.....

१४.६ लौकिकसंस्कृतभाषा

संस्कृतसाहित्ये वैदिकसंस्कृतभाषायाम् उपलब्धानां वेद-वेदाङ्गादिग्रन्थानां रचनायाः पश्चात् सर्वप्राथम्येन रामायणस्य रचना अभवत्। रामायणस्य या संस्कृतभाषा अस्ति, सा भाषा लौकिकसंस्कृतभाषा। अत एव रामायणम् आदिकाव्यम् इत्युच्यते। तत् पश्चात् महाभारतस्य रचना अभवत् लौकिकसंस्कृतभाषायामेव। तथापि तस्मिन् समयेऽपि वैदिकसंस्कृतभाषायाः प्रचलनं बभूव। रामायण-महाभारत-पुराणादिनां रचनायाः पश्चात् कालिदासादिकविभिः विरचितैः ग्रन्थैः लौकिकसंस्कृतभाषायाः प्रचलनधारा प्रारब्धा। कालक्रमेण इमान् ग्रन्थान् त्रियुगे विभक्तम् अकरोत्। तद् यथा (१) प्राक्-कालिदासस्य युगः, (२) कालिदासीययुगः, (३) कालिदासोत्तरयुगः च। रामायण-महाभारतादितः कालिदासोत्तरयुगस्य काव्यानि पर्यन्तं ग्रन्थेषु व्यवहृतायां संस्कृतभाषायाम् एव विविधानि परिवर्तनानि परिलक्ष्यन्ते। तदुपरि भाषातात्विकदिशा पाणिने अष्टाध्यायी अपि संस्कृतभाषायाः परिवर्तनस्य सूचकरूपेण वार्ता प्रवहति। लौकिकसंस्कृतभाषाया अपि किञ्चित् वैशिष्ट्यानि सन्ति। एतानि वैशिष्ट्यानि वैदिकसंस्कृतभाषातः लौकिकसंस्कृतभाषां पृथक् करोति। तानि वैशिष्ट्यानि यथा-

(क) स्वरस्य प्रयोगो लौकिकसंस्कृते न दृश्यते।

(ख) पदपाठस्य प्रयोगोऽपि अत्र नास्ति।

(ग) लौकिकसंस्कृतस्य छन्दांसि गणभित्तिकानि अत्र दशगणाः सन्ति। यथा - म, न, भ, ज, र, स, य, त, ग, ल इति। छन्दांसि यथा - मालिनी, उपजाति, टोटक, मन्दाक्रान्ता, वसन्ततिलक, वंशस्थविल-इत्यादयः।

(घ) लौकिकसंस्कृते धातोः पूर्वे उपसर्गस्य प्रयोगो भवति। पाणिने अष्टाध्यायां प्राप्यते- 'ते प्राग् धातोः' इति।

(ङ) लौकिकसंस्कृते अ-कारान्तपुल्लिंगशब्दस्य तृतीयाविभक्तेः बहुवचने 'ऐस' विभक्तिः युक्तो भवति, परन्तु वैदिकसंस्कृते 'एभिः' युक्तो भवति।

(च) लौकिकसंस्कृते क्रियायाः कालानुसारं हि लकारस्य प्रयोगं परिलक्ष्यते।


(छ) लौकिकसंस्कृते लेट्-लकारस्य प्रयोगो नास्ति।

(ज) अत्र सर्वनामपदानि यथा- मह्य, अस्मे, आवद् आदीनां प्रयोगाः न सन्ति।

(झ) लौकिकसंस्कृते तिङ्विभक्तेः 'मसि' तथा 'ध्व' इत्यनयोः प्रयोगं न परिलक्ष्यते।

(ञ) लौकिकसंस्कृतभाषायां पाणिनिव्याकरणस्य प्रयोगः प्रधानतः परिलक्ष्यते।

(ट) लौकिकसंस्कृतभाषायां दीर्घसमासयुक्तानां पदानां व्यवहारा अधिकाः परिलक्ष्यन्ते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १३ : लौकिकसंस्कृते रचितं प्रथमं काव्यं किम्?

.....

प्रश्नः १४ : लौकिकसंस्कृते उपसर्गस्य प्रयोगः कुत्र भवति?

.....

प्रसः १५ : कदा लौकिकसंस्कृतभाषा प्रारब्धा अभवत्?

.....

प्रश्नः १६ : लौकिकेसंस्कृते व्यवहृतः व्याकरणग्रन्थः कः?

.....

१४.७ संस्कृतभाषायाः वर्तमानावस्था

भवान् इदानीं ज्ञातवान् यत् अतीव सुप्राचीना भूत्वा संस्कृतभाषा वर्तमानकाले अपि प्रचलितां भवति। न केवलं भारतवर्षे अपि तु समग्रविश्वे भिन्नेषु स्थानेषु संस्कृतभाषाध्यायनस्य भिन्नानि प्रतिष्ठानानि सन्ति। तेषु स्थानेषु संस्कृतभाषायां भिन्नाः शोधादयः अपि भवन्ति। भारतवर्षस्य भिन्नेषु विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च संस्कृतभाषापठनस्य व्यवस्था अस्ति। इच्छुकाः छात्राः तेषां मनोवाञ्छाः पूर्णं कर्तुं शक्नुवन्ति। तदुपरि कर्णाटकराज्यस्य एकस्मिन् ग्रामे जनाः संस्कृतं मातृभाषारूपेण सवहृयन्ते। 'सुधर्मा' नाम्ना संस्कृतभाषायाः प्रतिदिनसमाचारपत्रम् अस्मिन् युगेऽपि संस्कृतस्य चर्चाविषये वार्ता प्रवहति।

एतद् द्रष्टव्यं यत् इन्दो-आर्यानभाषायाः मध्यस्तरस्य भाषा यथा- पालि-प्राकृतादयैः सह लौकिकसंस्कृतभाषाया एका प्रतियोगिता दृश्यते। बौद्ध-जैनधर्मयोः प्रसारेण सह समाजे पालि-प्राकृतभाषयोः समादरं वर्धते। फलतः लौकिकसंस्कृतभाषा क्षतेः सन्मुखीनं भवति। परन्तु मन्दं मन्दं संस्कृतभाषा पुनरूज्जीवितो भवति। समग्रविश्वे भिन्नेषु स्थानेषु अस्याः भाषायाः प्रचारेण प्रसारेण च हेतोः प्रचेष्टां प्रचलति। अस्मिन् युगे संस्कृतभाषायां बहुनि सरलीकरणप्रक्रियाणि व्यवह्रियन्ते। दीर्घसमासवद्धपदस्य व्यवहारः क्षीणतरो भवति। संयुक्तान् व्यञ्जनवर्णान् प्रदर्शयितुं विग्रहस्य प्रयोगस्य प्रचेष्टां भवति। द्वित्ववर्णस्य क्षेत्रे एकवर्णस्य व्यवहारप्रवणता अधिकं दृश्यते। उदाहरणं यथा- प्राचीनसंस्कृते व्यवहृताः 'धर्म-कर्तृ' आदयः पदाः 'धर्म-कर्तृ' आदिषु रूपेषु व्यवहृता इति परिलक्ष्यन्ते। तदुपरि अद्य व्यवहृते संस्कृते बहूनां स्थानीय-शब्दानां अन्तर्भुक्तिः दृश्यते।

अस्मिन् समये संस्कृतभाषायाः या गरिमा समग्रे भारतवर्षे तथा विश्वे एव आसीत्, सा क्षीणतरा भवति इति अनुमीयते। एकस्मिन् काले भारतवर्षे विद्यालयेषु संस्कृतभाषा वाध्यतामूलका आसीत्। किन्तु वर्तमानयुगे अपि भारतवर्षे सर्वेषु स्थानेषु विद्यालयेषु संस्कृतभाषा वाध्यतामूलकरूपेण न गृह्यते। तदुपरि विज्ञान-भित्तिकाध्ययनं प्रति जनानाम् आकर्षणं वृद्धिं प्राप्नोति अतः समग्रे

भारतवर्षे अनेकाभिः भाषाभिः सह संस्कृतस्यापि आकर्षणं न्यूनता प्राप्यते। अद्यापि काचित् जनाः संस्कृतभाषा केवलं वैदिककर्मकाण्डस्य भाषा इति मन्यते। किन्तु समग्रे विश्वे भिन्नेषु स्थानेषु संस्कृतभाषायाः भिन्नान् विषयान् अधिकृत्य शोधचर्चा वर्तते। उदाहरणं यथा- कानाडायाः यूनिवार्चिटि-अव-ब्रिटिछ-कलम्बियायां संस्कृतभाषायाः भिन्नेषु दिक्षु गुरुत्वपूर्णम् अध्ययनं वर्तते। जार्मानी इति देशे अद्यापि विविधाः संस्कृत-विषयकचर्चाः प्रचलन्ति, याः समग्रविश्वस्य आदर्शरूपेण स्वीकृताः। एवं नेपाल-इटाली-इन्दोनेछिया-पोलेण्डादिषु देशेषु अपि संस्कृतस्य अध्ययनमध्यापना-गवेषणादीनि कार्याणि प्रचलन्ति। अन्यभाषावत् संस्कृतभाषापि गतिशीला। अतः अन्यभाषायाः तुलनायाम् अस्यां भाषायाम् एव कालक्रमेण भिन्नाः परिवर्तनाः दृश्यन्ते। भविष्यत्कालेऽपि अस्याः भाषायाः पुनः परिवर्तनं भविष्यति इति अनुमीयते।

१४.८. अध्यायस्य असमीयाभाषायां सारांशः

ঐতিহাসিক প্ৰেক্ষাপটত সংস্কৃত ভাষাৰ ক্ৰমবিকাশ

পৃথিৱীৰ অন্যতম ভাষা হ'ল সংস্কৃত ভাষা। পৃথিৱীত প্ৰচলিত প্ৰাচীন ভাষাসমূহৰ ভিতৰত সংস্কৃত হ'ল অন্যতম আৰু প্ৰধান। আৰ্য্যসকলৰ প্ৰাচীন গ্ৰন্থ ঋগ্বেদৰ পৰা আৰম্ভ কৰি বৰ্তমান যুগলৈকে সংস্কৃতভাষাই বহু স্তৰ পাৰ কৰিলে। এই ভাষাৰ বিষয়ে জানিৱলৈ এই ভাষাৰ ঐতিহাসিক পটভূমিৰ বিষয়ে জানিৱ লাগিব। ই কেনেদৰে ক্ৰমানুসৰি বিকাশ লাভ কৰিছিল তাক জানিব লাগিব। সংস্কৃত, লেটিন, গ্ৰীক, আদি প্ৰাচীন ভাষাসমূহৰ মূল হিচাপে ইন্দো-ইউৰোপীয় নামৰ ভাষা এটাক স্বীকাৰ কৰা হৈছে। এই ইন্দো-ইউৰোপীয় ভাষা দুটা ভাগত বিভক্ত - সতম্ আৰু কেন্তুম্। সতম্ শাখাৰ প্ৰধান ভাষাবোৰ হ'ল ইন্দো-ইৰাণীয়, আলবানীয়, আৰ্মেনীয় আদি। আনহাতে, কেন্তুম্ শাখাৰ প্ৰধান ভাষাবোৰ হ'ল - গ্ৰীক্, লেটিন, জাৰ্মানিক, কেলতিক্ আদি। সংস্কৃত ভাষা হ'ল সতম্ শাখাৰ ইন্দো-ইৰাণীয় ভাগৰ অন্তৰ্গত। ইন্দো-ইৰাণীয় ভাগৰ অন্তৰ্গত ইন্দো-এৰিয়ান ভাষাৰ প্ৰাচীন ভাগটোক সংস্কৃত বুলি কোৱা হয়। সেইবাবে সংস্কৃতভাষাক Old Indo-Aryan (OLA) বুলি কোৱা হয়। সেয়ে ইন্দো-ইউৰোপীয় আৰু ইন্দো-ইৰাণীয় ভাষাৰ ইতিহাসৰ জৰিয়তে সংস্কৃত ভাষাৰ ইতিহাস জড়িত। পৰৱৰ্তী কালত সংস্কৃত ভাষাৰ বিভিন্নস্তৰ পোৱা যায়।

প্ৰধানকৈ বৈদিক সংস্কৃত ভাষা আৰু লৌকিক সংস্কৃত ভাষা ভেদেৰে সংস্কৃত ভাষাৰ দুটা ভাগ পোৱা যায়। বৈদিক সাহিত্যত ব্যৱহৃত ভাষা হ'ল বৈদিক সংস্কৃত ভাষা। স্বকীয় বৈশিষ্ট্যৰে ই সুকীয়া স্থান লাভ কৰি আছে। আনহাতে, লৌকিক সংস্কৃত ভাষা বুলি ক'লে ৰামায়ণ, মহাভাৰতৰ পৰা আৰম্ভ কৰি বৰ্তমানলৈ প্ৰচলিত গ্ৰন্থৰাজিত ব্যৱহৃত সংস্কৃত ভাষাটোকেই বুজা যায়। ইয়াৰ বৈশিষ্ট্য বৈদিক সংস্কৃত ভাষাৰ পৰা পৃথক। এই লৌকিক বা আধুনিক সংস্কৃত ভাষাটোৱেই বৰ্তমান প্ৰচলিত সংস্কৃত ভাষা। ভাৰতবৰ্ষতেই নহয় সমগ্ৰবিশ্বতেই এই ভাষা অধ্যয়নৰ বিভিন্ন প্ৰতিষ্ঠান, বিদ্যালয়, মহাবিদ্যালয়, বিশ্ববিদ্যালয়, গৱেষণা কেন্দ্ৰ আদি আছে। এই সংস্কৃত ভাষাৰ গৰিমা হ্ৰাস হোৱা যেন অনুভৱ হয়, তথাপি ই স্বমহিমাৰ দ্বাৰা বিৰাজমান। ইয়াৰ অস্তিত্ব ৰক্ষাৰ স্বাৰ্থত ইতিহাস, ক্ৰমবিকাশ আদি জনাৰ অতি আৱশ্যক।



१४.९ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- संस्कृतभाषाया: साधारणपरिचयं ज्ञातवन्त:। अस्या: भाषाया उत्पत्तिविषयं ज्ञातवन्त:।
- इन्दोयूरोपीयभाषया सह संस्कृतस्य सम्बन्धविषयं ज्ञातवन्त:।
- वैदिकसंस्कृतभाषा काऽस्ति, तस्या: वैशिष्ट्यानि च ज्ञातवन्त:।
- लौकिक संस्कृतभाषाया: परिचयं; प्रचलनं वैशिष्ट्यानि च ज्ञातवन्त:।
- वर्तमानकाले संस्कृतस्य अवस्था काऽस्ति, तद् विषये अवगम्यते। तदुपरि भारतवर्षस्य उपरि विश्वस्य भिन्नेषु स्थानेषु अपि च संस्कृतभाषाया: चर्चा प्रचलिता भवति, एतद् विषये ज्ञातवन्त:।



१४.१० ज्ञानाधिक्यम्

१) वेनार्जी, प्र: सत्यरञ्जन (२०००): ए हेण्डवुक अव् संस्कृत फिलोलजि, कलकाता : संस्कृतपुस्तक भाण्डार।

२) उपाध्याय, प्र: वाचस्पति (२००१) (सम्पा.): संस्कृत ष्टादिज् इन् इण्डिया, निउ दिल्ली : श्रीलालवाहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ।

३) भागवती, कामाखाचरण: संस्कृत साहित्यर जिलिङनि, गुवाहाटी: ग्रन्थपीठ।

४) घोष, बटकृष्ण : लिंगुइस्तिक इन्त्रोदाक्शन तु संस्कृत कलकाता (१९३७)।



१४.११ अग्रगत्या: निरूपणम्

प्रश्न: १ उत्तरम् : संस्कृत-ग्रीक्-लेटिनादिनां प्राचीन-भाषाणां मूलभाषारूपेण इन्दो-यूरोपीय-भाषां स्वीक्रियते।

प्रश्न: २ उत्तरम् : इन्दो-यूरोपीयभाषाया: भागद्वयं - सतम् केन्तुम् च।

प्रश्न: ३ उत्तरम् : संस्कृतभाषा इन्दो-यूरोपीयभाषाया: इन्दो-इराणीय इति विभागस्यान्तर्भुक्ता।

प्रश्न: ४ उत्तरम् : संस्कृतभाषां बोध्यते।

प्रश्न: ५ उत्तरम् : यस्यां भाषायां वाक्ये व्यवहृतानां पदानां प्रकृति-प्रत्ययगतार्थ: वाक्यस्य अर्थं सूचयति, तां भाषां समन्वयी भाषा इति उच्यते। यथा- संस्कृतभाषा।

प्रश्नः ६ उत्तरम् : असमीया-हिन्दी- बांलादयः।

प्रश्नः ७ उत्तरम् : प्राचीन इन्दो-आर्यानभाषा (OIA)।

प्रश्नः ८ उत्तरम् : संहितापाठस्य सन्धियुक्तपदानां सन्धिविच्छेदं कृत्वा यत्र निर्दिष्टपदं व्यवह्रियते तद् एव पदपाठः इत्युच्यते।

प्रश्नः ९ उत्तरम् : गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती च।

प्रश्नः १० उत्तरम् : ताल्वादि-वर्णोचारण-स्थानस्य उर्द्धभागे उच्चारितः स्वरवर्णः उदात्तः, निम्नभागे उच्चारितः स्वरवर्णः अनुदात्तः तथा च उदात्तानुदात्त्योः धर्ममिश्रितः स्वरवर्णः स्वरितः चेति।

प्रश्नः ११ उत्तरम् : वैदिकसंस्कृते कस्मिञ्चिद् स्थाने उपसर्गस्य प्रयोगः धातोः पञ्चाद् वर्तते, कस्मिञ्चिद् स्थाने पदस्य व्यवधाने भवति तथा च कस्मिञ्चिद् स्थाने एकस्यैव उपसर्गस्य एकाधिकः प्रयोगः परिलक्ष्यते।

प्रश्नः १२ उत्तरम् : वैदिकसंस्कृते लिङ्लकारस्य प्रयोगो नास्ति तथा लट्लकारस्य प्रयोगः अधिकः परिलक्ष्यते।

प्रश्नः १३ उत्तरम् : रामायणम्।

प्रश्नः १४ उत्तरम् : लौकिकसंस्कृते धातोः पूर्वं उपसर्गस्य प्रयोगो भवति।

प्रश्नः १५ उत्तरम् : रामायण-महाभारतयोः रचनाकालात् एव लौकिकसंस्कृतभाषा प्रारब्धा।

प्रश्नः १६ उत्तरम् : पाणिनिव्याकरणम् अर्थात् अष्टाध्यायी।



१४.१२ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः १: इन्दो-यूरोपीयभाषाम् अधिकृत्य एका टिप्पणी विलिख्यताम्।

प्रश्तः २: वैदिकसंस्कृत-लौकिकसंस्कृतयोः मध्ये उपलब्धानि पार्थक्यानि कानि ?

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

प्रश्नः १: वैदिकसंस्कृतभाषायाः वैशिष्ट्यानि लिख्यताम्।

प्रश्नः २: लौकिकसंस्कृतभाषायाः वैशिष्ट्यानि लिख्यताम्।

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः १: संस्कृतभाषायाः वर्तमानावस्थायाम् अधिकृत्य एका आलोचना प्रस्तूयताम्।

प्रश्नः २: संस्कृतभाषयाः ऐतिहासिकः पटभूमिमधिकृत्य एका आलोचना प्रस्तूयताम्।

*** ***** ***